A.C. Joshi Library
P.U. Chandigarh

MSS No. 370 J Subject Religion

Name of MSS श्रीमद् भागवत, भावार्थ दीपिका सहित

Author

Period Folios 190

Script Devnagri Source Prithipal Singh

Missing Folios

Canto: 10 (A)

370—

15 A

1 to 204

श्री· भा· द· स्क· टी· १

आश्रिताः भक्ताः आश्रयः श्रीकृष्णः तद्देवविग्रहं यस्य तत्

ॐस्वस्तिप्रजाभ्यः श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय ॐविश्वसर्गविसर्गादिनवलक्षणलक्षितं
श्रीकृष्णाख्यंपरंधामजगद्धामनमामितत् दशमेदशमंलक्ष्यमाश्रिताश्रयविग्रहं क्रीडद्यदुकुलांभोधौपरानं
दमुदीर्यते दशमेकृष्णसत्कीर्तिवितानायानुवर्ण्यते धर्मग्लानिनिमित्तस्तन्निरोधोदुष्टभूभुजां प्राकृतादिश्रुत
र्थायोनिरोधःसत्रवर्णितः तत्रतत्प्रसंगतस्सृष्टिसंहारादिनिरूपणैः कृतानवतिरध्यायादशमेकृष्णकीर्तये आ
द्यैश्चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयावनेः भारंहर्तुंहरेर्जन्मसप्रसंगंनिरूप्यते गोकुलेमथुरायांचद्वारवत्यांततःकृ

राजोवाच कथितोवंशविस्तारोभवतासोमसूर्ययोः
राज्ञांचोभयवंशानांचरितंपरमाद्भुतम् १

श्या

मात् कृष्णलीलांत्रिधाप्रोक्तातत्राद्येदेहस्त्वनेकधांसपंचत्रिंशताध्यायैर्बृहद्वृंदावनादिषु गोकुलेवसतोलीलावर्ण्यतेस्प
ष्टकृता एकेनयमुनावारिणाक्रूरेणकृतास्तुतिः एकादशभिराख्याता लीलामधुपुरेकृता शेषैर्द्वारवतीलीलातत्रि
मीणादिवर्ण्यते एवंनवतिरध्यायादशमेविषयाःकथाः तत्रतुप्रथमेकंसःस्वस्रसंदेवकीसुतात् श्रुत्वाभीतोऽवधीत्त
स्याःषड्गर्भानितिवर्ण्यते कृष्णावतारचरितश्रवणामृतनिर्वृतः उक्तानुवादेनोत्सुक्याद्राजापृच्छतितत्सुनःकथितइति

उभयवंशानांसोमसूर्योद्भवानां १

1A यदोश्चरितं वर्णितमित्यन्वयः अंशेनेति प्रतीत्यभिप्रायेणोक्तं २ ननुउक्तानि ज्ञातो गतः पितृगृहाद्व्रजमेपितार्थ इत्यादि
नामत्वं पुनर्विस्तरेण वदेत्याह अवतीर्येति भूतानि भावयति दैत्योपद्रवाद्रक्षतीति भूतभावनः ३ अत्र लोके त्रिधा जनाः
मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये न कस्याप्यलं प्रत्यय इत्याह निवृत्ततर्षैर्गततृष्णैर्मुक्तैरपीत्यर्थः मुमुक्षूणामप्य
मेवोपाय इत्याह भवौषधादिति विषयिणामपि परमो विषयो यमित्याह श्रोत्रमनोभिरामादिति अपगताशुक्रयस्मात

यदोश्च धर्मशीलस्य नितरां मुनिसत्तम तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः २ अवतीर्य यदोर्वंशे भग
वान्भूतभावनः कृतवान्यानि वीर्याणि तानि नो वद विस्तरात् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रम
नोभिरामात् क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ४ पितामहा मे समरेऽमरंजयैर्देव
व्रताद्यातिरथैस्तिमिंगिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं स्म यत्प्लवाः ५

मात्मानं हन्तीति पशुघ्नः तस्मात् पशुघ्नातिनाइति वा तस्माद्विना उत्तमः श्लोको यशो यस्य स उत्तमश्लोकः श्रीकृष्णस्तस्य गु
णानुवादात्कः पुमान्विरज्येत विरक्तो भवेत् ४ अस्मत्कुलदैवतं कृष्णः अतस्तत्कथैव नित्यं श्रोतव्येत्याशयेनाह अम
रान्जयंतिये तैः देवव्रतो भीष्मस्तदाद्यैरतिरथैस्तिमिंगिलतुल्यैः दुरत्ययं कौरवसैन्यमेव सागरं वत्सपदमित्यल्पं कृत्वा
मे पितामहा युधिष्ठिराद्या अतरन्नस्य अत्र हेतुः यः श्रीकृष्णस्य पदप्लवो येषां तस्य वीर्याणि वदस्वेति तृतीयश्लोकेनान्वयः ५

श्री० भा०द० टी० १ २

नकेवलंपांडवानेवरक्षदिदंमच्छरीरमपीत्याह द्रौणेरस्त्रत्यान्नोब्रह्मास्त्रेणदग्धमिदंमच्छरीरंकुरूणांपांडवानांच
संतानस्यनिधानं मममातुःकुक्षौप्रविष्टोधृतचक्रःयोजुगोपेति ६ अखिलदेहभाजांसर्वप्राणिनामंतर्बहिश्च पु
रुषरूपेणकालरूपेणेति अयंशुभाभिप्रायेणबहुवचनं मृत्युंसंसारमुतामृतमपिप्रयच्छतो भगवतस्तस्यवीर्याणिवदस्वब्रू
हि अयंभावः अंतर्यामिरूपेणांतर्दृष्टीनांमुक्तिंबहिर्दृष्टीनांकालरूपेणमृत्युंददातियतःअतोंतर्दृष्ट्यातद्वीर्याण्येव

द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानां जुगोपकुक्षिंगतआत्तचक्रोमातुश्चमेयःशरणंगतायाः
६ वीर्याणितस्याखिलदेहभाजामंतर्बहिःपूरुषकालरूपैः प्रयच्छतोमृत्युमुतामृतंचमायामनुष्यस्यवदस्वविद्वन्
७ रोहिण्यास्तनयःप्रोक्तोरामःसंकर्षणस्त्वया देवक्याःगर्भसंबंधःकुतोदेहांतरंविना ८ कस्मान्मुकुंदोभगवा
न्पितुर्गेहाद्व्रजंगतः क्ववासंज्ञातिभिःसार्धंकृतवान्सात्वतांपतिः ९ व्रजेवसन्किमकरोन्मधुपुर्यांचकेशवः
भ्रातरंचावधीत्कंसंमातुरद्धातदर्हणम् १०

श्रोतव्यानीति ७ ननुबलंगदंसारणंचदुर्मदंविपुलंध्रुवं वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत् इतिरोहिण्यास्तनयो
रामःप्रोक्तः वसुदेवस्तुदेवक्यामष्टपुत्रानजीजनत् कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः ऋजुंसंमर्दनंचैवसंकर्षणम
हीश्वरं अष्टमस्तुतयोरासीत्स्वयमेवहरिःकिलेति पुनःदेवक्यागर्भसंबंधस्तस्यैवोक्तः सकुतोघटतेइत्यपेक्षा ८ कस्मा
दितिभगवतःकंसभयशंकासंभवादित्यर्थःपितुर्गेहाद्वसुदेवगृहाद्व्रजंकस्माद्गतइतिप्रश्नः ९ मातुःभ्रातरंकंसं तस्माद्

[illegible] २

2A

॥ ९ ॥ ननु त्वत्तृड्भ्यां पीडितस्य कुतस्तव श्रवणावकाश इत्याह नैषेति त्यक्तोदकस्यापि मम जीवनं हरिकथामृ
तपानं निमित्तं तदुपरमे मम प्राणा एव जीवितं न स्यादित्यर्थः १३ भृगुनंदन शौनक एवं साधुवादं समीचीनं प्रश्नं वै
यासकिः श्रीशुकः विष्णुरातं परीक्षितं भागवतप्रधानो भागवतेषु श्रेष्ठः १४ व्यवसिता कृतनिश्चया यस्य तां बुद्धिः १५

देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः मधुपुर्यां सहावासीत्पत्न्यः कत्यभवन्विभोः १० एतदन्यच्च
सर्वं मे मुने कृष्णविचेष्टितं वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं ११ नैषातिदुःसहा क्षुन्मां त्यक्तोद
मपि बाधते पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं १२ श्रीसूतः एवं निशम्य भृगुनंदन साधुवादं वै
यासकिः स भगवानथ विष्णुरातं प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः
१३ श्रीशुक उ० सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः १४
वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा १५ भूमिर्दृप्तनृपव्या
जदैत्यानीकशतायुतैः आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ १६ गौर्भूत्वाश्रुमुखी खिन्ना क्रंदंती करुणं
विभोः उपस्थितांतिके तस्मै व्यसनं स्वमवोचत १७

तत्पादसलिलं गंगोदकं १५ तत्र तावत्प्रथमं भगवदवतारकारणमाह दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानामयु
तैर्यो भूरिभारस्तेनाक्रांता सती शरणं ययौ १६ गौर्भूमिर्विभोरंतिके उपस्थिता स्वं व्यसनमवोचत १७

श्री॰
भा॰ द॰
टी॰
३
3

त्रिनयनोमहारुद्रस्तेनसहवृषेणधर्मेणआसमंतात् कंसुखंतदधिष्ठानंजीवरूपेणपिबतिभुंक्तेइतिवृषाक
पिः २० पौरुषींपुरुषस्यभगवतोगांवाचंमेमत्तःआशृणुत माचिरमविलंबितंयथाभवति तथैवविधीयतांचेति
विज्ञानात् २१ पुरैवपुंसाईश्वरेणज्वरःसंतापोवधृतोनिश्चितःएवमेव नत्वश्रमत्यानां भूमाववतारोमहद्दुःखायेत्या

ब्रह्मातदुपधार्याथसहदेवैस्तयासह जगामसत्रिनयनस्तीरंक्षीरपयोनिधेः १९ तत्रगत्वाजगन्नाथंदे
वदेवंवृषाकपिं पुरुषंपुरुषसूक्तेनउपतस्थेसमाहितः २० गिरंसमाधौगगनेसमीरितांनिशम्यवेधास्त्रि
दशानुवाचह गांपौरुषींमेशृणुतामराःपुनर्विधीयतामाशुतथैवमाचिरं २१ पुरैवपुंसावधृतोधराज्व
रोभवद्भिरंशैर्यदुषूपजन्यतां सयावदुर्व्याभरमीश्वरेश्वरःस्वकालशक्त्याक्षपयंश्चरेद्भुवि २२ वसुदेवगृहे
साक्षाद्भगवान्पुरुषःपरः जनिष्यतेतत्प्रियार्थंसंभवंतुसुरस्त्रियः २३ वासुदेवकलानंतःसहस्रवद
नःस्वराट् अग्रजोभवितादेवोहरेःप्रियचिकीर्षया २४ विष्णोर्मायाभगवतीययासंमोहितंजगत्
नो।
आदिष्टाप्रभुणांशेनकार्यार्थेसंभविष्यति २५

ह ईश्वराणांलोकपालादीनामपीश्वरः स्वकालशक्त्यास्वस्वरूपकालबलात् यावद्भूमिभारंक्षपयन्भगवांश्चरेत् २२ ३
२३ स्वेनात्मस्वरूपेणराजतेइतिस्वराट् २४ देवकीगर्भसंकर्षणाययशोदामोहनादिकार्यार्थेयशोदायांसंभविष्यति २५

3A २६ भोजेंद्रबंधनागारेवतारायप्रस्तावमाह शूरसेनइत्यादि यावदध्यायसमाप्तिः मथुरायामावसन्विषयान्

श्रीशुकउवाच इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः समाश्वास्यमहींगीर्भिःस्वधामपरमंययौ २६
शूरसेनोयदुपतिर्मथुरामावसन्पुरीं माथुराञ्छूरसेनांश्चविषयान्बुभुजेपुरा २७ राजधानीततः
साभूत्सर्वयादवभूभुजाम् मथुराभगवान्यत्रनित्यंसन्निहितोहरिः २८ तस्यांतुकर्हिचिच्छौरिर्व
सुदेवःकृतोद्वहः देवक्यासूर्ययासार्धंप्रयाणेरथमारुहत् २९ उग्रसेनसुतःकंसःस्वसुःप्रिय
चिकीर्षया रश्मीन्हयानांजग्राहरौक्मैरथशतैर्वृतः ३० चतुःशतंपारिबर्हंगजानांहेममालिनां
अश्वानामयुतंसार्धंरथानांचत्रिषट्शतम् ३१

देशान् २७ २८ अस्वर्ययानवोढया प्रयाणेपित्र्यागारार्थं २९ रश्मीनग्रहीत् ३० पारिबर्हमुपस्करंसार्धं
मयुतंपंचदशसहस्राणिअश्वानांत्रिषट्छतमष्टादशशतानिरथानांहेममालिनामितिसर्वत्रयोज्यं ३१

श्री० भा० द० पू० ९

५

३२ ३३ प्रग्रहीणंरश्मिधृतं आभाष्यरेरेकंसेतिसंबोध्यहंताहनिष्यति ३४ कुलपांसनःकुलदूषणःआरब्धउद्युक्तः
कचेकेशबंधे ३५ नृशंसक्रूरं महाभागइत्ययंभावः स्वजन्मनिहर्षेणादावेवदेवानकदुंदुभिघोषेणात् भा

दासीनांसुकुमारीणांद्वेशतेसमलंकृते दुहित्रेदेवकःप्रादाद्यानेदुहि
तृवत्सलः ३२ शंखतूर्यमृदंगाश्चनेदुर्दुंदुभयःसमं प्रयाणप्रक्र
मेतावद्वरवध्वोःसुमंगलं ३३ पथिप्रग्रहिणंकंसमाभाष्याहाशरी
रवाक् अस्यास्त्वामष्टमोगर्भोहंतायांवहसेबुध ३४ इत्युक्तःसखलः
पापोभोजानांकुलपांसनः भगिनींहंतुमारब्धःखड्गपाणिःकचेऽग्रही
त् ३५ तंजुगुप्सितकर्माणंनृशंसंनिरपत्रपं वसुदेवोमहाभागउवाचप
रिसांत्वयन् ३६

विभगवदवतारेणावशक्यप्रतीकारतासंभवतीतिसांत्वयन्स्तुत्याकृपाविषयत्वोपपत्तिभिश्चसाममार्गेणसंबोधयन् ९ ३६

५७

३७ ननु मरणभयान्न हन्मीति चेत् तथापि मरणस्यापरिहरणीयत्वाद्देहांतरस्याप्यवश्यंभावित्वात्तत्रापि च भोग
प्रेमास्पदत्वादीनामविशेषात्तत्र भयेन पापाचरणमयुक्तमित्याह देहेन सहेति विधात्रा ललाटे लिखितत्वात् इति।
तथापि कालविलंबार्थं हन्मीति चेत् तत्राह अद्य वेति अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्तमिति

वसुदेवः श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्व
णि ३७ मृत्युर्जन्मवतां वीर देहेन सह जायते अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ३८
देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ३९ व्रजं॰
स्तिष्ठन्पदैकेन यथैवैकेन गच्छति यथा तृणजलौकैवं देही कर्मगतिं गतः ४०

भावः ३८ किं चास्मिन्देहे गते यदि देहांतरं न स्यात्तदा युज्येत पापेनापि तत्पालनं न तु तदस्तीत्याह देहे पंचत्वमाप
न्ने प्राप्तप्रायं कर्मवशाद्यत्नेन तदेव प्रथमं देहांतरं प्राप्य पश्चात्पूर्वं वपुस्त्यजतीति ३९ अत्र दृष्टांतः व्रजन्निति एकेना
ग्रतो निहितेन पदा तिष्ठन् भुवमवष्टभ्य पश्चादन्येन पूर्वप्रदेशादुत्थाय परो निहितेन पदा गच्छति न द्वितत् अत्र च स्वी
कारपरित्यागौ नात्यंतभिन्नविषयाविति स्पष्टं दृष्टांतांतरमाह यथा तृणजलौकेति सा हि तृणांतरमवष्टभ्य पूर्वं तृणं

श्री टि ८

एवंकर्मण्येववर्तमानोन्योजीवोपिदेहविषयावेवस्वीकारपरित्यागौदर्शयितुंदृष्टांतरमाह स्वप्नइति। दृष्टराजादिदर्शनं श्रुतमिं
द्रादिश्रवणंताभ्यामाहितसंस्कारेणमनसातदेवानुचिंतयन् ईदृशंजाग्रद्दृष्टश्रुतसदृशं देहंराजादिरूपंकिमप्यनिरु
क्तंपश्यति तत्क्षणांतरेचतदेवाहमिति प्रपद्यतेमन्यतेततस्तत्रजाग्रद्देहादपगतस्मृतिर्भवतिपुरुषोयथेतिजाग्रत्येवदृष्टांत
दर्शयितुमाह मनोरथेनेति अत्रापिदृष्टश्रुताभ्यामित्यादियोज्यं तथाचवक्ष्यति जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृ
तिः जन्मतात्मतयापुंसः सर्वभावेनभूरिदविषयस्वीकृतिंप्राकृयथास्वप्नमनोरथौ स्वप्नंमनोरथंचेच्छन्प्राक्तनंनस्मर

स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किम
प्यपस्मृतिः ६१ यतोयतोधावतिदैवचोदितं मनोविकारात्मकमापपंचसु गुणेषुमायारचितेषुदेह्य
सौप्रपद्यमानःसहतेनजायते ६२

स्मृतिरित्यादि तद्दृष्टांतमपिकर्मवश्याहंतांतरंप्राप्यप्राक्तनंत्यजतीति ६१ ननुविचित्रदेहहेतूनांकर्मणांकृतत्वात्
देहविषयप्राप्तौकिंकारणमतआह देहस्यपंचसमयेपंचसुगुणेषुमायारचितेषु नानादेहरूपेणरचितेषुदैवेन
फलाभिमुखेनकर्मणाचोदितंप्रेरितंनानाविकारात्मकंमनोयंयंदेहंतिर्यगादिरूपंप्रतिधावति धावच्चसयंय
मापअभिनिवेशेनप्राप्नोतितत्रासौदेहीजायते ननुमनसःकर्मकर्तृत्वात्तदेवजायतां नतत्कर्तात्मेत्याह प्रपद्यमा
नइतितदेवाहमितिप्रपद्यमानस्तेनसहजायतेइति ६२ ५

5A

ननुमरणंभविष्यत्येवकिमपिदेहमात्रंतथाप्यस्यातिप्रियस्यराजदेहस्यरत्नरणयाकृत्यमतिक्रियतेइतिचेत्
तत्राह यदश्चंद्रादिज्योतिरुदकप्रभृतिषुपार्थिवेषुघटादिषुघटाद्युदकेषुपार्थिवेषुतैलघृतादिषुच प्रतिबिंबे
नस्थितंसमीरस्यवायोर्वेगमनुगतंकंपादिधर्मंप्रतीयतेयथा एवंस्वाविद्यारचितेषुगुणेषुदेहेषुसौरागेणानु
गतःप्रविष्टोमुह्यति अभिनिवेशंप्राप्नोतिअयंभावः आत्मनस्तावद्देहाद्यध्यासात् जन्मादिकंसदतेनजायतइति

ज्योतिर्यथैवोदकपार्थिवेष्वदःसमीरवेगानुगतंविभाव्यते एवंस्वमायारचितेष्वसौगुणेषुरागा
नुगतोविमुह्यति ४३ तस्मान्नकस्यचिद्द्रोहमाचरेत्सतथाविधः आत्मनःक्षेममन्विच्छन्द्रोग्धुर्वै
परतोभयं ४४ एषातवानुजावालाकृपणापुत्रिकोपमा हंतुंनार्हसिकल्याणीमिमांत्वंदीनवत्स
लः ४५

ततश्चान्योन्यधर्माध्यासाद्यथादेहधर्माःकार्श्यादयआत्मनिप्रतीयंते एवमात्मधर्माःप्रेमास्पदत्वादयोपिदेहा
दिष्विति राजस्तकरदेहयोर्विशेषाभावात् वधोऽयमस्यप्रतीकारइति ४३ एवमुक्तंसामोपायमुपसंहरन्भेदमाह
ततथाविधोकस्यचिद्द्रोहंनाचरेत् अतइत्यभिद्रुह्यमानात्तत्संबंधिनश्चायमादपिद्रोहाद्ध्रुवंचभयमितिभेदोदर्शितः

४४ पुनःसाममेवाह पुत्रिकोपमादारुमयीवावेतन
नमाणा ४५

श्री॰ भा॰ द॰ पु॰ ६

बोध्यमान उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादानैत्यानन्तुभूतश्चत्रस्तत इति ४९ आनकदुंदुभिरिति पदं महाभाग इत्यत्रोबोधकाभिप्रायं प्रतिबोद्धुं प्रतिकर्तुमित्यर्थः इदं वत्समाण मपत्यार्पणमन्वपद्यत तातवा न ५० ननु खलोयमेतन्न मन्यत इत्याशंक्याह स्वयमेव मृत्युरिति ५७ तस्मादुपेक्षादोषपरिहारायैवं करिष्या

श्रीशुक उवाच एवं सामादिभिर्भेदैर्बोध्यमानोपि दारुणः नन्यवर्तत कौरव्य पुरुषादानत्रुव्रतः ४९ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः प्राप्तं कालं प्रतिबोढुमिदं तत्रान्वपद्यत ५० स

६ त्वर्द्धिमता पोस्यायावृद्धिवलोदयं यद्यसौन निवर्तेत नापराधोस्ति देहिनः ५८ प्रदाय मृत्यवे

पुत्रान्मोचयेकृपणामिमां सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ५९

मीत्याह प्रदायेति मृत्यवे कंसाय ननु इदमपि नैवं न्याय्यमित्याशंक्याह सुता इति असौ यदि मे सुता जायेरन् तदा मह इयत्ता तद्भवत जीवितं तावद्भवेदेवत दंतरा यद्ययमेव म्रियेत तदा न किंचिदन्याय्यम् ५९

६

6A

यदिवसताभविष्यंति नचायंम्रियेततदामत्सकाशाद्देवास्यमरणमितिविपर्ययोवाकिंनस्यात् ननुश्रेष्ठस्यकंसा-
स्यतवबालकात्कथंमृत्युःस्यादित्यतआह गतिरिति भ्रातः अस्यास्त्वामष्टमोगर्भोहंतेतस्माक्रवतोवचउक्रवतः अ
तइदानीमपसार्यणप्रतिज्ञेवमेत्रः तथासतिउपस्थितोमृत्युरयंनिवर्तेततावत् निवृत्तः पुनःकालांतरेणापते
देतनापराधोममेत्यर्थः अथवामत्सकाशादुपस्थितोमृत्युरस्यवधाद्योनिवर्तेत पुनरनेनमंत्रेणनभवेदिति य

विपर्ययोवाकिंनस्यान्नतिर्यातउईरत्यया उपस्थितोनिवर्तेतनिवृत्तः पुनरापतेत् ५० अग्नेर्यथादा
रुवियोगयोगयोरदृष्टतोन्यन्ननिमित्तमस्ति एवंहिजंतोरपितुर्विभाव्यः शरीरसंयोगवियोगहेतुः ग
५१ एवंविमृश्यसुतपापंयावदात्मनिदर्शनं पूजयामासवैशौरिर्वद्धमानप्रवः सरः ५२ विकस
द्वदनांभोजोनृशंसोनिरपत्रपं मनसाहूयमानेनप्रहसन्निदमब्रवीत् ५३

द्वागतिर्यातुईरत्ययेत्येतस्यप्रपंचउपस्थितइति प्राणिनामदृष्टंचउर्वितर्क्यमिति व्यतिरेकेणकिंचिन्निया
मकमस्ति वनेदृत्तात्यदहनवह्निः सन्निहितानपिदृष्टान्पदार्थान्कदाचिद्दहस्यानपिदहति ग्रामेशृहोन्वा न
स्यस्यप्राणपदृष्टव्यतिरेकेणकिंचिन्नियामकमस्तियथाएवंजंतोर्जन्ममरणयोरपिदेहतुईर्विभाव्योः चिंत्यः ५१
यावदात्मनिदर्शनेस्वप्रतावधिविचार्य ५२ तस्यविश्वासायविकसितनैवदनांभोजः प्रहसन्नब्रवीत् ५३

त्र

श्री॰ यत्तयथाश्वत्थीरिणीवागाह तथानिश्चितंअस्याःसकाशात्तेभयंनास्ति यतोयेभ्यःपुत्रेभ्यस्तेभयमुत्पन्नं
भा॰ द॰ अष्टमोहंतेसुकेरन्योन्यापेत्तयासर्वेंषष्टमाभदेपुरिति ततःउत्पन्नोस्तेनास्याःपुत्रान्समर्पयिष्ये ५४ नि
टी॰ हेतुनिर्हेतः तद्वाक्यसारउपपत्तिःतद्वित् ५५ प्रसूतिकालेप्राप्तेसर्वात्माभगवानेवदेवतायस्याःसातथा
८

श्रीवसुदेवउवाच नचास्यास्तेभयंसौम्ययद्वैसाहाशरीरवाक् पुत्रान्समर्पयिष्येस्यायतस्तेभ
यमागतम् ५४ श्रीशुकउवाच स्वसुर्वधान्निववृतेकंसस्तद्वाक्यसारवित् वसुदेवोपितं
प्रीतःप्रशस्यप्राविशद्गृहं ५५ अथकालेउपावृत्तेदेवकीसर्वदेवता पुत्रान्प्रसुषुवेचाष्टौकन्यां
चैवानुवत्सरं ५६ कीर्तिमंतंप्रथमजंकंसायानकदुंदुभिः अर्पयामासकृच्छ्रेणसोनृतादति
विह्वलः ५७ किंदुःसहंहिसाधूनांविदुषांकिमपेक्षितं किमकार्यंकदर्याणांदुस्त्यजंकिंधृता
त्मनां ५८ दृष्ट्वासमत्वंतच्छौरेःसत्येचैवव्यवस्थितिं कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ५९

सर्वदेवतामयीतिवाभगवदाश्रयत्वात् ५६ ५७ ननुसत्यवेपुत्रंकथमर्पितवानित्यपेक्षायामाह साधूनांस
त्यसंधानांपुत्रलालनसुखापेक्षाकथंत्यक्तेतिअतआह विदुषामिति भगवाने
वतत्वंनान्यदितिजानतामित्यर्थः ननुस्वयंनीतेसतिकंसो ॥ ८

7A

वालंनहन्यादितिमत्वानीतवानितिकिंनस्यादितिनेत्याह किमकार्यमिति ननुदेवकीपुत्रंकथंत्यजेत्यत
आह दुस्त्यजमिति चित्तेष्टनआत्माहरिर्येषांतेषां ५८ ६१ कंसस्यशांतिर्देवकार्यानुगुणंभवतीतिनारदस्य

कंसउवाच प्रतियातुकुमारोयंनह्यस्मादस्तिमेभयं अष्टमाद्युवयोर्गर्भान्मृत्युर्मेविहितःकिल ६०
तथेतिसुतमादायययावानकदुंदुभिः नाभ्यनंदततद्वाक्यमसतोविजितात्मनः ६१ नंदाद्यायेव्रजे।
गोपायाश्चामीषांचयोषितः वृष्णयोवसुदेवाद्यादेवक्याद्यायदुस्त्रियः ६२ सर्वेवैदेवताप्रायाउभयोर
पिभारत ज्ञातयोबंधुसुहृदोयेचकंसमनुव्रताः ६३ गतेथवसुदेवेतुदेवकार्यार्थमुद्यतः एतत्कं
सायभगवान्शशंसाभ्येत्यनारदः भूमेर्भारायमाणानांदैत्यानांचवधोद्यमं ६४ ऋषेर्विनिर्गमेकंसो
यदून्मत्वासुरानिति देवक्यागर्भसंभूतंविष्णुंचस्ववधंप्रति ६५ देवकींवसुदेवंचनिगृह्यनिगडैर्गृहे जा
तंजातमहन्पुत्रंतयोरजनशंकया ६६ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदस्तथा घ्नंतिह्यसुतृपोलुब्धाराजानः
प्रायशोभुवि ६७

प्रस्तवस्यानंतरमाह नंदाद्याइत्यादित्रयेणउभयोर्वसुदेवनंदकुलयोः ६३ वधोद्यमं
दैवकृतमितिशेषः ६४ ६५ निगडैःशृंखलैः अजनोविष्णुस्तस्याशंकया ६६ ६७

श्री॰
भा॰ द॰
टी॰
८

९८ ९९ इतिश्रीभावार्थदीपिकायांदशमप्रथमः १ ॐद्वितीयेकंसवातायदेवक्यागर्भगोहरिः ब्रह्मादिभिःस्तु
तः साचसातितेतिनिरूप्यते यदुभिः सवरुद्धातेस्तुकं तमेवंविरोधंप्रपंचयतिनवयादेवकीगर्भस्यान्यत्रसं
चारेणभगवतः प्रवेशावकंप्रलंवेत्यादिसार्धत्रयेण महाशनोद्यासुरः [illegible]द्विविधोजरासंधः १ २ ३ ते
आत्मानमिहसंजातंजानन्प्राग्विष्णुनाहतं महासुरंकालनेमिंयदुभिः सवरुध्यत ९८ उग्रसेनंचपि
तरंयदुभोजांधकाधिपं स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ९९ इतिश्रीभागवतेदशमस्कंधेप्र
थमोध्यायः १ श्रीशुकउ॰ ॐप्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधे
नुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनांकदनंचक्रेबलीमागधसंश्रयः २ तेपीडि
ताविविशुः कुरुपांचालकेकयान् साल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ३ एकेतमनु
रुंधानाज्ञातयः पर्युपासते मथुरायांस्थिताश्चैवयेकृतोद्याविशांपते हतेषुषट्सुबालेषुदेवक्याउ
ग्रसेनिना सप्तमोवैस्ववंधामयमनंतंप्रचक्षते गर्भोबभूवदेवक्याहर्षशोकविवर्द्धनः ५
यादवास्तांताविविविशुः अनुरुंधानाअनुवर्तमानाः ४ धामकलातदेवसप्तमोगर्भोबभूव किंतद्धामेत्यतआह
यमनंतमितिहर्षशोकविवर्द्धनः आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारण्याद्दृष्ट्याचशोकइति ५

8A

समादिशत्पदाज्ञां दत्तवान् ६ ७ ननु सा गोकुले किमित्यास्ते तत्राह न केवलं सैव अन्या अपीति विवरेषु अलक्ष्य स्थानेषु ८ देवक्या जठरे संतं ननु गर्भ आकृष्यमाणः कथं जीवेदित्यत आह मामकं धामेति ९ तत्र ततः किमर्थमेवं कार्यमित्यत आह अथेति अथानंतरमेवेत्यर्थः अंशभागेनेति अंशैः शक्तिभिर्भजते धिष्ठति सर्वान् ब्रह्मादिस्तंबपर्यंतानित्यंशभागस्तेन परिपूर्णरूपेणेत्यर्थः यद्वा अंशेन ज्ञानेश्वर्यकलादिभिर्भजयति स्वीयानिति तथा।

भगवानपि विश्वात्मा विदित्वा कंसजं भयं यदूनां निजनाथानां योगमायां समादिशत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले ७ अन्याश्च कंससंविग्ना विवरेषु वसंति हि ८ देवक्या जठरे गर्भं शेषाख्यं धाम मामकं तत्संनिकृष्य रोहिण्या उदरे संनिवेशय ९ अथाहमंशभागेन देवक्याः पुत्रतां शुभे प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि १०

तेनेति यद्वा अंशेन पुरुषरूपेण मायया भागो भजनमीक्षणं यस्य तेन यद्वा अंशेन मायया गुणावतारादिरूपभागा भेदा यस्य तेन यद्वा अंशाः एव मत्स्यकूर्मादिरूपा भजनीया न तु साक्षात्स्वरूपं यस्य तेन अथवा अंशैर्ज्ञानादिभिर्भजनमनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णरूपेणेति विवक्षितं कृष्णस्तु भगवान्स्वयमित्युक्तत्वादिति तां प्रोत्साहयति त्वं यशोदायामित्यादि सार्द्धचतुष्टयेन १०

श्री·
भा·द·
मू·
८
९

सर्वान्स्वर्गादीन्कामयन्ते येतेषां वराणां श्रेष्ठांनियंत्री अर्चकानां सर्वान्कामवरान्प्रददातिया तां ॥ १३ तु द्विक्रमेण
चतस्य व्यपदेशा भविष्यति इत्याह गर्भसंकर्षणादित्यादिना त्वया संकृष्टेन गर्भेणेति संकर्षणं रामेति संबोधने करि

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामवरप्रदां ॥ नामधेयानि कुर्वं
ति स्थानानि च नरा भुवि दुर्गेति भद्रकालीति विजया वैष्णवीति च १२ कुमुदा चंडिका कृष्णा माधवी क
न्यकेति च मायानारायणीशानी शारदेत्यंबिकेति च १३ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि रामे
ति लोकरमणाद्बलभद्रं बलोच्छ्रयात् १४ संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य प
रिक्रम्य गां गता तत्तथाकरोत् १५ गर्भे प्रणीते देवक्या रोहिणीं देवमायया अहो विस्रंसितो गर्भ इति
पौरा विचुक्रुशुः १६ भगवानपि विश्वात्मा भक्तानामभयंकरः आविवेशांशभागेन मन आनकदुंदुभेः
१७

ष्यंति लोकस्य रमणाद्दस्युत्पादनात् १४ तथेति उं रामस्य दोऽदर्शो पुनरपि तं मिति श्रुत्यादेशेण प्रतिगृह्य गां पृथ्वीं गता
सती तथैवाकरोत् १५ विस्रंसितो विस्रस्त इत्यर्थः इति विचुक्रुशुः नततहिरित्यर्थः १६ मन आविवेश मनस्याविर्बे
व

२
रू
८

जीवानामिवनथात्वसंबंधइत्यर्थः धामश्रीमूर्तिः १८ जगन्मंगलंजगतोमूर्तिमन्मंगलं अच्युतांशंच्युतिरहिता
अंशाऐश्वर्यादयोयस्यतं यद्वा अच्युतस्यअंशोभक्तानामनुग्रहायपरिछिन्नगात्रइत्यर्थः समाहितंसम्यग्भृतमेवा
हितंवेददीहयार्पितंदेवीद्योतमानान्नुदसत्वेत्यर्थः सर्वात्मकंसर्वस्यात्मानं अतएवात्मभूतं स्वस्मिन्नादावेवसंतं

ससात्ताद्भगवान्विसभुर्वोभारापनुत्तये सविभ्रत्पौरुषंधामभ्राजमानोयथारविः दुरासदोतिदुर्धर्षोभूता
नांसंबभूवह १८ ततोजगन्मंगलमच्युतांशंसमाहितंशूरसुतेनदेवी दधारसर्वात्मकमात्मभूतंकाष्ठा
यथानंदकरंमनस्तः १९ सादेवकीसर्वजगन्निवासनिवासभूतानितरांनरेजे भोजेंद्रगेहेग्निशिखेवरु
द्धासरस्वतीज्ञानखलेयथासती २० तांवीक्ष्यकंसःप्रभयाजितांतरांविरोचयंतींभवनंशुचिस्मितां आ
हैषमेप्राणहरोहरिर्गुहांध्रुवंश्रितोयन्नपुरेयमीदृशी २१

मनस्तोमनसैवदधार धारणयाधृतवती अत्रानुरूपंदृष्टांतमाह यथाकाष्ठाप्राचीदिक् आनंदकरंचंद्रमिति १९ स
र्वजगन्निवासस्यनिवासभूतासत्यपिनितरांस्वतरांसर्वजनाह्लादकतयानरेजे किंतुस्वयमेवानंदमग्नाभवत् यतः
कंसस्यगेहेरुद्धाअग्नेमंदहरपतेतद्घटादिगुरुद्धाअग्निशिखादीपरवनयथासतीशोभमानासरस्वतीज्ञानवंचकेरुद्धा यथा

मेषामनुपकारिणीनराजतेतद्वत् २०

श्री॰ प्रभयाभवनंविरोचयंती अजितोविष्णुः अंतराकृतिमध्येयस्यास्तां एषविरोचमानोध्रुवंहरिरेवयतोयस्मादीह
शीघ्रवैनासीत् २१ मेमयात्रकिंकरणीयं नतुसंतिसामादयउपायानेति स्वयमेवाह अयंमर्त्यतेजोदेवकार्यप्र
भा॰ द॰ धानो विक्रमंनविहंतिइतिमद्वधेपराक्रमंकरिष्यत्येवेत्यर्थः यद्वानर्हिश्यमिदानीमेवहन्यतामितिविचिंत्याह
स्क॰ अर्थतेजोपिप्रमान्विक्रमंनविहंतिननाशयतिहीवयेतन्नाशःस्यादितिभावः तदेवाहस्त्रियाइतिगुरुमत्यागा
१॰
10

किमद्यतस्मिन्करणीयमाशुमेयदर्थतेजोनविहंतिविक्रमं स्त्रियाःस्वसुर्गुरुमत्यावधोयंयशःश्रियं
हंत्यनुकालमायुः २२ सएषजीवन्खलुसंपरेतोवर्तेतयोत्यंतनृशंसितेन देहेमृतेतंमनुजाःशपंति।
गंतातमोन्धंतनुमानिनोध्रुवं २३ इतिघोरतमाद्भावात्संनिवृत्तःस्वयंप्रभुः आस्तेप्रतीक्षंस्तज्जन्महरे
वैरानुबंधकृत् २४ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्पिबन् चिंतयानोहृषीकेशमपश्यत्तन्म
यंजगत् २५ भवि

र्गिण्याः २२ किंच सएषजीवन्नपिमृतःस्यात् नृशंसतेनक्रौर्येणयोवर्तेततंजीवंतमेवमनुजाःशपंतिदुर्वाक्यै
र्धिक्कुर्वंति नकेवलमेतावत् सचदेहेमृतेतनुमानिनः पापिनोनरकंगच्छंति अथवाशापप्रकारमेवाह त १॰
नुमानिनोःसदेहेमृतएवअंधंतमोगमिष्यतीति २३ २४ संविशन्शयानः २५

10A रम्याभिर्गीर्भिः वृषणं कामवर्षिणं ऐडयन् स्तुष्टुवुः २५ प्रतिश्रुतं सत्यं कृतमिति निर्दिष्टाः सत्यत्वेनैव तं प्रथमं स्तुवंति
सत्यव्रतमिति सत्यं व्रतं संकल्पो यस्य तं तथा सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तं त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं
प्रलयानंतरं च स्थितिसमये च सत्यं अव्यभिचारेण वर्तमानं तदेवाहुः सत्यस्य योनिमिति सच्छब्देन दृष्टं पृथिव्यप्तेजांसि त्य
च्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपंचकं तत्सत्यमित्याचक्षते इति श्रुतेः तस्य योनिं कारणं अनेन भूतपंच
कात्पूर्वं वर्तमानतोक्ता तथा सत्ये तस्मिन्नेव निहितमंतर्यामितया स्थितं अनेन स्थितिसमयेपि सत्यत्वमुक्तं त

ब्रह्माभवश्रुतत्रैत्यमुनिभिर्नारदादिभिः देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् २५ देवाः सत्य
व्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः २६

त्था सत्यस्य सत्यं तत्रैव सत्यस्य सत्यं पारमार्थिकं तन्नाशेप्यवशिष्यमाणं रूपं अनेन प्रलयेप्यवस्थितत्वेन सत्यं दर्शितं
एवं त्रिसत्यत्वमुपपादितं तथा ऋतसत्यनेत्रं ऋतं च सूनृता वाणी सत्यं च समदर्शनं तथा भगवता व्याख्यास्यमा
नत्वात् सत्यं च समदर्शनं ऋतं च सूनृता वाणी कविभिः परिकीर्तितेति तयोर्नेत्रं नयनं साधनं प्रवर्तकमिति या
वत् एवं सर्वप्रकारेण सत्यात्मकं त्वां भगवन् वयं शरणं प्रपन्नाः प्राप्ताः इति २६ नेतारं।

श्री· भा·द· टी· ११

नत्रभवंतोपिलोकेस्वरामतुल्याएवकिमितिमांशरणंप्रपद्यंते नैवंवाच्यं त्वमेवैकः सर्वेश्वरः सर्वस्रष्टादिकार
णत्वात्वयंतत्वच्छरणाएवलोकादिरूपंद्वैतेचसर्वंत्वद्व्यतिरेकेणनास्तीतिवक्तुंद्वैतप्रपंचंवृक्षत्वरूपकेणनिरूपयं
ति एकायनइति असौप्रपंचश्चादिवृक्षः वृश्च्यतेइतिवृक्षः समष्टिव्यष्टिदेहरूपः कथंभूतः एकायनः एकाप्रकृ
तिरयनमाश्रयोयस्यसः द्वेसुखदुःखेफलेयस्यसः त्रयोगुणामूलानियस्यसः धर्मार्थकाममोक्षाश्चत्वारोरसा

एकायनोसौद्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा स
सत्वगष्टोविटपोनवाक्षोदशच्छदीद्विखगोह्यादिवृक्षः २८

महार
यस्यसः पंचइंद्रियाणिविधाज्ञानप्रकारायस्यसः नवद्वाराणिप्रवृत्तच्छिद्राणियस्यसः षडूर्मयः कोशावा
आत्मानः स्वभावोयस्यसः सप्तधातवस्त्वचोयस्यसः पंचभूतानिमनोबुद्धिरहंकारश्चेत्यष्टौविटपाः शाखाविस्ता
रोयस्यसः नवद्वाराण्यक्षाच्छिद्राणियस्यसः दशप्राणादयः छदापत्राणिविद्यंतेयस्यसः दशच्छदी द्वौ ११
जीवेश्वरौखगौयस्मिन्सद्विखगः २८

त्वक्चर्ममांसमेदोमज्जारुधिरास्थि एते सप्त धातवः

क्षुधा तृषा हर्ष शोक मानापमाना
नि एते षडूर्मयः

11A

एवंरूपस्यसंसारवृक्षस्यसतः कार्यस्यत्वमेकएवप्रसूतिः प्रकर्षेणसूतिर्जन्मयस्मात्त्वं कारणमित्यर्थः त्वं
सन्निधानंसम्यङ्निधीयतेस्मिन्नस्तन्निधानंलयस्थानंत्वमेवानुग्रहश्चअनुगृह्णातीतिपालकइत्यर्थः ननुब्र
ह्मविष्णुरुद्राएवंभूताः प्रसिद्धाः कथमहमितिचेत्तत्राहुः त्वन्माययेतितवमाययासंवृतंपिहितंचेतः ज्ञानंये

त्वमेकएवास्यसतः प्रसूतिस्त्वंसन्निधानंत्वमनुग्रहश्च त्वन्माययासंवृतचेतसस्त्वांपश्यंतिनाना
नविपश्चितोये २९ बिभर्षिरूपाण्यवबोधआत्माक्षेमायलोकस्यचराचरस्य सत्वोपपन्नानिसुखा
वहानिसतामभद्राणिमुहुःखलानां ३० त्वय्यंबुजाक्षाखिलसत्वधाम्निसमाधिनावेशितचेत
सैके त्वत्पादपोतेनमहत्कृतेनकुर्वंतिगोवत्सपदंभवाब्धिं ३१

षांतेत्वामेवनानापश्यंति येतुवि
पश्चितोविद्वांसस्तेतथानपश्यंति २९ ननुदेवकीपुत्रंमांकथमेवंवर्णयथेतितत्राहुः बिभर्षीतिअवबो
धएकस्वरूपआत्मात्वमेवरूपाणिमूर्तीः बिभर्षि धत्से ननुत्वंकस्यापिपुत्रइत्यर्थः क्षेमायपालनाय सा-
त्वोपमंवर्तिनांसुखकराणितथाखलानामभद्राणिनाशकानि ३० नकेवलमेतावद्भक्तानांमोक्षार्थमपी

श्री॰ भा॰द॰ टी॰ १२ 12

त्वयीतित्वयिसमाधिनाआवेशितचेतसानिमित्तेनत्वत्पादपोतेनाश्रितेन एकेमुख्याविवेकिनःमहद्भिःकृते।
नसेव्यतयासंपादितेन यद्वा यदमपिमायामयमित्यनादरंपरित्यज्यपदमेवमहत्त्वोत्कृष्टमितिमनसिकृ
तेनवहुमतेनेत्यर्थः भवाब्धिंवत्सकुर्वंति अनायासेनैवभजनानुनिष्कामानांतुनिष्पादिनीतेषांमुक्तिरित्यर्थः
३। नतुतेनपोतेनचेतरस्वेंपारंगताः तर्हिइदानींतनानांकागतिस्तत्राह स्वयमिति अयमर्थः हेद्युमन्स्वप्रका

स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदा भवत्पदांभोरुहनावमत्रतेनिधाययाता।।
ताःसदनुग्रहोभवान् ३१ येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धवुद्धयः आरुह्यकृच्छ्रे
णपरंपदंततःपतंत्यधोनादृतयुष्मदंघ्रयः ३२

शात्वत्पादपोतसामीप्यमात्रेणभवांवुधौवत्सपदमात्रेजाते तस्मिन्निरपेक्षंस्वयमेवान्येषांभीमंदुस्तरमपिभ
वार्णवंसमुत्तीर्यभवत्पदांभोरुहरूपांनावमत्रैवनिधायभक्तिमार्गप्रदार्थंप्रवर्त्येत्यर्थः पारंयाताः तत्किंय
तःअदभ्रसौहृदाःसर्वभूतेष्वतिप्रीतियुक्ताःअतस्तेषांतरणायनिधायेत्यर्थःकथंमत्पादाश्रयणमात्रेणती
र्णाःअतउक्तंभवान्सदनुग्रहःसतोभक्ताननुगृह्णातीति ३१ १२

12A ननुविवेकिनांकिंमद्भजनेनमुक्तापवद्दिते तत्राहुः येन्यइति विमुक्तमानिनोमुक्तावयमितिमन्यमानाः त्व
य्यस्तोनिरस्तःअतएवासन्योभावस्तस्माद्भक्तेरभावादित्यर्थः नविशुद्धाबुद्धिर्येषांते तथा यद्वा त्वय्यस्त
भाइतिछेदः अस्तभाः अस्तमतयः वादेहेष्वविशुद्धबुद्धयस्तेकृच्छ्रेणबहुजन्मतपसापरंपदंमोक्षसंनिहितं।
सत्कुलतपःश्रुतादिभिःप्राप्याधःपतंतिविघ्नैरभिभूयंते नआहतोयुष्मदंघ्रीयैस्ते ३३ त्वदीयास्तुनकदाचिद
दपिपतंतीत्याहुः तथानतेइति विनायकाविघ्नहेतवः तेषामनीकानिसैन्यानिपांतिपतेषांमूर्द्धसुविच

तथानतेमाधवतावकाःक्वचिद्भ्रश्यंतिमार्गात्त्वयिबद्धसौहृदाः त्वयाभिगुप्ताविचरंतिनिर्भयाविना
यकानीकपमूर्द्धसुप्रभो ३४ सत्वंविशुद्धंश्रयतेभवान्स्थितौशरीरिणांश्रेयउपायनंवपुः वेदक्रिया
योगतपःसमाधिभिस्तवार्हणंयेनजनःसमीहते ३५

रंतिअरिशिरःसुचरंतीत्यर्थः ३४ सतांस्त्वावतारानिरूपाणिधारयसीत्युक्तंविभर्षिरूपाणीतितत्केनप्रकारेणस्वा
वहत्वमित्यपेक्षायामाहुः सत्वंविशुद्धमितिसत्वंवपुःश्रयतेभवानित्यन्वयः श्रेयउपायनंकर्मफलदातृकुतो
येनवपुषाजनस्तवार्हणंपूजांसमीहतेकरोति कैःवेदश्चक्रियायोगश्चतपश्चसमाधिश्चतैश्चतुराश्रमधर्मै
रित्यर्थः वपुषोनाश्रयणेअर्हणासंभवात्नकर्मफलसंभवसिद्धिःस्यादिति ३५

नृजीवार

श्री· भा·द· पू· १३ 13

त्वय्यंबुजाक्षेत्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं तत्र कर्मफलं भक्तिं विना मा भूत् मो
क्षस्तु ज्ञानैकसाध्यत्वात् किं भक्त्येति सानुशयान्प्रत्याहुः सत्वं न चेदिति हे धातः इदं सत्वं निजं तव वपुर्न भवेच्चेत्त
र्हि विज्ञानं विशिष्टमपरोक्षं ज्ञानं न भवेदिति नुषंगः कथंभूतं अज्ञानभिदापमार्जनं अज्ञानं च तत्कृता भिदा च तयो
रपमार्जनं निवर्तकं यद्वा अज्ञानं भिनत्तीत्यज्ञानभित् विज्ञानं मार्जनं श्रापं प्राममेवेति तत्र जडानां तु बुद्ध्यादीनां य

सत्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् गुण
प्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा गुणः ३८

तः प्रकाशकस्तद्रूपस्येति ज्ञानं भवेदेव न गुणप्रकाशैर्गुणावच्छिन्नैः प्रकाशैर्भवान्सर्वसाक्षीस्वगुणः केवलमनुमी·
यते कल्प्यते न तु साक्षात्क्रियते इत्यर्थः अनुमानप्रकारमाहुः प्रकाशते यस्य च येन वा गुण इति यस्य संबंधी अयं बु
द्ध्यादिर्गुणः प्रकाशते यो गुणसाक्षीत्येवं येन वा यं बुद्ध्याधिरूढेन प्रमात्रा बुद्ध्याधिष्ठात्रा वा यो गुणः प्रकाश्यते गा
इत्यनुमीयते इत्यर्थः शुद्धसत्वे वपुषि तव यि सेव्यमाने तु तदाकारेंतःकरणे सत्वतत्प्रसादेन तत्साक्षात्कारो भवेदिति १३

ध्रु: टीका

13A

एवंतावद्भक्तानामभ्युदयापवर्गार्थंरूपाणिविभर्षीत्युक्तं तान्यपिभजनीयानिकेवलंनतज्ज्ञातुंशक्यंते अनंत
त्वादतर्क्यत्वाच्च मनोवचसोरगोचरत्वादित्याह नैनामरूपइति गुणाश्चजन्मानिचकर्माणिचतैर्निरूपितव्ये
निरूपणीयेनभवतः कुतः अनुमेयंवर्त्ममार्गोयस्यतवेति तत्रापिहेतुः अस्यसाक्षिणइति नहिसाक्षिणस्तवमनो
वचोगोचरत्वमित्यर्थः हेदेववदन्त्यथोत्तमानअथापिक्रियायांउपासनादिलक्षणायांत्वांप्रतियांतिउपासकाः साक्षात्प्र

ननामरूपेगुणजन्मकर्मभिर्निरूपितव्येभवतोस्यसाक्षिणः मनोवचोभ्यामनुमेयवर्त्मनोदेवक्रियायांप्र
तियंत्यथापिहि ३६ शृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिचमंगलानिते क्रियासुयस्त्वच्च
रणारविंदयोराविष्टचेतानभवायकल्पते ३७ दिष्ट्याहरेस्याभवतःपदोभुवोभारोपनीतस्तवजन्मने
शितुः दिष्ट्यांकितांत्वत्पदकैःसुशोभनैर्द्रक्ष्यामगांद्यांचतवानुकंपितां ३८ नतेभवस्येशभवस्यका
रणंविनाविनोदंवततर्कयामहे भवोनिरोधःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभयाश्रयात्मनि ३९

प्रयंतीतिहिप्रसिद्धं ३६ तस्माद्भक्त्यैवमोक्षइत्युपसंहरति शृण्वन्निति अन्यानपिसंस्मारयन् क्रियासुदेवार्चनादिक
र्मसु ३७ विशेषतः श्रीकृष्णावतारमभिनंदति दिष्ट्येतिदिष्ट्याभद्रंतवपदःपदभूतायाः ईश्वरस्यतवजन्ममात्रे
णापनीतएव किंचत्वत्पदकैःकोमलैःपदैःसुशोभनैःवज्रांकुशादिशुभलक्षणैःगांपृथ्वींद्यांस्वर्गंचतवत्वयानुकं

१५

श्री० तवजन्मनाभारोऽपनीतइत्युक्तामममापिकिंजीवत्वसंसारउक्तः नहिनदीस्याऽऽः नतेइति यतदेहेशाश्वसंसारिणस्ते

भा० द० जन्मनःकारणंक्रीडांविनानतर्कयामः किंचदेहेश्रभयाश्रयनभयमाश्रयतीतितथासंबोधनंदेहेनित्यमुक्तेस्यर्थः त

टी० वजन्मकारणंनास्तीतिकिंवक्तव्यं यतोजीवात्मन्यपिभवादयस्त्वयिविषयेयाःविघातयाकृतानपरमार्थतःसंती

१४ ति ४१ प्रस्तुतंप्रार्थयंते मत्स्याश्वेतिनःअस्मांस्त्रिभुवनंचअन्यदायथापासितथाधुनापिपाहीति वंदनेतेइतिवंदे

मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यविप्रविबुधेषुकृतावतारः त्वंपासिनस्त्रिभुवनंचतथाधुनेश

भारंभुवोहरयदूत्तमवंदनंते ४१ दिष्ट्यांबतेकुक्षिगतःपरःपुमानंशेनसाक्षाद्भगवान्भवायनः माभूद्भ वा१

यंभोजपतेर्मुमूर्षोर्गोप्तायदूनांभविताततवात्मजः ४२ मुकंदः इत्यभिष्टूयपुरुषंयद्रूपमनिदंयथा ब्र प२

ह्मेशानौपुरोधायदेवाःप्रतिययुर्दिवं ४३ इतिश्रीभागवतेदशमस्कंधेगर्भगतस्यविष्णोःकृताब्रह्मेशस्तु

तिर्द्वितीयोध्यायः २

नः सर्वेषितोभिःप्रणमंति ४१ देवकींप्रत्याऽऽहुः दिष्ट्येति नोस्माकंभवा

योद्भवायसाक्षात्परःपुमांस्तेकुक्षिगतः अतोभयंमाभूदिति अन्येषामपिचेतत्कुक्षिंहृदयंगतोहरिर्भवति तेषांभ

यंनभवतीतिकुतस्तव ४२ यस्यरूपमनिदंसर्वप्रत्यग्भूतंयथायथावत् अस्मान्वचयित्वापतातिहस्याप्सितेइ १४

तिमन्यमानाब्रह्मेशानौपुरोधायपुरतःकृत्वाययुरिति ४३ इतिदशमेद्वितीयः २

ॐत्ततीयेनिजरूपेणसंभूतस्तद्धरिः स्वयं पितृभ्यांसंस्तुतोनीतः पित्राभीतेनगोकुलं अथेति मंगलार्थंयदा
यर्हिसर्वगुणोपेतःकालोवभूव तदादेवकृताविस्तराविरासीदित्यष्टमश्लोकगतेनान्वयः परमशोभनत्वमेवा
ह यर्ह्येवेत्यादिनाअजनोनारायणस्तस्माज्जन्मयस्यप्रजापतेस्तस्यऋक्षंतंरोहिणीनक्षत्रं कथंभूतं शांतानिऋ
क्षाणिअश्विन्यादीनिग्रहाश्चतारकाश्चयस्मिन्ततयर्हीतिसर्वत्रानुषज्यते १ निर्मलानामुडुगणानामुदयोय

शुकउवाच अथसर्वगुणोपेतःकालःपरमशोभनः यर्ह्येवाजनजन्मर्क्षंशांतर्क्षग्रहतारकं १ दिशः
प्रसेदुर्गगनंनिर्मलोडुगणोदयं महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २ नद्यःप्रसन्नसलिलाह्रदा
जलरुहश्रियः द्विजालिकुलसन्नादस्तवकावनराजयः ३ ववौवायुःसुखस्पर्शःपुण्यगंधवहःशु
चिः अग्नयश्चद्विजातीनांशांतास्तत्रसमिंधत ४ मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहां जायमा र्य
३ नेजनेतस्मिन्नेदुर्दुंदुभयोदिवि ५ जगुःकिंनरगंधर्वास्तुष्टुवुःसिद्धचारणाः विद्याधर्यश्चननृतुरप्सरोभिः
समंतदा ६ मुमुचुर्मुनयोदेवाःसुमनांसिमुदान्विताः मंदंमंदंजलधराजगर्जुरनुसागरम् ७

स्मिन् तत्रत्या मंगलभूयिष्ठाःपुरादयोयस्यांसा २ प्रदक्षिणार्चयजलरुहैःश्रीःशोभायेषांते द्विजालिकुलानांसं
नादायेषुतेस्तवकायासांताः ३ समिंधतप्रज्वलितास्तेभ्रमोद्रहितैः प्रदक्षिणार्चिषः समैंधतेतिसमयरीमावभूवुरित्यर्थः
४ असुरद्रुहांकंसादिव्यतिरिक्तानां सर्वप्राणिनांदेवानांचेतिवा अजनेजायमानेआसन्नःप्रसवोयस्मिंस्तस्मिन्स

नंपरिष्वक्तसहस्रकुंतलंकिरीट २

15

श्री॰ यथायथावतऐश्वर्येणचरूपेणविष्णुराविरासीत्प्रकटीबभूवप्राच्यांदिशिपूर्णश्चंद्रइव ८ तमद्भुतंबालकंव
भा॰द॰ सुदेवऐक्षतेतित्रिभिःतियश्लोकस्यैनान्वयः अद्भुतत्वेहेतुगर्भाणिविशेषणानि अंबुजेक्षणमित्यादीनि श्रीव॰
टी॰ वत्सोलक्ष्मलांछनंयस्यतंगलेशोभतेगलशोभीकौस्तुभोयस्मिन्कुंडलादीनांत्विषास्फुरदपरिमितकेशंउ

१५

निशीथेतमसोद्भूतेजायमानेजनार्दने देवक्यांदेवरूपिण्यांविष्णुः सर्वगुहाशयः आविरासीद्य
थाप्राच्यांदिशींदुरिवपुष्कलः ८ तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधम् श्री
वत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगं ९ महार्हवैडूर्यकिरीटकुंडलत्विषाप
रिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्विरोचमानंवसुदेवऐक्षत १० सविस्मयो॰
त्फुल्लविलोचनोहरिंसुतंविलोक्यानकदुंदुभिस्तदा कृष्णावतारोत्सवसंभ्रमोस्पृशन्मुदाद्विजे॰
भ्योयुतमाप्लुतोगवाम् ११ अथैनमस्तौदवधार्यपूरुषंपरंनतांगः कृतधीः कृतांजलिः स्वरोचिषा
भारतसूतिकागृहंविरोचयंतंगतभीःप्रभाववित् १२

तयोर्थः ९ विस्मयेनउत्फुल्लेविशिष्टेलोचनेयस्यसः गवामयुतंदशसहस्राणिमस्पृशत्मनसादत्तवान्कं॰
संनिगृहीतस्यदानासंभवात्विस्मयेहेतुः कृष्णावतारेतिमुदाआप्लुतोव्याप्तःस्नातइतिवा ११ कृतधीःशुद्धबु

श्री॰ टी॰ १५ १५

15A

वसुदेवः प्रथमंपुत्रबुद्ध्याःपश्यन् तांपरित्यज्याह अहोविदितोसीतिकथंविदितोस्मि भवान्प्रकृतेःपरः
पुरुषइति ननुकिमत्राश्चर्यं पुरुषस्यप्रकृतेरन्यत्वादेवेति अतआह साक्षादिति प्रत्यक्षइत्यर्थः ननु
अतरान्निकृष्टः प्रत्यक्तत्तउपलभ्यते किंचिद्रूपमिति अतआह केवलेतिकेवलश्चासावनुभवश्चआनंद
श्च तावदेवस्वरूपंयस्यसः किंचसर्वबुद्धिदृक् नत्वेवंभूतोदृश्योभवतीत्यर्थः १३ ननुदेवकीजठरे
प्रविष्टस्यमेकिमियमतिस्तुतिः क्रियतेअतआह सएवेति सएवोक्तस्वरूपएवत्वंनदेवकीजठरेप्रवि

वसुदेवउवाच विदितोसिभवान्साक्षात्पुरुषःप्रकृतेपरः केवलानुभवानंदस्वरूपःसर्वबुद्धिदृ
क् १३ सएवस्वप्रकृत्येदंसृष्ट्वाग्रेत्रिगुणात्मकं तदनुत्वंह्यप्रविष्टः प्रविष्टइवभाव्यसे १४
यथेमेविकृताभावास्तथातेविकृतैःसह नानावीर्याःपृथग्भूताविराजंजनयंतिहि १५

ष्टइत्यर्थः ननुविश्वंसृष्ट्वातदनुप्रविष्टस्यकिमेतदरू अतआह स्वप्रकृत्येति स्वमाययासृष्ट्वा तदनुत्व
मप्रविष्टएवेतिननुकथ्यतेतर्हिश्रुत्याचतेनतत्सृष्ट्वातदेवानुप्राविशदिति अतआह प्रविष्टएवेति भा
व्यसे निरूप्यसे प्रत्यक्ततोवासद्रूपेणप्रविष्टइवलक्ष्यसे १४ अत्रदृष्टांतो यथेति इमेविकृताभावाम
हदादयोयथानथेति सदृष्टांतंविवृणोति तेविकृतैरिति तेहिविकृतैःषोडशविकारैःसहसन्निपत्य मिलित्वा
विराजंजनयंति ब्रह्मांडमुत्पादयंति सन्निपतनेहेतुः यतःपृथग्भूताःसंतःनानावीर्याविशिष्टकार्यस

मर्त्यानमंवंशितः १५

16

श्री॰ सन्निपत्येति सन्निपत्य समुत्थाय घां॰ नुगताः प्रविष्टा इव दृश्यन्ते महदादयः न पुनः प्रविष्टाः कुतः उत्पत्तेः प्रा
भा॰ह॰ गेव कारणतया विद्यमानत्वात् न तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति वा न तु तेषां कार्ये प्रवेशः
ह॰ कथं कल्प्यते कार्ये चेदवाभिनवास्ति तत्र जायत इति किं न स्यादिति चेत्तत्राह प्रागेवेति कार्योत्पत्तेः प्रा
१९ गेव तेषां भूतानामिह कार्ये संभवः १९ दार्ष्टान्तिके निदिशति एवं भवानिति न तु यथाहमप्रच्युतस्वरू
प एव कारणतया कार्ये प्रवर्ते तर्हि तेष्विंद्रियैर्गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह बुध्यनुमेय॰

सन्निपत्य समुत्थाय दृश्यन्तेऽनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह
संभवः १९ एवं भवान्बुध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैस्सन्नपि तद्गुण
ग्रहः अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः २०

लक्षणैरिति बुद्ध्यादिसाध्यानुमेयं लक्षणं स्वरूपं येषां तैरिंद्रियैः ग्राह्यैर्गुणैः सह सन्नपि वर्तमानोऽपि त
द्गुणाग्रहः तैर्गुणैः सह न गृह्यसे अयं भावः न हि ग्राह्यैः सह भावमात्रं ग्रहणे कारणं किं त्विंद्रियाणां शक्तिः
सा च कार्यैकसमधिगम्या यथा कार्यमेव कल्प्यते अतो यथावस्तु यावद्रूपग्रहणे रसादिग्रहणं नास्ति न चैवं वि
षयग्रहणे तद्ग्रहणमपीति अविषयत्वेन च विषयग्रहणानंतरं न तद्ग्रहणमुक्तमेव सर्वबुद्धिदृगित्यत्र एवं तावत्प्रागेव १६
विद्यमानत्वात्प्रवेशो नास्तीत्युक्तं किंच परिच्छिन्नस्य नीडपक्ष्यादेरिव प्रवेशो भवेत् ॥ नं

16A

तवत्वनाहतत्वाद् परिछिन्नत्वेनवहिरंतरभेदोनास्तिकुतः प्रवेशइत्याह अनाहतत्वादिति अनाहतत्वे हेतुमा
ह सर्वस्येति नहिसर्वस्य स्वरूपस्यान्यदावरकमस्तिसर्वात्मनः नह्येकेनाहतोन्यस्यात्माभवेत् आत्मवस्तुनइति
आत्मनोवस्तुनश्चेतिहेतुद्वयं अतसातत्यगमनेइत्यस्मात् अततिव्याप्नोतीत्यात्मानहि नहिव्यापकस्यावरणंघ
टतेतथावस्तुनःपरमार्थस्यवस्तुन आवरणंनघटतेइत्यर्थः तस्मात्तवांतर्यामितया पिनप प्रवेशोनत्रस्वो
स्तिजनन्यांगर्भेप्रवेशः अतःकेवलात् भवानंदस्वरूपएवत्वंविदितोसीत्याश्चर्यंममभाग्यमित्यर्थः ९ नन्वे

य आत्मनोदृश्यगुणेषुसन्निति व्यवस्यतेस्वव्यतिरेकतोबुधः विना
नुवादंनचतन्मनीषितंसम्यग्यतस्त्यक्तमुपाददत्पुमान् १८

तदेतत्तवतदृश्यंप्रपंचस्यावस्तुत्वंनैवघटेत तत्तुनसंभवतिसत्यत्वेनप्रतीतेरित्याशंक्याह यइति आत्मनोदृश्येषुगुणे
षुदेहादिषुस्वव्यतिरेकतः आत्मव्यतिरेकेणपृथक्सन्नयंदेहादिरितिव्यवस्यतेनिश्चिनोतियःपुमान्सःअबुधः
अविद्वान्व्यतिरेकादर्शनात्किंचमनीषितंविचारितंसत्देहादिसर्वंयतोविनानुवादंवाचारंभणमात्रंविनान
सम्यक्भवति अतोवस्तुत्वेनव्यक्तंबाधितमेववस्तुबुद्ध्याउपाददत्स्वीकुर्वन्नबुधइत्यर्थः १९

17

श्री॰ एवंदृश्यस्यतद्व्यतिरेकेणसत्वमुक्तं परमेश्वरोपादानत्वादपितद्व्यतिरेकेणासत्वमित्याह त्वत्तोऽस्येति नन्वेवं
भा॰द॰ वंसत्यपिविकारित्वमाह अनीहादिति अगुणत्वादनीहत्वंततोविकारित्वमित्यर्थः नन्वनीहत्वेकथंकर्तृत्वे
पू॰ कर्तृत्वेवाकुतोविकारित्वंतत्राह त्वयीश्वरइति ब्रह्मत्वादविकारित्वमीश्वरत्वाच्चकर्तृत्वमितिनन्वेतदपिविरु
१२ द्धमेवनेत्याह तदाश्रयत्वादिति गुणैःकुर्वद्भिस्त्वयिसृष्ट्यादिकर्तृत्वमुपचर्यतेगुणाश्रयत्वात्यथाभृत्यकृतं

त्वत्तोऽस्यजन्मस्थितिसंयमान्विभोवदंत्यनीहादगुणादविक्रियात् त्वयीश्वरेब्रह्मणिनोविरुध्यते
तदाश्रयत्वादुपचर्यतेगुणैः १९ सत्वंत्रिलोकस्थितयेस्वमाययाबिभर्षिशुक्लंखलुवर्णमात्मनः सर्गा
यरक्तंरजसोपबृंहितंकृष्णंचवर्णंतमसाजनात्यये २० त्वमस्यलोकस्यविभोरिरक्षिषुर्गृहेऽवतीर्णो
सिममाखिलेश्वर राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानानिहनिष्यसेचमूः २१

राजनीति १९ एवंभूतस्यैवतववयथाविश्वस्थितिलयसर्गार्थंत्रिवर्णागुणावताराः एवमयंभूभारापनयनार्थ
मितिज्ञातव्यमित्याह सत्वमितिश्लोकद्वयेन २० रिरक्षिषुरवतीर्णोसि कृष्णेनवर्णेन अतःसाधूनांरक्षणा २०
र्थंराजन्यसंज्ञायेअसुरकोटियूथपास्तैर्निर्व्यूह्यमानाइतस्ततश्चाल्यमानाश्चमूःसेनानिहनिष्यसेसंहरिष्यसि २१

17A किं तत्प्राप्य प्रमत्तेन त्वया भाव्यमित्याह अयमिति असभ्यः खलः समर्पितं कथितं अभिसरत्यागमिष्यति २२ उपा
धावद्दैत्येन्द्र २३ त्वयि भयशंकैव तावन्नास्ति इति श्लोकचतुष्टयेनाह देवकी किंचिद्वित्तापयितुं रूपमिति यन्न त
किमपि त्र्यं वस्तु षाड्वेदाः किं तद्वस्तु तदाह अव्यक्तं अत्र हेतुः आद्यं कारं किं परमाणवः न ब्रह्मत्त्व हतत् किं प्र
धानं न ज्योतिः चेतनं किं वैशेषिकाणामिव त्तानगुणेन निर्गुणं किं मीमांसकानामव ज्ञानपरिणामि न निर्वि

अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर सतेऽवतारं पुरुषैः स
मर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः २२ श्रीशुक उ० अथैनमात्मजं वीक्ष्य महापुरुष
लक्षणं देवकी तमुपाधावत्कंसाद्भीता सुविस्मिता २३

कारं किं पुरुषगतादीनामिव शक्तिविक्षेपेण परिणामि न सत्तामात्रं तर्हि किं सामान्यं न निर्विशेषं तर्हि किं का
रणत्वात् सक्रियं न निरीहं सन्निधानमात्रेण कारणं एवंभूतं किमपि कार्यकल्पं यद्वस्तु स एव त्वं साक्षाद्विष्णुरि
ति अपरोक्षत्वेत्याह अध्यात्मदीप इति बुद्ध्यादिकारणसंघातप्रकाशक इत्यर्थः अपि वा अव्यक्तं न केनापि
प्रकारेण व्यज्यत इत्यव्यक्तं कथं तर्हि तावद्व्यज्यत इत्याह आद्यं सर्वस्य कार्यस्याद्यं अनादीत्यर्थः

18

श्री॰ तथा ब्रह्मज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः पदैर्निर्देशेन प्रकाशेन च गुणेन च विकारेण च व्यक्तिं निराकारो
ति तथा सत्तामात्रमिति विशेषणं निर्विशेषमिति सामान्येन निरीहमिति क्रियया च व्यक्तिं निराकरोति अन्यत्स
भा॰ द॰ मानं एवंभूतस्त्वं न वमयशंकेति भावः २४ किंच महाप्रलयेप्यवशिष्यमाणस्य कुतो लय इत्याह नष्टे लोक इ
पू॰ ति चराचरे लोके महाभूतेषु लीनेषु तेष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु तस्मिन्नपि व्यक्ते अव्यक्ते प्रधाने प्राप्ते अशे
१८

देवक्युवाच रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं स त्वं
साक्षाद्विष्णुरध्यात्मदीपः २४ नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु व्यक्तेःव्यक्तं का
लवेगेन याते भवानेकः शिष्यते शेषसंज्ञः २५ योयं कालस्तस्य तेव्यक्तबंधो चेष्टामाहुः चेष्टते येन वि
श्वं निमेषादिर्वत्सरांतो महीयान् तं त्वेशानं क्षेमधाम प्रपद्ये २६

षात्मके प्रधाने संज्ञाप्रज्ञायस्य एवमपि
लीनमिदमस्ति पश्चादेवमुद्बोधनीयमिति समग्रशेषसंज्ञः शेषसंज्ञ इति वा २५ किंच एवं प्रलयहेतुर्योयं कालः प्र
वं हे अव्यक्तबंधो प्रकृतिप्रवर्तक तस्य प्रलयावधिभूतस्य ते तव चेष्टां लीलां चेष्टते विपरिवर्तते पुनःपुनर्वत्सराह
सामहीयान् द्विपरार्धरूपः यस्य तस्य चेष्टामाहुः तं त्वा त्वां क्षेमधाम अभयस्थानं प्रपद्ये शरणं व्रजे २६ १०

1817 तेमयामृत्युमेवाहमर्त्यइति लोकान्प्रतिनिर्भयंपदंप्राप्ययदृच्छयाकेनापिभाग्योदयेनहेआद्य २७ सत्वंत्राय
यतिसत्वमिति त्रस्तानोवित्रासंहरतीति भृत्यवित्रासहाभृत्यविदितिवाछेदः पौरुषमैश्वर्यंध्यानधिष्ण्यंध्यानास्पदंमां
सदृशांमांसचक्षुषांप्रत्यक्षंमाकृथा २८ भवतएवहेतोर्निमित्तभूतात्कंसात्समुद्विजेबिभेमि यतःअधीरचित्ता २९

मर्त्योमृत्युव्यालभीतःपलायन्सर्वांल्लोकान्निर्भयंनाध्यगच्छत् त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थः
शेतेमृत्युरस्मादपैति २७ सत्वंघोरादुग्रसेनात्मजान्नःपाहित्रस्तान्भृत्यवित्रासहासि रूपंचेदंपौरुषं
वं२ ध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृशांकृषीष्ठाः २८ जन्मतेमय्यसौपापोमाविद्यान्मधुसूदन समुद्विजेभव
द्धेतोःकंसादहमधीरधीः २९ उपसंहरविश्वात्मन्नदोरूपमलौकिकं शंखचक्रगदापद्मश्रियाजुष्टं
चतुर्भुजं ३० विश्वंयदेतत्स्वतनौनिशांतेयथावकाशंपुरुषःपरोभवान् बिभर्तिसोयंममगर्भगो
भूदहोनृलोकस्यविडंबनंमहत् ३१

३० किमित्युपसंहर्तव्यंरूपमीदृशं एवंभूतदिव्याद्भुतरूपेणमयापुत्रेणत
तवमदतीशत्वात्कंसादितित्राह विश्वमिति निशांतेप्रलयावसानेयथा
वकाशमसंकोचतः असंभावितत्वाद्गुपहास्यतैवस्यादित्यर्थः ३१

चतुर्भुजरूपेण आविर्भावे कारणं तावदाह त्वमेवेत्यादिना चतुर्दशभिः पूर्वसर्गे प्रथमजन्मनि अभूः आसीः पृश्नि
नाम स्वायंभुवे मन्वंतरे अयं वसुदेवः सुतपा नाम ब्रह्मणः पुत्र आसीत् ३२ तेपाथे तपः कृतवंतौ ३३ ३४ तयोः

श्रीभगवानुवाच त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति तदायं सुतपा नाम प्रजापतिरकल्मषः ३२
युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः संनियम्येंद्रियग्रामं तेपाथे परमं तपः ३३ वर्षवातातपहि
मघर्मकालगुणाननु सहमानौ श्वासरोधविनिर्धूतमनोमलौ ३४ शीर्णपर्णानिलाहारावुपशांते
नचेतसा मत्तः काममभीप्संतौ मदाराधनमीहथुः ३५ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करं दिव्यव
र्षसहस्राणि द्वादशेयुर्मदात्मनोः ३६ तदा वां परितुष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या
च हृदि भावितः ३७ प्रादुरासं वरदराड् युवयोः कामदित्सया व्रियतां वर इत्युक्ते माहृशो वां वृतः सुतः ३८

तोः तपस्याचरतोः ईयुः गतानि मदात्मनोः मच्चित्तयोः ३६ अमुना वपुषा प्रादुर्भूतोऽस्मि ३७ वरदानां वरदेषु श्रेष्ठ
इत्यर्थः तेन मत्कृतदरेण वारं वारमाविर्भावे कारणमुक्तं माहृशो मत्सदृशः कामस्य दित्सया दातुमिच्छया माहृशो

20

श्री· यदि किं मा हि भेषि तर्हि मां गोकुलं नय यशोदायाः कन्यां मन्मायामानयेति प्रथममेव भगवता प्रचोदितो वसुदे

भा·द· वो यदा गंतुमैच्छत् तदैव प्रजापिपा योगमाया सानंदजायया निमित्तमात्रभूतया अजनि जाता प्रबोधित इति पाठः

पु· ४७ हृताः प्रत्यया यथाः सर्वा वृत्तयो येषां अथवा हृताः प्रत्ययाश्चन्याश्च सर्वा वृत्तयो येषां जाग्रतामपि तथा भूते

२०

शुक उवाच इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः

४६ ततश्च शौरिर्भगवत्प्रणोदितः सुतं समादाय स सूतिकागृहात् यदा बहिर्गंतुमियेष तर्ह्यजा या

योगमायाजनि नंदजायया ४७ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ द्वारस्तु

सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४८ ताः कृष्णवाहे वसुदेव आगते स्वयं व्यशी

र्यंत यथा तमो रवेः ववर्ष पर्जन्य उपांशुगर्जितः शेषोन्वगाद्वारि निवारयन् फणैः मघोनि वर्षत्य

सकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रि

यः पतेः ५०

दुर्द्वारपालेषु सत्सु कपाटेषु लोहकीलकयुक्तैः शृंखलैर्बृहद्भिः कवाटादिभिर्दुरत्यया

इति वा ४८ स्वयमेव व्यशीर्यंत विवृता इत्यर्थः व्यशीर्यंतेति वक्तव्ये गुणाच्छांदसः रवेर्निमित्तं ४९ गंभी

रो यस्तोयौघस्तस्य जवेन य ऊर्मयस्तैः फेनिला फेनवत्यामाभयानकैरावर्तशतैर्व्याप्तापि श्रियः पतेः सीतापतेः २०

वहन्त

13A

मेमत्तोपियुवामपवर्गंनवव्राथेनवृतवंतौ ३९ वरंदत्वामय्यधिगते सत्यग्राम्यान्विषयान्भुंक्तवंतौ अदित्यां
कश्यपाद्वामनआसेतियत्तदपितद्रूपयोर्युवयोरहमेवपुनरासमित्यर्थः ४० ४१ हेसत्यपतिव्रते ४२ प्रा

अजुष्टग्राम्यविषयावनपत्यौचदंपती नवव्राथेपवर्गंमेमोहितौदेवमायया ३९ गतेमयियुवां
लब्ध्वावरंमत्सदृशंसुतं ग्राम्यान्भोगानभुंजाथांयुवांप्राप्तमनोरथौ ४० अदृष्ट्वान्यतमंलोकेशी
लौदार्यगुणैःसमं अहंसुतोवामभवंपृश्निगर्भइतिश्रुतः ४१ तयोर्वांपुनरेवाहमदित्यामासकश्य
पात् उपेंद्रइतिविख्यातोवामनत्वाच्चवामनः ४२ तृतीयेस्मिन्भवेहंवैतेनैववपुषाथवं जातोभूय युवां
तं स्तयोरेवसत्यंमेव्याहृतंसति ४३ एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे नान्यथामद्भवंज्ञानंमर्त्यलिं
गेनजायते ४४ युवांमांपुत्रभावेनब्रह्मभावेनवासकृत् चिंतयंतौकृतस्नेहौयास्येथेमद्गतिंपरां ४५

कृपयमंतावदेतद्वां मेजन्मेतिस्मरणायज्ञानाय दर्शितं अन्यथामर्त्यलिंगेनमनुष्यशरीरेणमद्भवंमद्विषयं
ज्ञानंनजायते अनंतरंत्वदिच्छयावालोपिभविष्यामीतिभावः ४४ ननुत्वयिप्रसन्नेपि किमित्यावयोःपुनः
पुनर्जन्मेति अतःपरंनभविष्यतीत्याह युवामिति ४५

२०/१

निद्रयाग्रजया ५१ प्रतिमुच्यवधापदोः पादयोर्लोहं निगडं ग्रास्तेस्म ५२ जातं किंचिदिति केवलमबुध्यत

५६

नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया सुतं यशोदाशयने नि
धाय तत्सुतामुपादाय पुनर्गृहानगात् ५१ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां
प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ५२ यशोदा नंदपत्नी च जातं परमबुध्यत
न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ५३ इति श्रीभागवते महापुराणे दशमस्कं
धे श्रीकृष्णजन्मनि तृतीयोऽध्यायः ३ शुक उवाच बहिरंतःपुरद्वारः सर्वाः पूर्वव
दावृताः ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः १

ननु पुत्रः कन्या वेति योगनिद्रया च मोहितेति ५३ इति दशमे तृतीयः ३ चतुर्थे चंडिकावाक्यमाकर्ण्य
ति भयाकुलः उर्मेर्विभिर्हितं मेने कंसो बालादिहिंसनम् १

तत्रस्पष्टमन्तम् २ कालोमृत्युः ३ ४ ५ अंगहेभ्रातः पावको ६ दीनदीनवत्दीनादपिदीनावत् ननुतथा

तेतत्तूर्णमुपव्रज्यदेवक्यागर्भजन्मतत् आचख्युर्भोजराजाययदुद्विग्नः प्रतीक्षते २ सतल्पा
त्तूर्णमुत्थायकालोयमितिविह्वलः सूतीगृहमगात्तूर्णंप्रस्खलन्मुक्तमूर्द्धजः ३ तमाहभ्रातरंदेवी
कृपणाकरुणंसती स्नुषेयंतवकल्याणस्त्रियंमाहंतुमर्हसि ४ बहवोहिंसिताभ्रातःशिशवः
पावकोपमाः त्वयादैवनिसृष्टेनपुत्रिकैकाप्रदीयतां ५ नन्वहंतेह्यवरजादीनाहतसुताविभो
दातुमर्हसिमंदायाअंगेमांचरमांप्रजां ६ शुकउवाच उपगुह्यात्मजामेवंरुदंत्यादीनदीनवत्
याचितस्तांविनिर्भर्त्स्यहस्तादाचिच्छिदेखलः ७

पुत्रस्यात्प्रनीतत्वात्स्वयोगमायेतिज्ञातत्वात् याचितोपिआचिच्छिदेआक्षिप्यजग्राह ७

अपोथयत्तद्बलेनविक्षेप ८ सएवदेवीभूत्वा ९ ११ कृपणानिति अन्यान्शिशून्हनिष्यतीतिज्ञात्वावारय

तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुतां अपोथयच्छिलापृष्ठेस्वार्थोन्मूलितसौहृदः ८ सातद्
स्तात्समुत्पत्यसद्योदेव्यंबरंगता अदृश्यतानुजाविष्णोः सायुधाष्टमहाभुजा ९ दिव्यस्रगंबरालेपर ब
त्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारणगंधर्वैरप्सरःकिन्नरो
रगैः उपाहृतोरुबलिभिःस्तूयमानेदमब्रवीत् ११ किंमयाहतयामंदजातःखलुतवांतकृत्
यत्रक्वचित्पूर्वशत्रुर्माहिंसीःकृपणान्वृथा १२ शुकउवाच इतिप्रभाष्यतंदेवीमायाभगवती
भुवि बहुनामनिकेतेषुबहुनामाबभूवह १३

ति पाठांतरेत्वमामांकृपणांवृथा अहिंसीःहिंसितवानसीति १२ बहुनामनिकेतेषुवाराणस्यादिस्थाने
षुबहुनामादुर्गाकामाक्षीत्यादि १३

२२
श्री० परमविस्मितः कथंदेवीवागन्यथाजातेति १४ हेभामभगिनीभर्तः पुरुषादोराक्षसोयथास्वापत्यमेवहिन
भा०द० स्तितद्वत् जीवन्नपिमृतोहं १६ १० हेमहाभागौस्वकृतंभुजः स्वारब्धकर्मभोक्तन् किंच जंतवःप्राणि
स्कं० १५
२२

तयाविदितमाकर्ण्यकंसः परमविस्मितः देवकीवसुदेवंचविमुच्यप्रश्रितोब्रवीत्
१४ कंसउवाच अहोभगिन्यहोभामम यावांवतपाप्मना पुरुषादइवापत्यंवह
वोहिंसिताःसुताः १५ सत्वहंत्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः कांल्लोका
न्वैगमिष्यामिब्रह्महेवमृतःश्वसन् दैवमप्यनृतंवक्तिनमर्त्याएवकेवलं य
द्विश्रंभादहंपापः स्वसुर्निहतवान्शिशून् माशोचतंमहाभागौस्वात्मजा
न्स्वकृतंभुजः जंतवोनसदैकत्रदैवाधीनाःसहासते १८

२२
नःसदानसदासते किंत्वअल्पकालमेवतदप्यपकत्रनासते किंतुवियुज्यंते यतोदैवाधीनाः १८

22A

सदानासतत्इत्यनेनयदुक्तंजन्ममरणादितदपिदेहानामेवनात्मनइत्याह भुवीति भूतानिदेहाएवायांतिअपयां
तिचभवंतिचनभवंतिचेत्यर्थः यथाभुविभौमानिघटादीनितद्वत् एतेषुभूतेषुजन्मादिभिर्विक्रियमाणेष्वपि
अयमपरोक्षतयाप्रतिभिज्ञायमानोनात्माविपर्यायेतिविपर्ययंविक्रियांनप्राप्नोति एकरूपएववर्ततइत्यर्थः
भौमेषुविक्रियमाणेषुयथाभूस्तथेति १९ एवंविचार्यमाणेसतिनशोकाद्यवकाशः अज्ञानतस्तुनिवर्त

भुविभौमानिभूतानियथायांत्यपयांतिच नायमात्मातथैतेषुवि
पर्य्येतियथैवभूः १९ यथानेवंविदोभेदोयतःआत्मविपर्ययः
देहयोगवियोगश्चसंसृतिर्नेनिवर्तते २०

तेइत्याह यथेति यथाअनेवंविदः एवंअजानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति यतोविपर्ययाद्भेदोभ
वति देहाहंकारेणस्वात्मनिपरिछिन्नेसतीदमहंकारास्पदंभिन्नंभवति यतोभेदाद्देहात्पुत्रादिदेहैर्योगश्चवि
योगश्चततसंसृतिः सुखदुःखेइतियावदज्ञानेननिवर्ततइत्यर्थः २० एवमुक्तप्रकारेणतेनैतेनत्ववतनयाः
अहंततावत्त्वावद्यानिततवान् तथाप्यज्ञानदृष्यास्ततनयात्मयाव्यापादितानपिमानुशोचतेतिसांत्वयति त

२३ अज्ञानाश्रयमेव कर्मवादमाह यत इति कथं तर्हि ब्रह्मणादिदृष्टं ततः तद्वधस्य प्रायश्चित्तश्रवणं अज्ञानमूल
श्री॰ मेवेत्याह यावदिति अस्वदृक् देहाभिमानी बाध्यबाधकतां प्राप्नोतीति तदभिमानी तस्य देहस्य हननमात्म
भा॰ द॰
सु॰
२३

तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि मानुशोच यतः सर्वः स्व
कृतं विंदतेवशः २१ यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेस्वदृक्
तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् २२ क्षमध्वं मम दौरात्म्यं
साधवो दीनवत्सलाः इत्युक्त्वाश्रुमुखः पादौ स्यालः स्वस्रोरथाग्रही
त् २३

न्यभिमन्यमान इत्यर्थः २२ स्यालः कंसः स्वस्रोरिति स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगुणद्वारा मिथु
नलक्षणया स्वसृतत्पत्योरभिधानं लिंगसमवायेन प्राणभृत उपादधातीतिवद्देवकीवसुदेवस्य च प्रत्ये २३
कं पादमग्रहीदित्यर्थः स्यालशब्देन वा कथंचिद्वसुदेवाभिधानं २३

२३१

आत्मसौहृदं प्रियवचनादिना दर्शयन् २४ २५ स्वपरभेददर्शने किं भवति तदाह भावैरेव निमित्तभूतैर्मिथो
भावान् घ्नंतं भावमीश्वरं पृथक्दृशस्तेन पश्यंति किं त्वहमेव हंता हतश्चेति मन्यंत इत्यर्थः २७ विशुद्धं यथा

मोचयामास निगडान्विस्रब्धः कन्यकागिरा देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं २४ भ्रातुः
क्षांतरोषा समनुतप्तस्य क्षांतरोषा च देवकी व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह २५ वसुदेव उवाच एवमे
तन्महाभाग यथा वदसि देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६ शोकहर्षभयद्वेष
लोभमोहमदान्विताः मिथो घ्नंतं न पश्यंति भावैर्भावं पृथक्दृशः २७ श्रीशुक उ॰ कंस एवं प्रसन्नाभ्यां
विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोविशद्गृहं २८ तस्यां रात्र्यां व्यतीतायां कंस आहू
य मंत्रिणः तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया २९ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः देवा
न्प्रति कृतामर्षा दैतेया नातिकोविदाः ३० एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च
हनिष्यामोद्य वै शिशून् ३१ किमुद्यमैः करिष्यंति देवाः समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनु
षस्तव ३२ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः जिजीविषव उत्सृज्य पलायनपरा ययुः ३३

भवति तथा २८ २९ नातिकोविदा दृष्टमात्रमनयः ३० न निर्गतानि दशदिनानि येभ्यस्तान् अन्यांश्च दशाहादूर्ध्वं
३१ ३२ अस्यतो विध्यतः बाणान् क्षिपतः उत्सृज्य रणं त्यक्त्वा ३३

२४

श्री॰ भा॰द॰ पु॰ २४

मुक्तकच्छशिखामुक्तकटेपटा ३४ अन्यासक्तान्विरक्तांश्चेति नहिंसिनहिनस्ति ३५ तेमेनिर्भयदेशेष्वैः सं
प्रयोगादन्यत्रविकत्थनंप्रौढिवादः येषांतैः नतुरहैरविभेमिशंभोश्चेतिचेत्तत्राहुः रहोजुषेतिसर्वस्मात्तः प्रविष्टे

केचित्प्रांजलयोदीनान्यस्तशस्त्रादिवौकसः मुक्तकच्छशिखाःकेचिद्भीताःस्मइतिवादिनः ३४ न
त्वंविस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ३५ किंक्षेम
शूरैर्विबुधैरसंयुगविकत्थनैः रहोजुषाकिंहरिणाशंभुनावावनौकसा ३६ किमिंद्रेणाल्पवीर्येण
णब्रह्मणावातपस्यता तथापिदेवाःसापत्न्यान्नोपेक्ष्याइतिमन्महे ३७ ततस्तन्मूलखनननेनियुंक्ष्वा
स्माननुव्रतान् ३७ यथामयोंगेसमुपेक्षितोनृभिर्नशक्यतेरूढपदश्चिकित्सितुं ३८ यथेंद्रियग्राम
उपेक्षितस्तथारिपुर्महान्बद्धबलोनचाल्यते ३९ मूलंहिविष्णुर्देवानांयत्रधर्मःसनातनः ३९ तस्य
चब्रह्मगोविप्रास्तपोयज्ञाःसदक्षिणाः ४० तस्मात्सर्वात्मनाराजन्ब्राह्मणान्ब्रह्मवादिनः ४०

नक्वचिदपिचहरिरहइष्टेनेत्यर्थः पुरुषप्रवेशरहितमिलावृतवनमोकोनिवासोयस्ययस्यतेनशंभुना ३६ य
दप्युद्यमैर्देवानकिंचिदपिकर्तुंसमर्थास्तथापिनीतिरनुसर्तव्येत्याहुः तथापीति ३७ ३८ आमयोरोगःरू
ढपदोबद्धमूलः ३९ देवानांमूलंविष्णुःसचयत्रधर्मस्तत्रास्ते धर्मस्यमूलंवेदादयइति ४० २४

२४५

किंचविप्रादयोहरेरेवतनवोयस्मात् तस्माद्वयमेवोपायइत्याहुः ४२ ४५ आरात्समीपमीपमागतोमृत्यु
र्येषांते ४९ नकेवलंसतांविद्वेषोमृत्युमात्रहेतुः किंतुबहुनर्थकार्यपीत्याह आयुरिति ४ इतिश्रीभा

तपस्विनोयज्ञशीलान्गाश्चहन्मोहविर्दुघाः विप्रागावश्चवेदाश्चतपःसत्यंदमःशमः ५१ श्रद्धाद
यातितिक्षाचक्रतवश्चहरेस्तनूः सहिसर्वसुराध्यक्षोह्यसुरद्विड्गुहाशयः ४२ तन्मूलादेवताःस
र्वाः सेश्वराःसचतुर्मुखाः अयंवैतद्वधोपायोयदृषीणांविहिंसनं ४३ श्रीशुकउ॰ एवंदुर्मंत्रिभिःकं
सःसहसंमंत्र्यदुर्मतिः ब्रह्महिंसांहितंमेनेकालपाशावृतोसुरः ४४ संदिश्यसाधुलोकस्यकदने
कदनप्रियान् कामरूपधरान्दिक्षुदानवान्गृहमाविशत् ४५ तेवैरजःप्रकृतयस्तमसामूढचेतसः
सतांविद्वेषमाचेरुरारादागतमृत्यवः ४६ आयुःश्रियंयशोधर्मंलोकानाशिषएवच हंतिश्रेयांसि
सर्वाणिपुंसोमहदतिक्रमः ४७ इतिश्रीभागवतेदशमेचतुर्थः ४ श्रीशुकउ॰ नंदस्त्वात्मजउत्पन्नेजाताह्ला
ह्लादोमहामनाः आहूयविप्रान्वेदज्ञान्स्नातःशुचिरलंकृतः १ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्यवै

वार्थदीपिकायांदशमेचतुर्थोध्यायः ४ ॐ पंचमेजातकंनंदःकृत्वाकृत्वामहोत्सवं गत्वाथमथुरांप्रापवसुदेवागमोत्सवं

श्रीधरस्वामिविरचितायांभावार्थदीपिकायां

श्रीमद्भागवतटीका १८

25
श्री॰ निधुते देले देसमतिलपर्वतांश्च प्रादात् कथंभूता रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सवर्णरसाक्तैर्वरैश्चा
भा॰द॰ वृतान् ३ द्रव्याणां गोहिरण्यादीनां तनूमध्ये केषांचिद्दानैरेव शुद्धिर्यथा तथा दानादियुक्तजातकर्मादिसंस्कारै
स्वगामपितथैववृषायमाणौ नर्दंतौ तदनुकारिशब्दान्कुर्वंतौ युयुधातेइत्यर्थः रुतैः
शब्दैर्जंतून् हंसमयूरादीन् ४०।४१ मुग्धइवाजानन्निवआसदत् समीपमागमत् ४२ अपरपादाभ्यांसलांगूलं

49

सर्वेषांलोकानामेकोमुख्योपालकौ प्रातराशः प्रातर्भोज्यमन्नंतत्सहितौ ४२ अभ्याशंसमीपं ४६ ४७

श्री. भा. द. स्कं. ४९

देवाश्चपरिसंतुष्टाः बभूवुःपुष्पवर्षिणः तौवत्सपालकौभूत्वासर्वलोकैकपालकौ सप्रात
राशौगोवत्सांश्चारयंतौविचेरतुः ४५ स्वंस्वंवत्सकुलंसर्वेपालयिष्यंतएकदा गत्वाजलाशया
भ्याशंपाययित्वापपुर्जलं ४६ तेतत्रददृशुर्बालामहासत्वमवस्थितं तत्रसुर्वज्रनिर्भिन्नंगिरेः
शृंगमिवच्युतं ४७ सवैवकोनाममहानसुरोवकरूपधृक् आगत्यसहसाकृष्णंतीक्ष्णतुंडोग्रस
द्बली ४८ कृष्णंमहाबकग्रस्तंदृष्ट्वारामादयोर्भकाः बभूवुरिंद्रियाणीवविनाप्राणंविचेतसः ४९
तंतालुमूलंप्रदहंतमग्निवत्गोपालसूनुंपितरंजगद्गुरोः चच्छर्दसद्योतिरुषाक्षतंबकस्तुंडेन
हंतुंपुनरभ्यपद्यत ५० तमापतंतंसनिगृह्यतुंडयोर्दोर्भ्यांबकंकंससखंसतांपतिः पश्यत्सु
बालेषुददारलीलयामुदावहोवीरणवद्दिवौकसां ५१ तदाबकारिंसुरलोकवासिनःसमाकि
रन्नंदनमल्लिकादिभिः समीडिरेचानकशंखसंस्तवैःतद्वीक्ष्यगोपालसुताविसिस्मिरे ५२

कैः पटहैः शंखैः स्तवैः ५२

रामआदिर्येषांतेतथारामः ४९ ५० तुंडयोश्चंच्वोः वीरणवत्अशेध्यितृणविशेषवत् ५१ समीडिरेतुष्टुवुः आन

४९

५१B

स्वस्थानमागतंप्राणमिव हंसंचप्रणीयपक्षीकृत्य ५३ अतिप्रियेणप्रीत्याआदृताःसादराःप्रेत्यागतमिव
लोकांतरादागतमिव तृषितानिश्वरमाणि अमृतंपिबंतीवईक्षणानियेषांते ५४ अहोवतेत्यादिश्लोकत्रय
स्यइतिनंदादयइत्यनेनान्वयः अपिएवमपितेषामेवानिष्टमासीत् यतस्तैःसर्वमन्येषांकृतंभयं ५५ अथचोर

मुकुंदवकास्यादुपलभ्यदास्कारामादयःप्राणमिवेंद्रियोगणाः स्थानागतंतंपरिरभ्यनिर्वृताःप्रणीय
वत्सान्व्रजमेत्यतज्जगुः ५३ श्रुत्वातद्विस्मितागोपागोप्यश्चातिप्रियादृता प्रेत्यागतमिवौत्सुक्यादैक्ष
ततृषितेक्षणाः अहोवतास्यवालस्यवहवोमृत्यवेभवन् अप्यासीद्विप्रियंतेषांकृतंपूर्वयतोभयं ५५
अध्याप्यभिभवंत्येनंनैवंतेघोरदर्शनाः जिघांसयैवमासाद्यनश्यंत्यग्नौपतंगवत् ५६ अहोब्रह्मविदां
वाचोनासत्याःसंतिकर्हिचित् गर्गोयदाहभगवानन्वभावितथैववतत् ५७ इतिनंदादयोगोपाःकृष्ण
रामकथांमुदा कुर्वंतोरममानाश्चनाविंदन्भववेदनां ५८ एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे नि
लायनैःसेतुवंधैर्मर्कटोत्प्लवनादिभिः ५९ इतिश्रीभागवतेदशमेएकादशः ११

दर्शनाअपिनाभिभवंतिनधर्षयंती ५६ गर्गोयदाह तस्मान्नंदात्मजोयंतेनारायणसमोगुणैरित्यादि ५७ ५८
वत्सपृथगतेरहतावत्सदंभासरंहृहरिः मुनिस्पृथगतेवारहत्नग्रांपदंभिनावकं ५९ इतिदशमेएकादशः ११

50

श्री॰ भा॰ द॰ टी॰ ५०

द्वादशेतुमहासर्पवपुर्धरमघासुरं वत्सपालंगिलन्तंद्रोगलेहत्वानिर्वर्णयते महाबकगलक्रीडाकेवल
स्यनकौतकं इतिवाचामृतरसुवेसमरवेःप्राविशद्धरिः क्वचिद्वनाशायवनएवप्रथमंभोजनंकर्तुं

शुकउ॰ ॐक्वचिद्वनाशायमनोदधद्व्रजात्प्रातःसमुत्थायवयस्यवत्सपान् प्रबोधयन्
शृंगरवेणचारुणाविनिर्गतोवत्सपुरःसरोहरिः १ तेनैवसाकंपृथुकाःसहस्रशःस्नि
ग्धाःसुशिग्वेत्रविषाणवेणवः स्वकान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्यविनि
र्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यूथीकृत्यस्ववत्सकान् चारयंतोर्भलीलाभिर्विजह्रुस्त
त्रतत्रह ३ फलप्रवालस्तवकसुमनःपिच्छधातुभिः काचगुंजामणिस्वर्णभूषिताअ
प्यभूषयन् ४

तेनैवशृंगरवेणाह्लादेनवापृथुकाबालाःस्निग्धाःस्नेहयुक्ताःशिकशिक्यं रम्याशिग्वेत्रादयोयेषांतेः
सहस्रादिकसंख्यायुक्तान्वत्सान् २ ३ काचादिभिः एवंमात्रादिभिर्भूषिताअपिफलादिभिः आत्मा ५०
नमभूषयन्नित्यर्थः ४

२

50A मुसलंतः चोरयंतः यदिहरंगतः कृस्नो भवति तर्हीति ६ ध्मांतः वादयंतः भृंगैः सह ७ विछायाभिः प्रतिछाया
भिः कलापिभिर्मयूरैः कीशवालान्वृक्षशाखास्वलंबमानानिवानरलांगूलानि आकर्षंतः लांगूलमश्नवंतः ते

मुसलंतोन्योन्यशिक्यादीन्ज्ञातीनाराग्निचिचितिषुः तवत्याश्चपुनर्हराद्वमंतश्चपुनर्दद्रुः ५
यदिहरंगतः कृस्नो वनशोभेत्यागायत अहं सर्वमहं सर्वमिति संसृश्यपरेमिरे ६ केचिद्वे
णुन्वादयंतो ध्मांतः शृंगाणि केचन केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ७ विछा
याभिः प्रधावंतो गच्छंतः साधुहंसकैः वकैरुपविशंतश्च नृत्यंतश्च कलापिभिः ८ विकर्ष
तः कीशवालानारोहंतश्च तैर्द्रुमान् विकुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु ९ साकंभे
कैर्विलंघंतः सरित्प्रस्रवसंप्लुताः हसंतश्च प्रतिच्छायाः शपंतश्च प्रतिस्वनान् १०

सद्द्रुमानारुहंतः विकुर्वंतः दंतदर्शनभ्रूभिन्नंभादिभिस्तैः सहैव विकारान्कुर्वंतः पलाशिषु वृक्षेषु प्लवंतः
शाखायाः शाखांतरमुड्डयंतः ९ प्रतिछायाः प्रतिबिंबानि स्वनंतश्चेतिवा १०

श्री॰ तानतिविस्मितः श्लोकद्वयेनाभिनंदति इत्थमिति सतां विदुषां ब्रह्मसुखत्वेन च अनुभूतिरूपतया स्वप्रका
भा॰द॰ शपरमसुखत्वेन स्फुरद्भिः भक्तानां परदैवतेन आत्मप्रदेन नाथेन मायाश्रितानां तु नरबालकत्वेन प्रतीयमानेन सह
टी॰ विजह्रुः कृतानां पुण्यानां पुंजा राशयो येषां ते ब्रह्मविदां तदनुभव एव भक्तानां मतिगौरवेणैव भजनं एतेन
५१ तेन सह सख्येन विजह्रुः अहो अमीषां भाग्यमिति भावः ११ बहुजन्मभिः कृच्छ्रेण धृत आत्मा मनो यैस्तैर्यो

51

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन मायाश्रितानां नरदारकेण साकं विजह्रुः
कृतपुण्यपुंजाः ११ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः स एव यद्दृग्विष
यः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसां १२ अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीड
नवीक्षणाक्षमः नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते १३

गिभिरप्यगम्योऽलभ्यः १२ सुखक्रीडनवीक्षणेन अक्षमोऽसहनः कथंभूतः यस्यांतः अंतरं छिद्रं पीतामृतैर
मरैः प्रतीक्ष्यते कथं मरिष्यतीति कदा वेति यद्वा कथंभूतं सुखक्रीडने यत् अंतर्हृदये अमरैः प्रतीक्ष्यते चिं
त्यते पीतामृतैरपि निजजीवितेप्सुभिः अयं भावः नामृतपानमात्रेण जीवनं सफलं भवति किंतु भगवल्ली ५१
लानुस्मरणेनेति तत्र भयाभावात् तदेव नित्यमंतश्चिंत्यते इति १३

51.A

कृस्नमुखानर्भकान्दृष्ट्वासुरः इतिव्यवस्यनिश्चित्याजगरंवपुर्धृत्वातेषांग्रसनाशयापथिव्यशेतेतितृतीयेश्लोकेना
न्वयः कंसेनानुसृष्टः प्रहितः वकीस्तनना कथंव्यवसत्तदाह अयंत्विति सार्द्धेन ममतयोर्द्वयोः सोदरयोःस्थाने
एनंकृस्नंसवलंससैन्यंवत्सतत्पालसहितंहनिष्यामि १४ ननुतथापिव्रजस्थास्त्ववशिष्येरन् नेत्याह एतइ
त्यादिकृताः तिलोदककतयाकल्पिताः वर्ष्मसुतदेहेषु प्रजापवासवोयेषांतेतथा १५ सयोजनायामंयोजनप्र

दृष्ट्वार्भकान्कृस्नमुखानघासुरः कंसानुसृष्टः सवकीवकानुजः अयंतुमेसोदरनाशकृत्तयोर्द्वयोर
यैनंसवलंहनिष्ये १४ एतेयदामत्सुहृदोस्तिलापः कृतास्तदानष्टसमाव्रजौकसः प्राणेगतेवर्ष्मसु
कानुचिंताप्रजासवःप्राणभृतोहियेते १५ इतिव्यवस्याजगरंबृहद्वपुः सयोजनायाममहाद्रिपीव
रं धृत्वाद्भुतंव्यात्तगुहाननंतदापथिव्यशेतग्रसनाशयाखलः १६ परापरोष्ठोजलदोत्तरोष्ठोदर्या
ननान्तोगिरिशृंगदंष्ट्रः ध्वांतांतरास्योविततांध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः १७

माणेनदैर्घ्येणयुक्तंचतत्महाद्रिवत्पीवरंच व्यात्तंप्रसारितंगुहातुल्यमाननंयस्मिंस्तत् १६ अद्भुतमितियदु
क्तंएतद्दर्शयितुंविशिनष्टि परायामपरोष्ठोयस्यसः जलदेष्वुत्तरोष्ठोयस्यसः दर्यौविवाननस्यान्तौसृक्कि
णीयस्यसः गिरेःशृंगाणीवदंष्ट्रायस्यसः ध्वांतवदंतरास्यंयस्यसः विततोध्ववज्जिह्वायस्यसः परुषाक्रोपेनानि
लवत्श्वासोयस्यसः यद्वापुरुषेतिदववदीक्षणयोरूष्मायस्यसः दाववद्दृष्टिरित्यर्थः परुषानिलश्वासश्चा

श्री॰ वस्तुतोजगरमेवव्यात्ततुंडंदृष्ट्वावृंदावनस्यश्रीःसंपदेवैषेतिभ्रांत्यामत्वाविपरीतंव्यात्ताजगरतुंडसादृश्येनोत्
भा॰ द॰ प्रेक्षंतेते: १८ उत्प्रेक्षामेवप्रश्नोत्तररूपदाभ्यामाहुः अहोइति पंचभिः सत्वकूटंसत्वाभासमिदं नवा तथा
टी॰ अस्मत्संग्रसनायव्यात्तं १९ यद्व्यालतुंडंतद्वदाचरतिवा नवानिश्चितं १९ तथैवेत्याहुः सत्यमिति अर्कक
५२ रैरारक्तंघनमुत्तरोष्ठवत्पश्यत तस्यघनस्यप्रतिच्छाययारुणंरोधःस्थलंअधरोष्ठवत्पश्यतेतिसर्वत्रान्वेति २०

52

दृष्ट्वातंतादृशंसर्वेमत्वावृंदावनश्रियं व्यात्ताजगरतुंडेनह्युत्प्रेक्षंतेस्मलीलया १८ अहोमित्राणि
गदतःसत्वकूटंपुरःस्थितं अस्मत्संग्रसनव्यात्तव्यालतुंडायतेनवा १९ सत्यमर्ककरारक्तमुत्तराह
नुवद्घनं अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणं २० प्रतिस्पर्द्धेतसृक्कभ्यांसव्यासव्येनगोदरे
तुंगशृंगालयोप्येतास्तद्दंष्ट्राभिश्चपश्यत २१ आस्तृतायाममार्गोयंरसनांप्रतिगर्जति एषामंतर्गतं
ध्वांतमेतदप्यंतराननं २२ दावोष्णखरवातोयंश्वासवद्भातिपश्यत तद्दग्धसत्वदुर्गंधोप्यंतरामि
षगंधवत् २३

सृक्किभ्यामोष्ठप्रांताभ्यांप्रतिस्पर्द्धेतेतुल्यतयावर्तेते नगोदरेगिरिदर्यौतस्यदंष्ट्राभिः
स्पर्द्धमाने २१ आस्तृतायाममार्गः विस्तृतोदैर्घ्यवान्मार्गः प्रतिगर्जतिप्रतिस्पर्द्धते एषांशृंगाणांमध्यगतं ५२
ध्वांतमंधकारंअंतराननंआननस्यमध्यंप्रतिगर्जति २२ दावेनोष्णःखरोवातोयं तेनदावाग्निनादग्धानां
सत्वानांयोदुर्गंधः सएवसर्पस्यांतर्गतामिषगंधवद्भाति २३

52A एवं सत्यमेवाजगरमनन्यथाउत्प्रेक्षन्ति र्भयायर्युः किं ग्रसिता ग्रसिष्यति अनेनश्रीकृष्णेन हंत्रा वका
रेरुपालकमनीयं मुखं तस्य स्वरूपं न जानन्तीत्यतज्ज्ञाः अमृषावत्ततः सर्पवपुरेवमृषायते स्थाणुनासर्पवत्सा ५२
दृश्यगोचरत्वेन प्रतीयत इति एवं भाषितमित्थंमतत्थ्यमयथार्थं श्रुत्वा भगवानिति विचिन्त्य स्थानारता

अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति क्षणादनेनेति वकार्यशत्रुमुखं वीक्ष्यो
द्धसंततः करताडनैर्ययुः २४ इत्थंमिथोतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिन्त्येत्यमृषा मृषायते रक्षो वि
दित्वाखिललोकहृत्स्थितः स्वानां निरोद्धुं भगवान्मनो दधे २५ तावत्प्रविष्टास्त्वसुरोदरान्तरे परं न
गीर्णाः शिशवः सवत्साः प्रतीक्षमाणेन वकारिवेशनं हतस्वकान्तस्मरणेन रक्षसा २६ तान्वीक्ष्य कृ
ता ष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो २
दिष्टकृतेन विस्मितः

र्थं मनो दधे तान्निरोद्धुं वारयितुं यावन्मनो दधे तावत्प्रविष्टास्त्वसुरोदरान्तरे इत्यन्वयः २५ प्र
विष्टा एव केवलं न तु तेन गीर्णा गिलिता जीर्णा इति पाठेपि समएवार्थः कथंभूतेन हतयोः स्वकयोः अंतस्म
रतीति तथा तेन अत एव बकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्षमाणेन २६ स्वकरादवच्युतान् विनिःसृतान्

श्री॰ भा॰ द॰ ९॰ ५३

53

कृत्यंकिमत्रेत्यादिविविंत्यतत्रोपायंज्ञात्वास्वयमप्याविशदित्यन्वयः कथंविचिंत्य अस्यजीवनं अमीषांचा
विहिंसनमितिद्वयंवैनिश्चितं कथंनस्यादिति २८ वनेच्छदामेवांतरिताः कौणपाः ऊणपाशिनोराक्ष
साःकौणपोनिर्ऋतिस्तदीयावाइति २९ आत्मानेश्रीकृष्णे चूर्णीकर्तुमिच्छोस्तस्यगलेआदेवेवतरसा

कृत्यंकिमत्रास्यखलस्यजीवनंनवाअमीषांचसतांविनाशनं द्वयंकथंस्यादितिसंविचिंत्यतत्
वौ तांविशतंडमशेषदृग्घरिः २८ तदाघनच्छदादेवाभयाद्धाहेतिचुक्रुशुः जहृषुर्येचकंसाद्याःकौ
णपास्त्वघबांधवा २९ तच्छ्रुत्वाभगवान्कृष्णःस्त्वव्ययःसार्भवत्सकान् चूर्णीचिकीर्षोरात्मानंतर
सावद्वृधेगले ३० ततोतिकायस्यनिरुद्धमार्गिणोह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः पूर्णोंतरंगेपव
नोनिरुद्धोमूर्द्धन्विनिःपाट्यविनिर्गतोबहिः ३१ तेनैवसर्वेषुबहिर्गतेषुप्राणेषुवत्सान्सुहृदःप
रेतान् दृष्ट्यास्वयोत्थाप्यतदन्वितःपुनर्वक्त्रान्मुकुंदोभगवान्विनिर्ययौ ३२

ोष्विंद्रियेषु स्वयामृतवर्षिण्या दृष्ट्येव ३२

वद्वृधेअवर्द्धत ३० एवंसत्यमेवाजगरस्यनिरुद्धोमुखादीनांमार्गोभूतःकंठोयस्यात्वितस्य उद्गीर्णदृष्टेर्बहि
र्निर्गतलोचनस्य अंतरंगेदेहमध्येपूर्णःपरिभूतःमूर्द्धन्मूर्द्धनिब्रह्मरंध्रंविनिर्भिद्यबहिर्निर्गतइति ३१ प्रा ५३

53A

श्वरीदेहेस्थितं शुद्धसत्त्वमयंज्योतिर्निर्गतं स्वेवस्थितीशेविवेश अन्येत्वंशावताराः कृष्णस्तुभगवान्स्वयमि
तिभावः स्वकृतः स्वकार्यंकृतः श्रीकृष्णस्याङ्गणमकृतश्रेजामकुर्वन्स्तगायंतीति गंधर्वादयः ३४ किंचतेषां
यानिअद्भुतस्तोत्राणीनिनैकोत्सवाअनेकोत्सवाद्येमंगलस्वनास्तान्स्वधाम्नः अंतिसमीपेश्रुत्वाअजोब्रह्मा
अचिरादागतः ईशस्यश्रीकृष्णस्यमहिमानंदृष्ट्वाविस्मयंप्रापेति ३५ बहूतिथंबहुकालेआक्रीडगह्वरंक्रीडा

पीनाहिभोगोत्थितमद्भुतंमहज्ज्योतिः स्वधाम्नाज्वलयद्दिशोदश प्रतीक्ष्यखेवस्थितमीशनिर्गमंवि
वेशतस्मिन्मिषतांदिवौकसां ३३ ततोतिहृष्टाः स्वकृतोकृतार्हणं पुष्पैः सुराअप्सरसश्चनर्तनैः गी
तैः सुरागावाद्यधराश्चवाद्यकैः स्तवैश्चविप्राजयनिस्वनैर्गणाः ३४ तदद्भुतस्तोत्रसवाद्यगीतकाज्
यादिनैकोत्सवमंगलस्वनान् श्रुत्वास्वधाम्नोत्यजआगतोचिरात्दृष्ट्वामहीशस्यजगामविस्मयं ३५
शुकउ॰ राजन्नाजगरंचर्मशुष्कंवृंदावनेद्भुतं व्रजौकसांबहुतिथंबभूवाक्रीडगह्वरं ३६ एतत्कौमा
रजंकर्महरेरात्माहिमोक्षणं मृत्योःपौगण्डकेबालादृष्ट्वोचुर्विस्मिताव्रजे ३७

र्येमहाविति ३८ अन्यच्चातिविचित्रमित्याह एतदिति कौमारंपंचमाब्दांतंपौगंडंदशमावधि कैशोरमापंचद
शाद्यौवनंतुततःपरं हरेः कौमारजंपंचमाब्दकृतंकर्मतत्षष्ठेवर्षेदृष्ट्वापौगंडकेषष्ठेब्देबालाः अद्यैवनहृन्निमित्तमूचुः
किंतत्कर्ममृत्योः सकाशादात्मनामहेश्चमोक्षणंआत्मनोप्रसिद्धान्मृत्योः अहेस्तसंसारात्तत्राणात् अद्यासर

सटीकः श्रीकृष्णलीलामृतसागरसंग्रहे दशमस्कन्धोत्तरार्धे पत्रं: ८१

श्री॰ नैतद्विचित्रंकिंतदित्यपेक्षायामाह अघोपीति आत्मसात्म्यंस्वसमानरूपतां ३८ यस्यांगंमूर्तिस्तस्यप्रति
भा॰द॰ मापतिकृतिः तत्रापिकेवलंमनोमयी सापिवदंतराहितासतीभागवतींगतिंददौ प्रह्लादादिभ्यःसर्व
टी॰ वसाताल्वयमंतगतःकिंपुनःनित्यचासावात्मसुखानुभूतिश्चेत अभितोव्युदस्तामायायेनसः ३९ पादव
५४

नैतद्विचित्रंमनुजार्भमायिनःपरावराणांपरमस्यवेधसः अघोपियत्स्पर्शनधौतपातकःप्रापा
त्मसात्म्यंत्वसतांसुदुर्लभं ३८ सकृद्यदंगप्रतिमांतराहितामनोमयीभागवतींददौगतिं सएव
नित्यात्मसुखानुभूत्यभिव्युदस्तमायःपरमोगतःकिंपुनः ३९ सूतउ॰ इत्थंद्विजायादवदेवदत्तःश्रु
त्वात्मरातुश्चरितंविचित्रं पप्रच्छभूयोपितदेवपुण्यंवैयासकिंयन्निगृहीतचेताः ४० श्रीराजो॰
ब्रह्मन्कालांतरकृतंतत्कालीनंकथंभवेत् यत्कौमारेहरिकृतंजगुःपौगंडकेर्भकाः ४१ तद्ब्रूहि
मेमहायोगिन्परंकौतूहलंगुरो नूनमेतद्धरेरेवमायाभवतिनान्यथा ४२ वयंधन्यतमालोकेगु
रोपित्तत्रवंधवः यत्पिबामोमुहुस्त्वत्तःपुण्यंकृष्णकथामृतं ४३

देवेनश्रीकृष्णेनदत्तःपरीक्षितंस्व
मात्मानमर्थात्परीक्षितः यतिददाति स्वरातात्कृष्णस्तस्ययेनश्रवणेननितरांगृहीतंवशीकृतंचेतोयस्य ५४
सः ४० कालांतरेकौमारेकृतंपौगंडकेकथंज्ञात्वाचुरित्यर्थः ४१ ४२ ४३

54A

तेनयः स्मारितोनंतस्तेनहृतान्यखिलेंद्रियाणियस्यसः तथाभूतोपिकथंचिल्लब्धवहिर्दृष्टेर्हेभागवतोत्त
मशौनक ४४ इतिदशमेद्वादशः त्रयोदशेहरद्ब्रह्मावत्सान्पालांश्चमायया तदात्तत्सर्वरूपोऽहं कृष्णः एवं
वदाचरत् नूतनयस्मिनव्यवत्करोषि १ तथाहिसारभृतांसारग्राहिणामयंनिसर्गःस्वभावः कोसौ अच्युत

सूतउवाच इत्थंस्मपृष्टः सतुवादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः कृच्छ्रात्पुनर्लब्धवहि
र्दृशिःशनैःप्रत्याहतंभागवतोत्तमोत्तम ४४ इतिश्रीभागवतेदशमेद्वादशः श्रीशुकउ० साधुपृ
ष्टंमहाभागत्वयाभागवतोत्तम यन्नूतनयसीशस्यशृण्वन्नपिकथांमुहुः १ सतामयंसारभृतांनि
सर्गोयदर्थवाणीश्रुतिचेतसामपि प्रतिक्षणंनव्यवदच्युतस्ययत्स्त्रियाविटानामिवसाधुवार्ता २
शृणुष्वावहितोराजन्नपिगुह्यंवदामिते ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ३ तथाघ
वदनान्मृत्योरक्षित्वावत्सपालकान् सरित्पुलिनमानीयभगवानिदमब्रवीत् ४

स्यवार्ताप्रतिक्षणंसाधुनव्यवद्भवतीतियत्सः यद्यथाविटानांस्त्रैणानांस्त्रियाःकामिन्याःवार्त्तैव कथंभूतानाम
मपिसतांयोग्यच्युतस्यवार्त्तैवअर्थोयेषांतानिवाणीश्रुतिचेतांसियेषांतथाविधानामपि २ ३ ४ भोजन
विधानायपुलिनंस्तौति ॥

श्री० भा० द० पू० ५५
55

अहोऽति स्वीयानांयाकेलिः क्रीडातन्निमित्तासंपदः यद्वा स्वकीयानांकेलीनांसंपदोविद्यंतेयस्मिंस्तत् मृदु
लाश्च्छावालुकायस्मिंस्तत् किंच स्फुटद्विकसत्सरः सरोजं वाऊल्येनोपचारतः सरएवविकसद्भिस्तत्कृत
स्तगंधस्तेनहृता आकृष्टाः अलयः पत्रिणःश्चयेतेषां केउदकेध्वनयः तेषांप्रतिध्वानाःतैर्लसंतोद्रुमाःतेरा
कुलेव्याप्ते ५ दिवारूढे वेलातीतेस्थिः ६ आरुध्यसंरुध्यशाद्वलेहरिततृणदेशे ७ तदातेविरेजुः कृष्ण

अहोतिरम्यंपुलिनंचयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकं स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रति
ध्वानलसद्रुमाकुले ५ अत्रभोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः वत्साः समीपेपः पीत्वाचरंतुशन
कैस्तृणं ६ तथेतिपाययित्वाभोवत्सानारुध्यशाद्वले मुक्ताशिक्यानिबुभुजुः समंभगवतामुदा कृष्ण
स्यविष्वक्पुरुराजिमंडलैरभ्याननाः फुल्लदृशोव्रजार्भकाः सहोपविष्टाविपिनेविरेजुश्छदायथांभोरु
हकर्णिकायाः ८ केचित्पुष्पैर्दलैःकेचित्पल्लवैरंकुरैः फलैः शिग्भिस्त्वग्भिर्दृषद्भिश्चबुभुजुः कृत
भाजनाः ९ सर्वेमिथोदर्शयंतः स्वस्वंभोज्यरुचिंपृथक् हसंतोहासयंतश्चाभ्यवजह्रुः सहेश्वराः १०

स्वविष्वक्परितः पुरुराजिमंडलैर्बह्वीभिः पंक्तिमंडलैः सहनैरंतर्येणोपविष्टाः श्रीकृष्णाभिमुखान्याननानि
येषांतेफुल्लदृशः विकसितनयनाः कमलकर्णिकायाः परितः पत्राणियथेति ८ पुष्पैः तद्दलैः अन्यैश्चपत्रैः
कृतानिभाजनानियैस्ते ९ रुचिंस्वादुविशेषं अभ्यवजह्रुः बुभुजिरेसहेश्वराः श्रीकृष्णसहिताः अन्योन्यंदर्शयंत

श्रीरामजी

३

55A यज्ञभुगपि तेषु बुभुजे बालानामिव केलिर्यस्य सः तदाह उदरवस्त्रयोर्मध्ये वेणुं विभ्रद्दधदिति सर्वत्र वा
मश्रति कक्षे पाण्योर्विशेषणं मसृणं स्निग्धं दध्योदनकवलं जीरकमरिसैंधवकर्पूरैलादिभिरालोडितम
सृणमुच्यते यद्वा इति दध्योदनं तदुचितान्याद्रकाम्रादिफलानि अंगुलिसंधिषु कणिकेव सर्वाभिमुखो वम

विभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु तिष्ठन्मध्ये स्व
परिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलि ११ भारतैवं वत्सपेषु
भुंजानेष्वच्युतात्मसु वत्सास्त्वंतर्वने दूरं विविशुस्तृणलोभिताः १२ तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोस्या
स्य भीभयं मित्राण्याशान्माविरमतेह नेष्ये वत्सकानहं १३ इत्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्स
कान् विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ १४

ध्ये तिष्ठन् स्वस्य परित उपविष्टान् सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः हासयन्स्वर्गे स्वर्गवासिनि जने आश्चर्येण
पश्यति लोके जनानां मध्ये बुभुजे ११ १२ भीमयं भयहेतुभ्यो भयं अस्य अपास्य यद्वा अस्य विश्वस्य भियोपि
व भयं यः श्रीकृष्णः स तान्वत्सपालकान्भयसंत्रस्तान्दृष्ट्वा ऊचे हे मित्राणि आशान्भोजनात् अस्मिन्यादेह्नराथिका
मार्थे १३ अद्रिषु तद्दरीषु कुंजेषु लतादिपिहितोदरविवरेषु गह्वरेषु संकटस्थानेषु च १४

श्री· भा· द· पृ· ५९ 56

अंभोजन्मः पद्माजनिर्यस्यस ब्रह्मा तदंतरेतस्मिन्नवसरे गतः आगतः तच्छिद्रं प्राप्तोवा अन्यदपि महित्वं
महिमानं द्रष्टुं तस्य वत्सानितः स्थानात् वत्सपांश्चान्यत्र नीत्वा स्वयं तिरोबभूव प्रभवतः श्रीकृष्णस्य १५

शुक उ· अंभोजन्मजनिस्तदंतरगतो मायार्भकस्येशितुः द्रष्टुं मंजु महित्वमन्यदपि तद्वत्सानि
तो वत्सपान् नीत्वान्यत्र कुरूद्वहांतरदधत् खेवस्थितो यः पुरा दृष्ट्वाघासुरमोक्षणं प्रभवतः प्रा
प्तः परं विस्मयं १५ ततो वत्सानदृष्ट्वैत्य पुलिनेपि च वत्सपान् उभावपि वने कृष्णो विचिकाय समं
ततः १६ क्वाप्यदृष्ट्वांतर्विपिने वत्सान् पालांश्च विश्ववित् सर्वं विधिकृतं कृष्णः सहसावजगाम ह
१७ ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च उभयायितमात्मानं चक्रे विश्वकृदीश्वरः १८

उभावपि वत्सान् वत्सपांश्च विचिकाय अन्वीक्षितवान् १६ विधिकृतं ब्रह्मणा कृतं अवजगाम ज्ञातवान् १७
उभयायितं वत्सवत्सपालरूपेण वर्तमानमित्यर्थः अयं भावः यदि तत्स्थानीमासे तर्हि तन्मातॄणां विषादः स्या
त् यदि च तानेवानयिष्यामि तर्हि ब्रह्मणो मोहो न स्यादिति तदुभयप्रीतये तथा चकारेति १८ ५९

56A

तदेवदर्शयति यावदिति वत्सपानांवत्सकानांचाल्पकवपुः प्रमाणमनतिक्रम्यएवस्रपर्य्यपिष्योऽस्यं यद्वा
यावद्वत्सपादिवपुः तावत्सर्वस्वरूपोऽजः कृष्णोऽवभाविति कथंगिरांगवदजः यथाजः ॐकारोगिरांगवत्
अंगावयवसकलवर्णरूपेणभातीत्यर्थः यथाशृतिः सर्वाणिपर्णानिसंतृण्णएवमोंकारेणसर्वावाक्संतृ
ण्णा ॐकारएवेदंसर्वमितिश्रुतेः अथवासर्वंविष्णुमयंमत्वाऽजः श्रीकृष्णः सर्वस्वरूपोवभौ कथंगिरांगवत्

यावद्वत्सपवत्सकाल्पकवपुर्यावत्करांघ्र्यादिकंयावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषांवरं
यावच्छीलगुणाभिधाकृतिवयोयावद्विहारादिकंसर्वंविष्णुमयंगिरोंगवदजःसर्वस्वरूपोवभौ १९
स्वयमात्मात्मगोवत्सान्प्रतिवार्यात्मवत्सपैः क्रीडन्नात्मविहारैश्चसर्वात्माप्राविशद्व्रजं २०

यथासकलशब्दजातंमात्रात्रयेणव्याप्यॐकारोभाति तदुच्चारणव्यतिरेकेणवेदाध्ययनादेरसंभवात्तस्यापि
रोगत्वंतद्वत् वर्णसमूहाद्वा उत्तरत्राप्येवं सर्वंविष्णुमयंजगत्इति प्रसिद्धयागीःतस्याअंगवत् साभीरेवार्थ
स्वरूपेणप्रत्यक्षतायथातथावभूतेत्यर्थः १९ एवंसर्वात्मासन्व्रजंप्राविशत् कथंस्वयमात्मैवप्रयोजकआत्मस्व
रूपान्गोवत्सानितिकर्म्मापिस्वयमेवेत्सकं आत्मरूपैः वत्सपैः प्रतिवार्यप्रयोज्यकर्तापिस्वयमेव आत्मविहा
रैःक्रीडन्निति क्रियापिकारकाण्यपिस्वयमेवेत्यर्थः २०

श्री॰
भा॰द॰
टी॰
५०
57

ततदात्मातत्तद्गोपवालरूपोःभवत् ततस्ततत्सद्मप्रविष्टः २१ गोपिविकामोदनमात् तन्मातरोवेणुर
वेणारवयाउत्थिताः सत्यःसुतानमत्वापरंब्रह्मैवदोर्भिः रुह्यउत्थाप्यपयःसुधासवंयपयपवसुधावत्सा

२

ततद्वत्सानपृथग्गृहीत्वाततद्गोष्ठेनिवेश्यसः ततदात्माभवद्राजनततत्सद्मप्रतिष्ट
वान् २१ तन्मातरोवेणुरववत्वरोत्थिताउहृत्यदोर्भिःपरिरभ्यनिर्भरं स्नेहस्नुतःस्तन्य
पयःसुधासवंमत्वापरंब्रह्मसुतानपाययन् २२ ततोनृपोन्मर्दनमज्जलेपना
लंकाररक्षातिलकाशनादिभिः संलालितःस्वाचरितैःप्रहर्षयन्सायंगतो
यामयमेनमाधवः २३

उ आसववत्सादकंपाययामासुरित्यर्थः २२ एवंयामयमेनचततत्कालक्रीडनादितियमेनसायंगतः
प्राप्तः स्वाचरितैः स्वस्याचरितैः शोभनैराचरितैर्वामातॄः प्रहर्षयन् ततस्ताभिरुन्मर्दनादिभिरुपला ५२
लितइति ३३

57A गवांमोहनमाह गावइति परिहूताश्चाहूताश्चतेसंगताश्चतान्वत्सतरानापाययामासुरित्यर्थः २४
एतावत्तुवैषम्यंकृष्णस्यापिदुर्निवारमासीदित्याह गोगोपीनामितिगवांगोपीनांचअस्मिन्कृष्णेमातृ

गावस्ततोगोष्ठमुपेत्यसत्वरंहुंकारघोषैःपरिहूतसंगतान्
क्षा स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहन्त्यःस्रवदौधसंपयः २४
गोगोपीनांमातृतास्मिन्सर्वास्नेहर्द्धिकांविना पुरोवदास्वपि
हरेस्तोकतामायया विना २५

ताउपलालनादिरूपापुरोवदेवआसीत् किंतुस्नेहर्द्धिकांविनांस्नेहाधिक्यंतुइदानींविशेषइत्यर्थः आसु
गोपीषुहरेस्तोकताचबालभावनापिएवंपुरोवदेवासीत् किंतुमाययाविना ममेयंमाताहमस्याःपुत्रइति
मोहंविनेत्यर्थः २५

श्री॰ स्नेहवृद्धिमेवदर्शयति व्रजौकसामिति यथाकृष्णेयशोदानंदनेस्वपुत्रेभ्योपिस्नेहाधिक्यंपूर्वमासीत् इदा
नींस्वतोकेष्वपितथैवावर्द्धतेत्यर्थः आब्दं यावद्वत्सरंनिःसीमंयथाभवति २६ एवमात्माश्रीकृष्णोव
भा॰ द॰ त्सपोभूत्वातत्रापिवत्सानांपालनानांचमिषेणात्मानमात्मनापालयन्क्रीडितवानित्यर्थः २७ एतावत्पर्यं
टी॰
५८
58

व्रजौकसांस्वतोकेषुस्नेहोवल्ल्याब्दमन्वहं शनैर्निःसीमववृधेयथाकृष्णेचपूर्ववत् २६ इत्थ
मात्मात्मनात्मानंवत्सपालमिषेणसः पालयन्भगवान्वर्षंचिक्रीडेवनगोष्ठयोः २७ एकदा
चारयन्वत्सान्सरामोवनमाविशत् पंचषासुत्रियामासुहायनापूरणीष्वजः २८ ततोविदू
राच्चरतोगावोवत्सानुपव्रजे गोवर्द्धनाद्रिशिरसिचरंत्योददृशुस्तृणं २९

तेरामस्यापिमोहनएवासीत् संवत्सरांतेतुकथंचित्विज्ञातवानितिदर्शयन्नाह एकदेति पंचषासु
पंचसुवाषट्सुवारात्रिषु हायनस्यापूरणीषुपूरकतयाऽवशिष्टास्वित्यर्थः २८ ततोदूरतएवगोवर्द्धन ५८
शिखरेचरंत्योगावोव्रजसमीपेचरंतोवत्सान्ददृशुः २९

58A

तदैवसगोव्रजोगवांकलापः तत्स्नेहवशाः तेषांवत्सानांस्नेहेनाकृष्टः अतएवनस्मृतआत्मायेनसः ज
वेनउपव्रजमगात् कथंभूतः अत्यात्मपदुर्गमार्गः अतिक्रांतः आत्मपान् गोपालान् यः सोत्यात्मपः तथा
दुर्गमोमार्गोयस्यसचसच तथायुक्ताभ्यांपद्भ्यांधावत् द्विपादिवप्रतीयमानः ककुदिआकुंचिताग्रीवा
यस्यसः उदास्यपुच्छः उन्नमितान्यास्यानिपुच्छानियेनसः आस्रुपयाः सर्वतःस्रवंतिपयांसियस्यसः आ

दृष्ट्वाथतत्स्नेहवशोस्मृतात्मासगोव्रजोत्यात्मपदुर्गमार्गः द्विपात्ककुद्ग्रीवउदास्यपुच्छोगाद्धुंकृ
तैरास्रुपयाजवेन ३० समेत्यगावोधोवत्सान्वत्सवत्योप्यपाययन् गिलंत्यइवचागांनिस्रवंत्यः
स्वौधसंपयः ३१ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना दुर्गाध्वकृच्छ्रतोभ्येत्यगोवत्सैर्ददृशुः
सुतान् ३२

आस्रुपयाइतिपाठेसएवार्थः गोव्रजइत्यनेनवृषभादयोप्युपरिसूक्तं ३० तत्रविशेषतोधेनूनांचेष्टितमाह
समेत्येति गोवर्द्धनस्याधःवत्सवत्यःपुनःप्रसूताअपि ३१ रामेणदृष्टवत्सेषुगवांस्नेहातिशयमुक्त्वा गोपा
नामपिदर्शयितुमाह गोपाइति तासांगवांरोधनेयआयासः तस्यमौघ्येनमोघत्वेनलज्जायासहोरुमना
दुर्गमार्गेजनितक्लेशेनचाभ्येत्यगोवत्सैःसहसुतान्ददृशुः ३२

श्री. भा. द. पू. ५९
59

ततश्चतेषामीक्षणेनोद्गतोयः प्रेमरसस्तस्मिन्नास्थितानिमग्नाः आशयायेषांतेलज्जामन्युत्कण्ठेतानपित्ता
दुपितमागताः संतोऽपिगतमन्यवः प्रसूतजातोनुरागोयेषांते मूर्द्धनिघ्राणैरवघ्राणैः परमांमुदमापुः ३३
कृच्छ्रान्नतोपगतः निवृत्ताः तेषांस्तनानामनुस्मृत्या उद्गच्छन्त्यश्रूणियेषांते ३४ प्रेमर्द्धेरौत्कंठ्यमतिशयंशु
कृतत्वनेष्वर्भकेषुवीक्ष्यहेतुमजाननिवाचिंतयन् ३५ चिंतामेवाहद्वाभ्यां किमेतदिति वासुदेवेयथापुराप्रेम

तद्वीक्षणोत्प्रेमरसाप्लुताशयाजातानुरागागतमन्यवोर्भकान् उदुह्यदोर्भिः परिरभ्यमूर्द्धनिघ्रा
णैरवापुःपरमांमुदंते ३३ ततःप्रवयसोगोपास्तोकाश्लेषसुनिर्वृताः कृच्छ्राच्छनैरपगतास्तदनुस्मृत्यु
दश्रवः ३४ व्रजस्यरामः प्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणं मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिंतयत् ३५
किमेतदद्भुतमिववासुदेवेऽखिलात्मनि व्रजस्यसात्मनस्तोकेष्वपूर्वंप्रेमवर्द्धते कोयंवाकुतआयातो
दैवीनावार्युतासुरी प्रायोमायास्तुमेभर्त्तुर्नान्यामेपिविमो॰

तथास्वतोकेष्वपिव्रजस्यप्रेमावर्द्धते किमेत
दद्भुतमिति किंचसात्मनोमत्तादितस्यव्रजस्यममतेषुप्रेमकारणंकिमितिभावः ३६ कोयंमायादेवानांवान
राणांवाअसुराणांवा कुतोवाकस्मात्प्राप्तुक्त तत्रान्यमायानसंभवति यतोममापिमोहावर्जते अतःप्रा
यशोमत्स्वामिनः श्रीकृष्णस्यैव मायेयमस्त्विति संभावयति ३७

59A

सवयसान्सर्वानपि वयुनेनज्ञानमयेनचक्षुषावैकुंठंश्रीकृष्णमेवापश्यत् ३८ एवंकृष्णस्वरूपान् सा
मान्यतोज्ञात्वाकृष्णंदृष्ट्वाश्रीकृष्णोपदेशेनविशेषतोज्ञातवानित्याह नैतइति अयमर्थः पालिमानास्तावद्वत्सा
ऋषीणामंशाःपालाश्चदेवानामंशाइतितावदहंवेद्मिइदानींतुनतथाकिंतुअस्मिन्भिदाश्रयेपित्वमेवभा

इतिसंचिंत्यदाशार्होवत्सान्सवयसानपि सर्वानाचष्टवैकुंठंचक्षुषावयुनेनसः ३८ नैतेसुरेशाऋ
षयोनचैतेत्वमेवभासीशभिदाश्रयेपि सर्वंपृथक्त्वंनिगमात्कथंवदेत्युक्तेनवृत्तंप्रभुणाबलो
वैत् ३९ तावदेत्यात्मभूरात्ममानेनत्रुट्यनेहसा पुरोवदाब्दंक्रीडंतंददृशेसकलंहरिम् ४० यावं
तोगोकुलेबालाःसवत्साःसर्वएवहि मायाशयेशयानामेनाद्यापिपुनरुत्थिताः ४१

सि अतस्त्वंसर्वंपृथग्विविच्यकथंवृत्तमितिवदेत्युक्तेनप्रभुणांवक्रान्निगमात्संक्षेपतएवोक्तंवृत्तं बलोवै
त्तविदितवानित्यर्थः ३९ ततःकिंवृत्तमित्यपेक्षायामाह तावदिति वर्षेजातेआत्मनोमानेनत्रुट्यनेहसा
त्रुटिमात्रेणकालेनसकलंसानुचरंहरिंददर्श ४० दृष्ट्वाचव्यतर्कयदित्याह यावंतइतिद्वाभ्यां मेमा
याशयेमन्मायातल्पे ४१

मन्मायामोहितेभ्यइतरेकुत्रत्याःइति ४२ वितर्कयन्नमस्यदित्याह एवमेतेषुभेदेषुचिरंध्यात्वासआ
श्री॰ त्मभूरितिवापाठः ४३ ४४ ननुमायाश्रयस्यतस्यकुतोमोहइत्यतआह तस्यामिति महामायाविनिभ
भा॰द॰ गवति स्वल्पमाययाआवरणविक्षेपकत्वाभावेदृष्टान्तद्वयमाह तस्यान्तमिस्रायांरात्र्यांनैहारंहिमकण
पू॰ प्रभवंतमइवतन्निहितात्थोपसर्जनस्यापितमसोनैहारमितिविशेषणंछांदसं तत्रमाययाऽदृश्यगावरणं
६॰
60

इतएतेऽत्रकुत्रत्यामन्मायामोहितेतरे तावंतएवतत्राब्दंक्रीडंतोविष्णुनासमं ४२ एवमेतेषुभे
देषुचिरंध्यात्वासआत्मभूः सत्याःकेकतरेनेतिज्ञातुंनेष्टेकथंचन ४३ एवंसंमोहयन्विष्णुंविमो
हंविश्वमोहनं स्वयैवमाययाजोपिस्वयमेवविमोहितः तस्यांतमोवन्नैहारंखद्योतार्चिरिवाह
नि महतीतरमायैश्यंनिहंत्यात्मनियुंजतः ४५ तावत्सर्वेवत्सपालाःपश्यतोजस्यतत्क्षणात्
व्यदृश्यंतघनश्यामाःपीतकौशेयवाससः चतुर्भुजाःशंखचक्रगदाराजीवपाणयः किरीटिनःकुं °ण्°

नकरोति किंतुतत्रैवलीयतेयथाचखद्योतार्चिरह्निपृथक्प्रकाशंनकरो \\ डलिनोहारिणोवनमालि
ति एवंमहतिपुरुषेयुंजतःपुंसइतरानीचमायातत्रनकिंचित्करोति किंतुआत्मनिस्वस्मिन्नेवऐश्यंसामर्थ्यं ६॰
निहंतीति ४५ अन्यदप्याश्चर्यमाह तावदिति वत्सपालाःवत्साःपालाश्चसर्वेयष्टिविषाणादयश्च ४६ ४॰

60A

श्रीवत्सप्रभायुक्तानि अंगदानि येषु येषां रत्नमयानि कंबुवत्त्रिधाग्राणि कंकणानि वाणिषु येषां ते च तैश्च ४८ तथाभूरिबहुजन्मार्जितपुण्यंपतद्युक्तैर्जनैरर्पितैः ४९ चंद्रिकावद्विशदस्मितयुक्तैः सद्दारुणगुणेन वर्तमानायैःपांगास्तैर्वीक्षितैः स्वकार्याणां स्वभक्तमनोरथानां रजःसत्त्वाभ्यां स्रष्टृपालकाश्च ब्रह्मशंभत

श्रीवत्सांगददोरत्नकंबुकंकणपाणयः नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः ४८
आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः
४९ चंद्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः स्वकार्थानामिव रजःसत्त्वाभ्यां स्रष्टृपा
लकाः ५० आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः नृत्यगीताद्यनेकार्हैः पृथक्पृथ
गुपासिताः ५१ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः चतुर्विंशतिभिस्तत्वैः परी
तामहदादिभिः ५२

सत्त्ववद्विशदस्मितेन पालकाश्च रजोवदरुणगुणेन स्रष्टारश्च वताद्दृक्कटाक्षैर्द्योतमानाः स्वार्थः ५० आत्मा
ब्रह्मा तदादिस्तंबपर्यंतैरनेकार्हैः अनेकार्हणैः ५१ अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः
महदादिभिरिति महत्तत्त्वत्रयोः पृथक्त्वविवक्षया चतुर्विंशतितत्त्वैर्जगत्कारणैः ५२

श्री कालादिभिश्च तत्सहकारिभिः तत्र स्वभावः परिणामहेतु संस्कारउद्बोधकः स्वमहिध्वस्तमहिभिः भ
भा॰द॰ गवन्महिम्नातिरस्कृतस्वातंत्र्यैः उक्तैः सर्वैरणिमाद्यैः ५३ सर्वेषां मूर्तिमत्वेपि विशेषमाह सत्यज्ञानेति स
पू॰ त्याश्च ज्ञानस्वरूपाश्च अनंताश्च आनंदरूपाश्च तत्रापि तदेकमात्रा विजातीयसंभेदरहिताः तत्रापि चैकरसाः
६१ सदैकरूपा मूर्तयो येषां ते यद्वा सत्यज्ञानादिमात्रैकरसं यद्ब्रह्म तदेव मूर्तिर्येषामिति अतएव उपनिषत् आ
61 त्मज्ञानमेव दृक् चक्षुर्येषां तेषामपि हि निश्चितं अस्पृष्टभूरिमाहात्म्याः न स्पृष्टं स्पर्शायोग्यं भूरिमाहात्म्यं येषां

कालस्वभावसंस्कारकामकर्मगुणादिभिः स्वमहिध्वस्तमहिभिः मूर्तिमद्भिरुपासिताः ५३ सत्यज्ञा
२ नानन्तानंदमात्रैकरसमूर्तयः अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशां एवं सकृद्ददर्शाजः परब्रह्मा
त्मनोखिलान् यस्य भासा सर्वमिदं विभाति सचराचरं ५५ ततोतिकुतुकोद्वृत्यस्तिमितैकादशेंद्रियः
तद्धाम्नाभूदजस्तूष्णीं पूर्देव्यंतीव पुत्रिका ५६

ते तथाभूताः संतः सर्वे दृष्टा इति ५४ एवं सकृत् एकदैव दद
र्श परब्रह्मणो विशेषणं यस्येति ५५ अतिकुतुकेनाश्चर्येण उद्धृत्य हृष्टी परावृत्य हंसपृष्ठे निपात्येति वा उद्वृतक
शब्देन तृतीयायाश्छांदसो लुक् यद्वा उद्वृत्य इति छेदः अतिकुतुकेनोद्वृत्य विलोक्य विचार्य विपर्यस्तत्वादस्मि
निति यावत् पाठांतरे तु अतिकुतुकेनोद्वृतः स्तिमितः तेषां धाम्ना तेजसा स्तब्धसर्वेंद्रियो ब्रह्मा तूष्णीं निश्चलोभू
त् अत्र दृष्टांतः पूर्देवी व्रजाधिष्ठात्री काचिद्देवता तस्याः अंतिके समीपे पुत्रिका च तत्पुरस्त्रीकृतकप्रतिमेव ५६ ६१

61A

एवंमोहमग्नमजमुजग्न्हारेमाह इतीतिइरेशेइरासरस्वतीतस्याईशेब्रह्मणःकिमिदमितिमुह्यतिसतिपश्चात्त
दृष्टुमप्यनीशेसति परमोजननःश्रीकृष्णःसपदिअजाजवनिकांमायारूपांतिरस्करिणीं यथाद्भुतेदर्शितेतां
चच्छादतिरोधत्त अपसारितवानित्यर्थः अथवाअयंलोकाभिमानीममैस्वर्यंद्रष्टमयोग्यइतितस्योपरिमायां
प्रसारितवानिति कमुह्यतिसति अतर्क्येतर्कागोचरे निजअसाधारणोमहिमायस्यतस्मिन् इतिमोहेहेतु

इतीरेशेतर्क्यैनिजमहिमनिस्वप्रमितिकेपरत्रातोतस्मिन्निरसनमुखब्रह्मकमितौ
अनीशेपिद्रष्टुंकिमिदमितिवामुह्यतिसतिचच्छादाजोज्ञात्वासपदिपरमोजाजवनि
कां ५७ ततोर्वाक्प्रतिलब्धान्तःकःपरेतवडस्थितः कृच्छ्रादुन्मील्यवैदृष्टीराचष्टेद
सहात्मनाम् ५८

रकः दर्शनायोग्यत्वायत्रीणिविशेषणानि स्वप्रमितिके स्वप्रकाशंचतत्कंसुखंचयस्मिन् अतएवअजातः
प्रकृतेःपरत्रपरस्मिन् अतएवअतन्निरसनमुखेनब्रह्मकैः श्रुतिशिरोभिर्मितिज्ञानंयस्मिंस्तस्मिन्स्वरूपे
५७ अर्वाक्त्ववहिःप्रतिलब्धान्यज्ञानानियेनसापरेतवतमृतोयादिपुनःकथंचित्सजनस्तन्निष्ठतितथाहदृष्टीनेत्रा

श्री॰ भा॰द॰ टी॰ ६२

62

जनानामाजीव्यैर्द्रुमैराकीर्णं समाप्रियं सततानिश्रामसमंतात्प्रियाणियस्मिंस्तत् ५९ तदाह यत्रेति नै
सर्गदुर्वैराः स्वाभाविकाः प्रतिकार्यवैरवंतोपिनराः सिंहादयश्चमित्राणीवयत्रसहैवासन् अजितस्यावासे
नतद्रुताः पलायिताः रुट्तर्षादयः क्रोधलोभादयोयस्मात्तथाभूतं वृंदावनमपश्यदिति ६० तत्रचपरमेष्ठी
ब्रह्मापुराऽथवंवदेवब्रह्मचरंतमपश्यत् कथंभूतं पशुपवंशशिशुत्वनाट्यमुद्वहन् नाट्यमित्यत्रहेतुः अद्वय

मपंधेवाभितः पश्यन्दिशोपश्यन्पश्चरः स्थितं वृंदावनंजनाजीव्यद्रुमाकीर्णंसमाप्रियं ५९ यत्रनै
सर्गदुर्वैराः सहैवासन्मृगादयः मित्राणिवाजितावासद्रुतरुट्तर्षकादिकं ६० तत्रोद्वहत्पशुपवंश
शिशुत्वनाट्यंब्रह्माद्वयंपरमनंतमगाधबोधं वत्सान्सखीनिवपुरापरितोविचिन्वदेकंसपाणिकव
ज लंपरमेष्ठ्यचष्ट ६१ दृष्ट्वात्वरेणनिजधोरणतोवतीर्यपृथ्व्यांवपुःकनकदंडमिवाभिपात्य स्पृष्ट्वाच
तुर्मुकुटकोटिभिरंघ्रियुग्मंनत्वामुदश्रुसुजलैरकृताभिषेकं ६२

मित्यादि अद्वयंचवत्सान्सखीन्
विचिन्वन् एकंचसखीन्अगाधबोधंचविचिन्वन् अनंतंचपरितोविचिन्वन् परंचशिशुत्वमुद्वहन् अस्यच
सपाणिकवलमितिनाट्यमेवोद्वहदित्यर्थः ६१ निजधोरणतः स्ववाहनात्त्वरेणवेगेनावतीर्यदंडवन्नत्वा चत
र्णांमुकुटानामग्रैरंघ्रियुग्मंस्पृष्ट्वामुदश्रुसुजलैः आनंदाश्रुरूपैस्सुजलैरभिषेकमकरोदिति ६२ ६२

62A

चिरस्यचिरंपादयोःपतन्नास्ते ६२ सवेपथुःसकंपाश्रुतएवगद्गदयाश्रुकरणमेतत् इत्थयावाचापेडतश्रस्तो
त् ६४ इतिदशमेत्रयोदशः १३ चतुर्दशेऽद्भुतंदृष्ट्वाऽर्वागतत्वकनिश्चये अनीशःकर्तुमस्तोषीत्कृस्नंब्रह्माविमोहि
तः स्वकृतापराधीनमियासकंपतयाभगवन्महिमानमनवगाह्यमानोयथादृष्टस्वरूपमेवकीर्तयन्नाह नौ
मीति हेईड्यस्तुत्यतेतुभ्यंनौमिद्वितीयार्थेचतुर्थी अथवानौमीस्तुत्वाप्रकरणागतस्यप्रस्तुतस्यभगवतःक

उत्थायोत्थायकृष्णस्यचिरस्यपादयोःपतत् आस्तेमहित्वंप्राग्दृष्टंस्मृत्वास्मृत्वापुनःपुनः ६२ शनै
रथोत्थायविमृज्यलोचनेमुकुंदमुद्वीक्ष्यविनम्रकंधरः कृतांजलिःप्रश्रयवान्समाहितःसवेपथुर्ग
द्गदयैलयेडत ६४ इतिश्रीभागवतेदशमेत्रयोदशः १३ श्रीब्रह्मोवाच नौमीड्यतेऽभ्रवपुषेतडिदंबरा
यगुंजावतंसपरिपिंछलसन्मुखाय वन्यस्रजेकवलवेत्रविषाणवेणुलक्ष्मश्रियेमृदुपदेपशुपां

र्मत्वेज्ञातेप्रयोजनापेक्षायामेवंभूतोभगवान्नेवप्रयोजनमितितादर्थ्येचतुर्थी यद्वातुभ्यंत्वामेवप्रसादयि
तुंत्वामेवस्तौमीत्यर्थः अभ्रवद्वपुर्यस्यतस्मै तडिद्वदंबरंयस्यतस्मैगुंजाभिरवतंसौकर्णभूषणौपरिपिंछं
चबर्हापीडंताभ्यांलसन्मुखंयस्यतस्मै वन्यास्रजोयस्यतस्मैकवलादिभिर्लक्ष्मभिः श्रीःशोभायस्यतस्मै मृदू
पादौयस्यतस्मै पशुपस्यांगजाय १

ननु नौमीति प्रतिज्ञाय किं स्वरूपानुवादमात्रं क्रियते अत आह अस्यापीति भो देव अस्यापि सुलभत्वेन प्रा-
काशितस्यापि तव वपुष अवतारस्य महिमानं अवसितं ज्ञातुं कोपि कः ब्रह्मा अहमपि न ईशे न शक्तोस्मि य
द्वा कश्चिदपि न ईशे न समर्थ आसीत् सुलभत्वाय विशेषणद्वयं मदनुग्रहस्य ममानुग्रहो यस्मात् तन्मद
नुग्रहं तस्य किं च स्वेच्छामयस्य स्वाधीनानां भक्तानां यथा यथेच्छा तथा तथा भवतः तर्हि किमिति ज्ञातुं न शा

अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोपि
नेशे महि त्ववसितुं मनसान्तरेण साक्षात्तवैव किमुतात्मसुखानुभू
ते २

क्यते अत आह न तु भूतमयस्य अपि तु विशुद्धसत्वात्मकस्य यदा स्यैवं तदा कथं पुनः साक्षात्तव केवलस्यात्मसुखा
नुभूतेरेव स्वस्वभावानुभवमात्रस्यावृतारिणो गुणातीतस्य महिमानं अन्तरेण निरुद्धेनापि मनसा को वा ज्ञातुं समर्थो
भवेत् अथवा भूतमयस्यापि तव विराड्रूपस्य तवत्वन्नियम्यस्य वपुषः महि अवसितुं कोपि नेशे तदा साक्षा ६३
त्तवैवामायावरणस्य नियम्यनियन्तृभेदरहितस्य अकलक्षणस्यापि महिमानमवसितं कोपि नेशे इति किमु वक्तव्यं

63A तर्हिमुक्ताः कथंसंसारंतरेयुरतआह ज्ञानइती ज्ञानसाधनप्रयासंश्रमंउदपास्यईषदप्यकृत्वा सद्भिर्मु-
खरितांस्वतएवनित्यंप्रकटितांभवदीयांवार्तांस्वस्थानेएवस्थिताः तत्सन्निधिमात्रेणस्वतएवश्रुतिगतां
श्रवणंप्राप्तांतनुवाग्मनोभिर्नमंतः सत्कुर्वंतोयेजीवंतिकेवलंयद्यपिनान्यत्कुर्वंतितैः प्रायशस्त्रिलो-
क्यामन्यैरजितोपित्वंजितः प्राप्तोसीतिकिंज्ञानश्रमेणेत्यर्थः ३ भक्तिविनाज्ञानंनैवसिध्येदित्याह श्रेयः

ज्ञानेप्रयासमुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्तां स्था
नेस्थिताः श्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोजितजितोप्यसितैस्त्रिलो
क्यां श्रेयस्सृतिंभक्तिमुदस्यतेविभोक्लिश्यंतियेकेवलबोधलब्धये तेषाम
सौक्लेशलएवशिष्यतेनान्यद्यथास्थूलतुषावघातिनां ४

सृतिमिति श्रेयसामभ्युदयापवर्गलक्षणानांसृतिःस्रवणंयस्याःसरसइवनिर्झराणांतांतेतवभक्तिंमु-
दस्यत्यक्त्वाश्रेयसांमार्गभूतामितिवा केवलबोधलब्धयेयेयत्नंकुर्वंति तेषांक्लेशलःक्लेशएवावशिष्य
ते नश्रेयंभावः यथाअल्पप्रमाणंधान्यंपरित्यज्यअतःकणहीनान्स्थूलधान्याभासांस्तुषानवघ्नंति तेषां
नकिंचित्फलं एवंभक्तिंतुच्छीकृत्ययेकेवलबोधायप्रयतंतेतेषामपीति ४

श्री॰
भा॰ द॰
टी॰
६५
64

भक्त्यैव ज्ञानं नान्यथेत्यत्र सदाचारं प्रमाणयति पुरेति हे भूमन् इह लोके पूर्वं योगिनोऽपि सन्तो योगेन ज्ञानमप्रा
प्य पश्चात्त्वदर्पितेहाः त्वय्यर्पिता लौकिक्य ईहाश्चेष्टा यैस्तेऽपि निजकर्मलब्धया त्वदर्पितैः निजैः कर्मभिर्लब्धया
त्वदर्पितानीहाश्च निजानि कर्माणि च तैर्लब्धयेत्येकं पदं वा कथोपनीतया कथया त्वत्समीपं प्रापितया भक्त्यैव वि
बुध्य आत्मानं ज्ञात्वा अतः स्वरूपेणैव ते परां गतिं प्राप्ताः ५ एवं तावत्सगुणनिर्गुणयोरुभयोरपि ज्ञाने उपायमिति
त्वत्कथया श्रवणादिनैव तत्त्वप्राप्तिर्नान्यथेत्युक्तं इदानीं यद्यप्युभयोरपि विशेषणद्वैतेऽयत्वमुक्तं तथापि गुणा

पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया विबुध्य भक्त्यैव कथो
पनीतया प्रपेदिरेञ्जोऽच्युत ते गतिं परां ५ तथापि भूमन्महिमागुणस्य ते विबोद्धुम
र्हत्यमलान्तरात्मभिः अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ६

तीतस्य ज्ञानं कथंचिद्भवेत् न तु सगुणस्य तत्त्वं अचिन्त्यानन्तगुणत्वादिति श्लोकद्वयेन तथापीति हे भूम
न् अपरिच्छिन्नस्यागुणस्य ते महिमा अमलैरन्तरात्मभिः अस्माद्वैतैरिन्द्रियैः विबोद्धुं बोधगोचरीभवितुमर्ह
ति योग्यो भवति अथवा विबोद्धुं ज्ञातुमर्हति अर्हितेः शक्यत इत्यर्थः यद्वा महिमेति महिमानं किं विबोद्धुम ६५
र्हतीत्यर्थः कथं स्वानुभवात् आत्माकारान्तःकरणसाक्षात्कारात् ननु

64A

तद्धारणमपि सविकारमेव विषयीकरोति इति कथमात्माकारतात्स्येत्यत आह अविक्रियादिति विक्रि
याविशेषाकारस्तद्रहितात् विशेषपरित्याग एवात्माकारतेत्यर्थः नन्वेतः कारणसात्माकारविषयत्वेनात्म
त्वप्रसंगः स्यादत आह अरूपत इति रूपं विषयः अविषयात् वृत्तिविषयत्वमेवात्मनो न फलविषयत्वमतो
नायं दोष इति भावः कथं तर्हि स्फूर्तिः अनन्यबोध्यात्मतया स्वप्रकाशत्वेनैव न तत्वन्यथा इदं तदिति विषयत्वेने

गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य का
लेन यैर्वा विमिताः सुकल्पैः भूपांसवः खे मिहिका द्युभासः ७

त्यर्थः अथवा भासा सर्वतोन्तरंगा लक्ष्मीरपि अगुणस्य ते महिमानं अमलैरंतर्वृत्तिरिंद्रियैरपि तथ्यायाहकु वस्तुतः
तेन रूपेण विबोद्धुं किमर्हति नार्हतेवेत्यर्थः कथं तर्ह्यर्हति तदाह स्वानुभवादित्यादिना उक्तार्थमेवतत् ६
गुणात्मनो गुणाधिष्ठातुस्तेतव पुनर्गुणान् विमातुं एतावंत इति गणयितुं अपि के ईशिरे समर्था बभूवुः हिता
त्तद्विशेषवार्ता कथंभूतस्य तव अस्य विश्वस्य हिताय पालनाय वड्रूपावड्गुणाविष्कारेणावतीर्णस्य ननु का
लेन निपुणैः किमशक्यमत आह कालेनेति बाणाह्नो वितर्कैः सुकलैरतिनिपुणैर्बहुजन्मना कालेन भूपर

श्री॰ भा॰ द॰ पृ॰ ६५ 65

माणवोपिविमिताविशेषेणगणिताभवेयुः तथाखेमिहिकाहिमकणाअपि तथाशुभासःदिविनत्त्वादि
किरणपरमाणवोपि ७ तस्मान्मुक्तिरेवसंगच्छतइत्याह तत्तेनुकंपामिति ससमीक्षमाणस्तवकृपाकदाभवि
ष्यतीतिबहुमन्यमानः स्वार्जितंचकर्मफलमनासक्तः संभुंजानएवनाःतीवतपआदिनाक्लिश्यन्नेवंयोजीवेत्
समुक्तिदायभाग्भवति भक्तस्यजीवनव्यतिरेकेणदायप्राप्ताविवमुक्तौनान्यदुपयुज्यतइतिभावः ८ तदेवं

तत्तेनुकंपांससमीक्षमाणोभुंजानएवात्मकृतंविपाकं हृद्वा
ग्वपुर्भिर्विदधन्नमस्तेजीवेतयोमुक्तिपदेसदायभाक् ८ प
श्येशमेनार्यमनंतआद्येपरात्मनित्वय्यपिमायिमायिनि मा
यांवितत्येक्षितुमात्मवैभवंह्यहंकियानैच्छमिवार्चिरग्नौ ९

स्तुत्वाभगवंतंतमापयितुंस्वापराधंनिवेदयति पश्येति हेईशमेअनार्यंदौर्जन्यंपश्यपश्ययदहंमायिनामपिमायि-
निविमोहकेत्वय्यपिस्वमायांप्रसार्य आत्मैश्वर्यमीक्षितुमैच्छंअभिलषितवान् अहोएवंकर्तुंअहंत्वयिकियान् ६५
न् नकिंचितयथाग्नेरुद्भूताज्वालाःअग्नौनकिंचित्तद्वदिति ९

65A रजोभवः रजसोजातस्यअतोजानतः अतएवाजावलेपांधतमोंधचक्षुषः अजोजगत्कर्ताहमितिमदेनगाढत
मोन्धपेणांधीभूतनेत्रस्यअतस्त्वत्तः पृथगीशमानिनः अमत्रप्रभुत्वेनवर्तमानोपिमयिनाथेसतिनाथवान् मद्भ
त्यएव अतएवोनुकंप्य इतिमत्वात्क्षमस्वेत्यर्थः ९ ननुब्रह्मांडविग्रहःत्वमपिईश्वरएवेतिचेत्तत्राह काहमिति

अतःक्षमस्वाच्युतमेरजोभुवोह्यजानतस्त्वत्पृथगीशमानिनः अजावलेपांधत
मोंधचक्षुषएषोनुकंप्योमयिनाथवानिति । क्वाहंतमोमहदहंखचराग्निवा
र्भूसंवेष्टितांडघटसप्तवितस्तिकायः क्वेदृग्विधाविगणितांडपराणुचर्यावा
ताध्वरोमविवरस्यचतेमहित्वं ॥

तमः प्रकृतिः महानहंकारः खंआकाशंचरोवायुःअग्निः वार्जलंभूःस्वप्रकृत्यादिपृथिव्यंतैरेतैः संवेष्टितोयोंडघटः
सएवतस्मिन्वास्वमानेनसप्तवितस्तिःकायोयस्यसोहंक्वक्वचतेमहित्वं कथंभूतस्य ईदृग्विधानियानिविगणि
तान्यंडानितएवपरमाणवः तेषांचर्यापरिभ्रमणंतदर्थंवाताध्वानोगवाक्षाइवरोमविवराणियस्यतस्यतवअतो
तितुच्छत्वान्मयानुकंप्योहमिति ॥

श्री·
भा·द·
पु·
११
66

अपिचगर्भगतस्यशिशोः पादयोरुत्क्षेपणंमातुः किमपराधायभवतिलोकेप्रसूतहर्षोयस्मात्‌अस्तिनास्तिव्य
पदेशाभ्यांभावाभावशब्दाभ्यांस्थूलसूक्ष्मकार्यकारणशब्दैः वाभूषितमभिहितं एतेषांशब्दानांभुविविषयेउषितं
स्थितमितिवासर्वंवस्त्वित्यर्थः हेअधोक्षजतवकुक्षेः अनंतः वहिः कियदपिकिंचिन्मात्रमपिकिमस्तिनकिंचि
दस्तीत्यर्थः अतः सर्वस्यतवकुक्षिगतत्वेनममापितथात्वात्तत्वदपराधः सोढव्यइतिभावः १२ किंचविशे

उत्क्षेपणंगर्भगतस्यपादयोः किंकल्पतेमातुरधोक्षजागसे किमस्तिनास्ति
व्यपदेशभूषितंतवास्तिकुक्षेः कियदप्यनंतः १२ जगत्त्रयांतोदधिसंप्लवो
देनारायणस्योदरनाभिनालात् विनिर्गतोजस्त्वितिवाङ्नवैमृषाकिंत्वीश्व
रत्वन्नविनिर्गतोस्मि १३

इतोपित्वत्तोममजन्मप्रसिद्धमित्याह जगत्त्रयस्यांतेप्रलयेयउदधीनांसंप्लवः संश्लेषः तस्मिन्नुदे उदके नाराय
णस्योदरेनाभिः तस्यनालादजोनिर्गतइतियावाक्‌सातावन्मृषानभवतिवैनिश्चितंतथापितदेईश्वरत्वत्तः ११
अहंकिंनविनिर्गतः नोत्पन्नोस्मिअपितुत्वत्तएवोत्पन्नइत्यर्थः १३

66A

तर्हिंनारायणस्यपुत्रःस्याःममकिंमाययातंतत्राह नारायणस्त्वमिति नहीति काक्वात्वमेवनारायणइत्यापाद
यति कुतोहंनारायणइतिचेत्तत्राह सर्वदेहिनामात्मासिएवमपिकिंनारायणोनभवसि नारंजीवसमूहो अ
यनमाश्रयोयस्यसतथेति त्वमेवसर्वदेहिनामात्मत्वान्नारायणइतिभावः हेअधीशत्वंनारायणोनहीतिपुनःका
कुः अधीशःप्रवर्तकः ततश्चनारस्यायनंप्रवृत्तिर्यस्मात्सतथेति पुनस्त्वमेवासावित्ति किंचत्वमखिललोकसा
क्षी अखिलंलोकंसाक्षादपश्यस्ततोनारमयसेजानासीतित्वमेवनारायणइत्यर्थः नन्वेवंनारायणपदव्युत्पत्तौ

नारायणस्त्वंनहिसर्वदेहिनामात्मास्यधीशोखिललोकसाक्षी ना
रायणोंगंनरभूजलायनात्तच्चापिसत्यंनतवैवमाया १४

भवेदेवंतत्त्वन्यथाप्रसिद्धमित्याशंक्याह नारायणोंगमिति नराउद्भूतायेर्थाःचतुर्विंशतितत्त्वानितथानराज्जा
तेयज्जलेतदयनाद्योनारायणप्रसिद्धः सोपितवैवांगंमूर्तिः तथाचस्मर्यते नराज्जातानितत्त्वानिनारायणीतिवि
दुर्बुधः तस्यतान्ययनंपूर्वंतेननारायणःस्मृतइति तथा आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताः
पूर्वंतेननारायणःस्मृतइतिननुमन्मतैरपरिच्छिन्नायाःकथंजलाश्रयत्वंअतआह तच्चापिसत्यंनेति किंतुत
वैवमाया १४

अपरिछेदमेवोपपादयति तच्चेदिति जगदाश्रयभूतंतवतद्वपुः जलस्थमित्येवंयदिसत्यंस्यात् तर्हितदैव
कमलनालमार्गेणांतः प्रविश्यसंवत्सरशतंविचिन्वतापिमयाहिभगवन्नचिंतैस्वयंतत्रकिमितिनदृष्टं त
दैवकमलनालान्निर्गत्यशतवर्षंतपस्तप्स्याहृदिस्थितंमेमया किंवानसुदृष्टंदृष्टमेवेति पुनःसपद्येवतत्क्षणंत
न्नात् व्यदर्शिअग्रेतद्दानेप्राप्ते अतस्त्वन्मूर्तेर्देशविशेषपरिछेदः सत्योनभवतीत्यर्थः १५ अपिचयदिजलादिप्र
पंचःसत्यःस्यात्तर्हितेनतवपरिछेदोभवेत् सतुमायाविलसितइतितवैवदर्शितइत्याह श्लोकत्रयेणाहमाया

तच्चेज्जलस्थंतवसज्जगद्वपुःकिंमेनदृष्टंभगवंस्तदैव किंवासुदृष्टंहृदिमेतदैवकिंनोसपद्येवपुनर्व्य २
दर्शि १५ अत्रैवमायाधमनावतारेह्यस्यप्रपंचस्यवहिःस्फुटस्य कृत्स्नस्यचांतर्जठरेजनन्यामायात्व ह
मेवप्रकटीकृतंते १६ यस्यकुक्षाविदंसर्वंसात्मंभातियथातथा तत्त्वय्यपीहतत्सर्वंकिमिदंमायया ए

यमनमायोपशमन अत्रैवावतारेवहिःस्फुटस्यापिआत्मनोजठरमध्येजनन्याःप्रदर्शनं १६ ननुवहिःसतएव
वांतर्जठरेप्रतिबिंबोस्तुकुतःसर्वथामायात्वंतत्राह यस्येतियस्यकुक्षौसर्वमिदंयथाभातितत्सर्वंइहापिवहिर व
पितथैवभाति किंचसात्मंत्वत्सहितंतत्तदिदंत्वयिमाययाःविनाकिंघटेतअयंभावः त्वयिप्रतिबिंबश्चेद्बाह्यादि ६०
लोमतयाप्रतीयेतननुतत्तदस्ति तवचादर्शस्थानीयस्यत्वयिप्रतीतिर्नस्यात् अतःसर्वथामिथ्यात्वमेवेति १७

67A अपि च न केवलं जनन्या मम मायापि तथैव दर्शितमित्याह अद्यैवेति त्वदृते त्वां विना अस्य विश्वस्य मायात्वं त्वया
ममैव च तदद्यैव किं न दर्शितं किंतु दर्शितमेव यथा हि एकोसीत्यादि ततस्ततः मया सहाखिलैस्तत्वादिभि
रुपासिताः तावंतस्त्वं चतुर्भुजाः असि जगंति ब्रह्मांडानीति प्रागानुक्तमपि दृष्टमिति ज्ञातव्यं १७ ननु ब्रह्मन् तव मा

अद्यैव त्वदृतेस्य किं मम न ते मायात्वमादर्शितमेकोसि प्रथमं ततो व्रजसुहृद्वत्साः सम
स्ता अपि तावंतोसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावंत्येव जगंत्यभूस्त
दमितं ब्रह्माद्वयं शिष्यते १७ अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य
मायां सृष्टाविवाहं जगतो विधान इव त्वमेषोंत इव त्रिनेत्रः १८

यादर्शितं मुहुरेव चैतत्त्वं कथं प्रपंचवन्मायेत्युच्यते सत्यं किंतु अद्वितीये त्वयि नानात्वं गुणावतारमत्स्याद्यव
तारेष्विव कार्यवशेन स्वतंत्रमायानिर्वचनमित्याह श्लोकद्वयेन अजानतामिति त्वत्पदवीं तव स्वरूपमजानतां
अनात्मनि प्रकृतौ स्थितः आत्मैव त्वं आत्मनैव स्वातंत्र्येण मायां वितत्य भासि कथं जगतः सृष्टावहमिव ब्रह्मेव
विधाने पालने एष त्वमिव अंते त्रिनेत्र इवेति १८

ननुचस्यात्तथापिकथंकुत्सितेषुमत्स्यादिषुजन्म कथंवावामनाद्यवतारेयाञ्चादिकार्पण्यंकथंचास्मिन्नेवक
दाचिद्भयपलायनादिअतआहकोवेत्तीति २० अन्वर्थैःसंबोधनैःदुर्ज्ञेयत्वमेवाह भूमन्नित्यादिभिः भवतऊ
तीर्लीलास्त्रिलोक्यांकोवेत्ति क्ववाकथंवाकदावाकतिवेति अचिंत्यंतवयोगमायावैभवमितिभावः २१ ननु

सुरेष्वृषिष्वीशतथैवनृष्वपितिर्यक्षुयादःस्वपितेजनस्य जन्मासतांदुर्मदनिग्रहायप्रभोविधातःस
दनुग्रहायच २० कोवेत्तिभूमन्भगवन्परात्मन् योगेश्वरोतीर्भवतस्त्रिलोक्यांक्ववाकथंवाकति
वाकदेतिविस्तारयन्क्रीडसियोगमायां २१ तस्मादिदंजगदशेषमसत्स्वरूपंस्वप्नाभमस्तधिषणं
पुरुदुःखदुःखं त्वय्येवनित्यसुखबोधतनावनंतेमायातउद्यदपियत्सदिवावभाति २२

भवत्ववताराणामचिंत्योमहिमाप्रपंचस्यावस्तुत्वेकथंसत्यप्रतीतिरितीमामाशंकांसपरिकरामुपसंहरन्परिह
रति तस्मादिति अस्तधिषणंनिरस्तप्रतिभासंतत्राह मायातइति त्वय्येवोद्यदुद्भवत्अपियत्तन्नश्यत्सदिवे ६८
त्युपलक्षणमेतत् नित्यमिवसुखमिवचेतनमिवचअधिष्ठानभूतस्यतवगुणैस्तथातथाभातीत्यर्थः २२

68A

त्वमेव तत्सत्य इत्याह एकस्त्वंमसत्यः कुतः आत्मा दृश्यमसत्यं दृष्टं न चात्मा दृश्यः अतः सत्यः किंच यद्विकारवत्त
दसत्यं न च त्वयि तन्मात्रद्यः षड्विकाराः सन्तीत्याह आद्यः कारणं अतो न जन्म आद्यत्वे हेतुः पुराणः पुरापि नवः का
योत्सर्वमपि वर्तमान इत्यर्थः अत्र हेतुः पुरुष इति तथा च श्रुतिः सर्वमेवाहसाममिति तत्पुरुषस्य पुरुषत्वमिति
जन्मानंतरास्तित्वलक्षणं विकारं वारयंति नित्य इति सनातन इत्यर्थः पूर्णः अजस्रसुखः अक्षरः अमृत इति च
तुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति पूर्णत्वे हेतुरनंतः अद्वय इति च देशकालपरिच्छेदर

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः नि
त्योक्षरोजस्रसुखो निरंजनः पूर्णाद्वयो मुक्त उपाधितोमृतः २३

हितः वस्तुपरिच्छेदरहितोपि अमृतत्वोपपादनाय उत्पाद्यमाप्यं संस्कार्यं विकार्यं चेति चतुर्विधक्रियाफलं वारय
ति स्वयंज्योतिः निरंजनः उपाधितो मुक्त इति पदत्रयेण अयं भावः तत्रोत्पत्तिराद्य इत्यनेनैव निराकृता प्राप्तिरपि क्रिया
या ज्ञानेन वा भवेत् क्रियया प्राप्तिरात्मपदेनैव निराकृता ज्ञानतः प्राप्तिं वारयति स्वयंज्योतिरिति विकृतिरपि द्रव्या
पाकरणेनावघातेन व्रीहीणामिव उपाध्यपाकरणेन भवेत् तच्चासंगत्वान्न संभवतीत्याह मुक्त उपाधित इति संस्कारो
पि किमतिशयाधानेन मलापाकरणेन वा तत्रातिशयाधानं पूर्णत्वेनैव निराकृतं मलापाकरणं वारयति निरंजन इति

श्री॰ भा॰द॰ पू॰ ६९ 69

तस्मादेवंभूतज्ञानान्मुच्यंतइत्याह एवंविधमितिद्वाभ्यांत्वांयेविचक्षते सम्यकपश्यंति कथंआत्मात्मतया
आत्माप्रत्यक्तत्स्वरूपेण नचैतत्सर्वादिष्वेवगौणमित्याह सकलात्मनामपिस्वात्मानं केनगुरुरेवार्कस्तस्मा
लब्धाउपनिषज्ज्ञानंतदेवसुचक्षुः तेनभवएवानृतांबुधिस्तंतेतरंतीवेतिभावः २४ तत्रचज्ञानेनतरंतीति तत्र
तरंतीवेति तत्रआत्मात्मतयाज्ञानेनेत्यर्थत्रयंप्रतिज्ञातंक्रमेणोपपादते तत्रात्मानमेवात्मतयेत्यनेनश्लोके

एवंविधंत्वांसकलात्मनामपिस्वात्मानमात्मात्मतयाविचक्षते गु
र्वर्कलब्धोपनिषत्सुचक्षुषायेतेतरंतीवभवानृतांबुधिं २४ आ
त्मानमेवात्मतयाविजानतांतेनैवजातंनिखिलंप्रपंचितं ज्ञानेन
भूयोपिचतत्प्रलीयतेरज्ज्वामहेर्भोगभवाभवौयथा २५

तज्ज्ञानेनतरंतीत्युपपाद्यते अज्ञानसंज्ञावित्यनेनतरंतीवेत्येतत्त्वामित्यादिश्लोकद्वयेनतुआत्मात्मतयेत्येतदुप
पाद्यते ननुज्ञानेनकथंभवंतरंतीति तस्माज्ज्ञानमूलत्वादित्याह आत्मानमेवेतितेनैवअज्ञानेनैवप्रपंचितंप्रपं ६९
चः रज्ज्वामहेर्भोगभवाभवाविति सर्पशरीरस्याध्यासापवादौयथेति २५

69A

ननुज्ञानेनसत्वंत्येव किमिदमुच्यतेतेतरंतीवेतितत्राह अज्ञानसंज्ञाविति अज्ञानेनसंज्ञाययोस्तौभववंधमोक्षौ
भवेनवंधस्तन्मोक्षस्च तौद्वौनामप्रसिद्धौ ऋतज्ञभावात् ऋतस्यात्मज्ञस्ययोभावस्तस्मादन्यौनस्तः ननुकथम
ज्ञानपलापःक्रियते परमार्थविचारादित्याह अजस्येति अखंडानुभवरूपेपरेस्मद्देयात्मनिनाज्ञानंचनवंधःअतए
वनज्ञानेनचमोक्षः तरणौसूर्येअहनीरात्र्यहनीवेइति २६ ननुपरमार्थज्ञानादज्ञानकृतोवंधोनिवर्ततांआत्मा

अज्ञानसंज्ञौभववंधमोक्षौद्वौनामनान्यौस्तऋतज्ञभावात् अ
जस्रचित्यात्मनिकेवलेपरेविचार्यमाणेतरणाविवाहनी २६
त्वामात्मानंपरंमत्वापरमात्मानमेवच आत्मापुनर्वहिर्मृग्यअ
होज्ञजनताज्ञता २७

त्मतयैवज्ञानादितिकोयमाग्रहइत्याशंक्यपद्यासादात्मनःपरकृपास्फूर्तिस्तदपवादेनतत्रैवआत्मस्वरूपेज्ञानंशु
क्तमितीममर्थंविस्मयेनाक्रोशन्निवाह त्वामिति त्वामात्मानंपरंदेहादिमत्वाआत्मनिदेहादिमध्यस्यतथापरंदे
हादिमात्मानंमत्वादेहादावात्मानमध्यस्यतत्रनष्टआत्मावहिर्मृग्यइतिचिरंनदिष्टहेनष्टंवनेमृग्यतइत्यर्थः २७

श्री॰ मा॰ टी॰ ७॰ 70

विवेकिनस्त्वत्प्रत्यक्स्वरूपएवपरमात्मानंचिन्वंतीत्याह अंतर्भवइति भवतीतिभवः चिज्जडात्मकंशरीरंतं
तन्मध्यएवतामृगयंतीति अतज्जडंत्यजंतः अपवदंतः ननुसतोज्ञानेनालंकिमसतोपवादेनेत्याशंक्याअध्यस्ताप
वादंविनाअधिष्ठानतत्त्वंनज्ञायतइतिसतांव्यवहारेणाह असंतमिति अंतिसमीपेअसंतमप्यहिमंतरेणतद्वि
वेचयंविनेत्यर्थः संतंगुणारज्जुंसंतःकिमुयंतिजानेति अंतिसंतमपिगुणामितिवानजानंतीत्यर्थः तस्मादात्मा

अंतर्भवेनंतुभवंतमेवव्यतत्त्यजंतोमृगयंतिसंतः असंतमप्यंत्यहिमंत
रेणासंतंगुणंतंकिमुयंतिसंतः २८ अथापितेदेवपदांबुजद्वयप्रसादले
शानुगृहीतएवहि जानातितत्त्वंभगवन्महिम्नोनचान्यएकोपिचिरंवि
चिन्वन् २९

त्मतयैवज्ञानान्मुक्तिरितिभावः २८ नन्वेवंत्वानेकसाध्येमोक्षेकिमितिभक्तिरुद्घोषितात्रतआह अथापीति
यद्यपिहस्तप्राप्यमिवज्ञानमुक्तं तथापिहेदेवतवपदांबुजद्वयमध्येएकदेशस्यापियःप्रसादलेशोपितेनानु
गृहीतएवभगवतस्तवमहिम्नस्तत्त्वंजानाति हेभगवंस्तवमहिम्नस्तत्त्वमितिवा एकोपिकश्चिदपिचिरंविचि ७०
न्वन् अतदंशापवादेनविचारयन्नपीत्यर्थः २९ मपि

70A

ततस्माद्भूरिभागः मद्भाग्यं अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये यज्जन्म तस्मिन्वा येन भाग्येन भवदीयानां ज
नानामेकोपि यः कश्चिदपि भूत्वा निषेवे अन्यदर्थं सेवेय ३० अहो देवादिजन्मतोपि यत्र कुत्रचित्तत्वङ्किमजन्मैव।
श्रेष्ठमित्याशयेन सप्तभिः श्लोकैरभिनन्दति अहोतिधन्या इत्यादिभिः व्रजगोरमण्यः व्रजस्य गावो गोप्यश्च तेन
यावत्सतरात्मजातानां वत्सानां आत्मजानां च रूपेण स्तन्यामृतं पीतं यस्य तव तृप्तये सर्वेपि यज्ञाः अद्यापि न शक्ताः।

तदस्तु मे नाथ स भूरिभागो भवेत्र वान्यत्र तु वा तिरश्चां येनाहमेकोपि भवज्जनानां
भूत्वा निषेवे तव पादपल्लवं ३० अहोतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमती
वते मुदा यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेद्यापि न चालमध्वराः ३१ अहो
भाग्यमहो भाग्यं नन्दगोपव्रजौकसां यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ३२

तेन त्वया अतितृप्तेन तृप्यता यासां स्तन्यममृतरूपं पीतमिति ३१ तत्र भगवत्सखानां महिमा वक्तुं तावन्न च न शक्य
ते इत्याह अहो इति पुनरुक्त्या भाग्यस्य सर्वथा अपरिच्छिन्नत्वमुक्तं ३२ किंच एतेषां भाग्यस्य तावन्महिमास्तां लोक
स्तावकं शक्नोति शर्वादयः शर्वोहंकाराधिष्ठाता अग्न्यादिर्येषां च ब्रह्मादीनामेकादशानां ते तेत तथा वयं च वयमित्यात्मा
नमेवाहं बहु मन्यमानः एवं मनोबुद्ध्यहंकारवत्ताद्यधिष्ठातारत्रयोदश देवाएवं तावत् वत अहो भूरिभागाः वयम

श्री॰ भा॰ द॰ पू॰ ७१

71

यस्मादेतेषांहृषीकाणीन्द्रियाण्येवचषकाणिपानपात्राणितैः तेवतर्दशस्वचिन्द्राधिष्ठातारंघ्र्युदजेवारि
जेकमलेतत्रयोमधुमकरन्दस्तदेवामृतंस्वादुआसवंमादकंपिबामःएतदुक्तंभगवति यदाप्येकैकस्मिन्निन्द्रियाभि
मानिनोवयंकीर्तिमोदयेमोगण्याधिकैकदेशसेवितोपिकृतार्थाः तदासर्वैरिन्द्रियैःसर्वसेविनामेतेषांव्रजवासि
नांकिंवर्ण्यतेभाग्यमिति ३३ अतोमयाप्रार्थितंतदस्तुमेनाथसभूरिभागइतियत्तदेतदेवेत्याह तद्भूरिभाग्यमिति

एषांतुभाग्यमहिमाच्युततावदास्तामेकादशैवहिवयंवतभूरिभागाः एतद्धृषीकचषकैरसकृत्पि
बामःशर्वादयोंघ्र्युदजमध्वमृतासवंते ३३ तद्भूरिभाग्यमिहजन्मकिमप्यटव्यांयद्गोकुलेपिकतमो
ङ्घ्रिरजोभिषेके यज्जीवितंतुनिखिलंभगवान्मुकुन्दस्त्वद्यापियत्पदरजःश्रुतिमृग्यमेव ३४

किंततइहमनुष्यलोकेयत्किमपिजन्मतत्रापिअटव्यांयत् तत्रापिगोकुलेयत् अहोसत्यलोकंविहायात्रज
न्मनिजातेकोलाभोतआह अपिकतमांघ्रिरजोभिषेकंइति गोकुलनिवासिनांमध्येपिकतमस्ययस्यकस्या
प्यङ्घ्रिरजसाभिषेकोयस्मिंस्तत् ननुकुतोगोकुलवासिनएवातिधन्यास्तत्राह यदिति येषांजीवितंनिखिलं
मुकुन्दइति मुकुन्दएवजीवितमित्यर्थः दुर्लभतामाह अद्यापीति श्रुतिमृग्यंवेदैरपिमृग्यतएवनतुदृ- ७१
श्यतइत्यर्थः अहोतेषांभाग्यंयेतत्स्वरूपंपश्यन्ति ३४

71A

अपिचकिंवर्ण्यतेकृतार्थत्वंतेषांयेषांभक्त्याभवानपिऋणीवास्तेनतुकिंदातुमसमर्थोहंयेनऋणीस्यां
अतआह उतअपिभवानपिएवांऊचापिकिंविहिस्वफलात्सर्वफलात्मकात्त्वत्तःपरंफलंशान्तादासती
ति नश्चेतः अयत्सर्वत्रगच्छन् विचारयन्मुह्यति ननुमामेवदत्वाअनृणःस्यामितिचेन् नहिनहि सद्वे
षादिवसतांभक्तानांयोवेषस्तदनुकरणमात्रेणपापिष्ठापूतनापित्वामेवापितापापितानतर्हिएतत्संबंधि
नामपिदास्यामीतिचेत्तत्राह सकुलेति वकाद्यासहसंहितापषामपितावदेवचेदपर्याप्तमित्याह यदिति

प्रपंचंघोषनिवासिनामुतभवान्किंदेवरातेतिनश्चेतोविश्वफलात्फलंत्वदपरंकुत्राप्ययन्मु
ह्यति सद्वेषादिवपूतनापिसकुलात्वामेवदेवापितायद्धामार्थसुहृत्प्रियात्मतनयप्राणाशया
स्त्वत्कृते ३५ तावद्रागादयस्तेनास्तावत्काराग्रहंगृहं तावन्मोहोऽङ्घ्रिनिगडोयावत्कृष्णनतेजनाः ३६

येषांधर्मादयस्त्वत्कृतेत्वदर्थमेवेत्यर्थः ३५ ननुवीतरागादिदोषाणांसंन्यासिनामपिनमत्तःपरंकिंचिद
स्तिकथमेषामपर्याप्तमित्यतआह तावदिति हेकृष्णरागादयस्तावदेवस्तेनाश्चौराभवंति तथातावद्गृहम
पिकाराग्रहंबंधनागारं मोहोपितावदेवाङ्घ्रिनिगडःपादशृंखलोयावत्तेत्वदीयाजनानभवंति त्वदीयानां
तुरागादयोपित्वन्निष्ठामोचकाएवेति नयतिभ्योविशेषःभजनेत्वधिकमितिभावः ३६

श्री० भा० द० सू० ७२ 72

नन्वेतत्पवाहमेषांपुत्रादिरूपेणावर्ततेइतिचेत्तत्राह प्रपंचमिति प्रपन्नायाजनतायाजनसमूहस्यानं
दानानंदानांसंदोहं प्रथयितुमिति नहिकपटपुत्रत्वादिनानाहंकौभक्तेराचरणेसंपद्यतइत्यर्थः ३७
नत्वेवमादितआरभ्याचिंत्यानंतगुणत्वेनस्वयंदुर्ज्ञेयत्वमुक्तं केचित्तुजानीमोवयंभगवत्स्वरूपमितिव
दंतःस्थितास्तांस्तूपहसन्निवाह जानंतइति नत्वहंमेमनआदीनांतैवैभवंविषयइति ३८ जगदीशत्वाद्य
भिमानंपरित्यज्याह अनुजानीहि स्वमहिमानंचज्ञानबलादिसर्वंत्वमेववेत्सियतः सर्वदृक् ज

प्रपंचंनिः प्रपंचोपिविडंबयसिभूतले प्रपन्नजनतानंदसंदोहंप्रथितंविभो ३७ जानंत
एवजानंतुकिंबहूक्तेनमेप्रभो मनसोवपुषोवाचोवैभवंतवगोचरे ३८ अनुजानीहिमां
कृष्णसर्वंत्वंवेत्सिसर्वदृक् त्वमेवजगतांनाथोजगदेतत्तवार्पितं ३९

गतांनाथस्त्वमेवेत्येतावत् ज्ञातं अतोममतास्पदंजगत् एतत् शरीरंचतवार्पितं ३९ (हेप्रभोधाष्टर्या
त्तवाग्रेमयाप्रलापितंत्वांसर्वेश्वरमजानंतेवतन्मोक्षमस्व नन्वजानंतेतिकथंमांसर्वेजानंतेवेतिचेत्
किंमयावहूक्तेन येतवनैभवंमनआदीनांगोचरंजानंतीवर्ततेपंडितंमन्यास्तेजानंत गोचरइतिया
वेजानंतइत्यर्थः वयंतत्वांज्ञातमसमर्थाइतिकाकभिप्रायः ३९) व ७२

72A

तदेवं किंकरं मां प्रस्थापयेति अत्यादरेण नमस्करोति श्रीकृष्णेति हंसडिम्भजलपयस्य प्रीतिसत्वेन हंसस्योप
मत्वाच निर्जराः देवाश्च द्विजाश्च पशवश्च तत एव उदधयः तेषां हृद्विकारित्वेन हंसचंद्रोपम उद्धर्मः पाखंडध
र्मस्तद्रूपशार्वरं मत्तं हरतीति तत्तथा अनेन हंसोपमहंसत्तितिरात्तसभ्रुकादित्वेनोरात्तस्माः कंसादयः उ
ग्रान्देवतेभ्यो दुतीनितित्तथा पुनः सूर्योपमः सूर्याग्रुपमा रविस्नेनेति मत्वाह अर्कमभिव्याप्य सर्वेषां अहंन्
हंन्य भगवन् आकल्पकल्पपर्यंतमहं ते ते तुभ्यं नम इति ससखवत्सकमात्तएकोनकंडुनाविलंवित

श्रीकृष्ण हंसडिम्भजलपद्मकरतोषदायनस्त्वानिर्जरद्विजपशूदधिहृद्विकारिन् उद्धर्मशार्वर
हरतितिरात्तसभ्रुगाकल्पमार्कमर्हन् भगवन्नमस्ते ४८ शुक उवाच इत्यभिष्टूय भूमानं
त्रिः परिक्रम्य पादयोः नत्वाभीष्टं जगद्धातास्वधाम प्रत्यपद्यत ४९ ततोनुज्ञाप्य भगवान्स्वभुवं
प्रागवस्थितान् वत्सान्पुलिनमानिन्ये

पुत्रमुदेद्भुतं निखिलहृपतोदधदच्युतोवतसवंः कुलयत्रज
मंगलं ४८ पादयोर्नत्वा अभीष्टं सर्वतः एजितं अभिमतं वा ४९ अनुज्ञाप्य अनुज्ञां प्रदाप्य एष्टत्यर्थः स्वभुवं ब्र
ह्माणं यथापूर्वं स्वकः सखा यो यस्मिन् तत्तथा एवं स्वकं नाहस्थं स्वकं पुलिने ५० नन्वेतावंतं कालं कथं
तेतत्रैवोपविष्टाः कथं च तत्तिपामादि विस्मरणमत आह एकस्मिन्निति श्लोकद्वयेन अहं प्रियात्प्राणेश ॥

ययामाययामोहितंजगत्अभीत्संपुनः पुनर्विस्मृतात्मकंविस्मृतः आत्मैवयेनतत्तथायतःतृणार्द्रं
मेनिरे ४४ अतएवमूचुरस्य तेत्वयातिवेगेनस्वागतंसम्यगागतंएकोपिग्रासस्त्वाविनाःस्वाभिर्नाभो
जिनभुक्तः इतएहिसाधुअविततेएणभुज्यतामिति ४५ अभ्यवहृत्यभुक्ता ४६ प्रोद्दामोयोवेणवादिरवैः

एकस्मिन्नपियातेहि प्राणेशेचांतरात्मनः कृष्णमायाहृताराजन्तृणार्द्रंमेनिरेऽर्भकाः ४३ किंकिं
नविस्मरंतीह माययामोहितचेतसः यन्मोहितंजगत्सर्वंअभीत्संविस्मृतात्मकं ऊचुश्चसुहृदःकृ
ष्णंस्वागतंतेतिरंहसा नैकोप्यभोजिकवलःएह्येतःसाधुभुज्यतां ४५ ततोहसन्हृषीकेशोऽभ्यव
हृत्यसहार्भकैः दर्शयंश्चर्माजगरंन्यवर्ततवनाद्व्रजं बर्हप्रसूनवनधातुविचित्रितांगः प्रोद्दामवे
णुदलशृंगरवोत्सवाढ्यः वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेशगोष्ठं
४७ अद्यानेनमहाव्यालोयशोदानंदसूनुना हतोविताववयंचास्मादितिबालाव्रजेजगुः ४८

तत्सवत्सेनाढ्यःसंपन्नःगृणन्उपलालनैराह्वयन् गोपीदृगुत्सवदृशिःगोपीदृशामुत्सवेरूपादृशिर्दर्शनंय
स्यसः ४७ यशोदानंदसूनुनेति यशोदासूनुनानंदसूनुनेतिवहूनामुक्तिः सदैवदर्शिता यद्वा केचिद्
ऽर्यशोदासूनुना अपरेनंदसूनुनेति यद्वा यशोदानंदयतीतियशोदानंदः सचासौसूनुश्चेतितथाते

73A

व्रजौकसां स्वतोकेषु स्नेहवल्यासहमन्वहं शनैर्निःसीमववृधे यथाकृष्णेत्वपूर्ववदित्यादिना स्वतोके
भ्योपि परपुत्रे कृष्णे प्रेमाधिक्यमुक्तं तत्र पृच्छति ब्रह्मन्निति ४९ श्रीकृष्णस्य साक्षादात्मत्वात्तस्मिन्ना॰
त्मीयेभ्यः प्रेमाधिक्यं युज्यत इति वक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां तु तदुपाधिकमिति दर्श

राजोवाच ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत् योभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्य
तां ४९ शुक उवाच सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः इतरेपत्यवित्ताद्यास्तद्वल्लभतयै
व हि ५० तद्राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनां न तथा ममतालंबिपुत्रवित्तगृहादिषु
५१ देहात्मवादिनां पुंसामपि राजन्यसत्तम यथा देहः प्रियतमस्तथा न ह्यनु ये च तं ५२

यति पंचभिः सर्वेषामिति ५० कुतस्तथादर्शनादित्याह तदिति तस्मादेव कारणात्स्वस्वकात्मनि॰
अहंकारास्पदेपि देहे आत्माध्यासतारतम्येन प्रेमतारतम्यं हृश्यमानं तन्निर्वंधनमेवेति दर्शयितुं॰
त्वावृद्धभेदेन विशेषमाह देहात्मवादिनामिति द्वाभ्यां तं देहमनु ये भवंति पुत्रादयस्ते न तथा प्रिय
तमा यथात्मवादिनां देह इत्यर्थः ५२

श्रीः भा॰द॰ स्॰ ७४
74

यद्यस्माज्जीर्णत्वपिश्रासन्नमरणेपिजीविताशाभवति अयंभावः नजीविष्यतीतिनिश्चितेपिदेहेय
त्प्रेमासदैवतदात्मगतमेवसंगच्छतइति अथवायत्यस्मिन्देहेजीर्णत्वपिजीविताशाअविवेकद
शायामासीत्सापिविवेकिनोयदाममताभावोभवति तदात्माविषयोनभवतिअतस्तत्रनीतीवास्येति ५३
तदर्थमेवसकलंप्रियमित्यर्थः ५४ प्रस्तुतमाह कृष्णमेनमिति ५५ नकेवलमात्मनामात्मा अपितुज

देहोपिममताभाक्चेत्तर्ह्यसौनात्मवत्प्रियः यज्जीर्यत्यपिदेहेस्मिन्जीविताशाबलीयसी तस्मात्प्रियत
मःस्वात्मासर्वेषामपिदेहिनां तदर्थमेवसकलंजगदेतच्चराचरं ५४ कृष्णमेनमवेहित्वमात्मानमखि
लात्मनां जगद्धितायसोप्यत्रदेहीवाभातिमायया वस्तुतोजानतामत्रकृष्णंस्थास्नुचरिष्णुच भगवद्रूप
मखिलंनान्यद्वस्त्विहकिंचन ५६ सर्वेषामपिवस्तूनांभावार्थोभवतिस्थितः तस्यापिभगवान्कृष्णःकिमे
तद्वस्तुरूप्यतां ५७

ङानामपीत्याह वस्तुतइति सर्वजगत्कारणमितिकृष्णंजानतांपुंसांस्थावरंजंगमंचसर्वंभगवद्रूपंभगवानेव
स्वरूपंयस्यतन्नान्यत् ५६ कुतइति तदेवाह सर्वेषामपीति भावार्थःपरमार्थः भवतिभवत्परिणामंप्राप्नुव
त्कारणंतस्मिन्भवतिस्थितः तस्यापीभवतःकारणस्यापिभगवान्कृष्णोभवत्कारणंअतःकिमेतत्श्रीकृष्णव्य

तिकिंवस्तुनिरूप्यतां ५७
७४

74A

तस्मात्श्रीकृष्णस्यैवपरमार्थत्वात तत्तदेकशरणानामयत्नसिद्धोमोक्षइतिप्रकरणार्थमुपसंहरति समा-
श्रिताइति पुण्यंयशोयस्यसपुण्ययशाः सचासौमुरारिश्चतस्यपदपल्लवमेवप्लवस्तंयेसम्यगाश्रिताः महत्प-
दंमहतांपदमाश्रयं यद्वा महद्ब्रह्मतत्पदंचेतितत्तया तेषांभवांबुधिर्वत्सपदमात्रंभवति किंचपरंपदंवैकुंठाख्यं
पदंस्थानंभवति विपदांयत्पदंविषयः तत्तुनःकदाचिदपितेषांनभवति नततःपुनरावर्तंतइत्यर्थः ५८ ५९

समाश्रितायेपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः भवांबुधिर्वत्सपदंपरंपदंपदंपदंयद्विपदांनतेषां ५८
एतत्तेसर्वमाख्यातंयत्पृष्टोहमिहत्वया यत्कौमारेहरिकृतंपौगंडेपरिकीर्तितं ५९ एतत्सुहृद्भिश्चरि-
तंमुरारेरघार्दनंशाद्वलजेमनंच व्यक्तेतरद्रूपमजोर्वभिष्टवंशृण्वन्गृणन्नेतिनरोखिलार्थान् ६० ए-
वंविहारैःकौमारैःकौमारंजहतुर्व्रजे निलायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः ६१ इतिश्रीदशमेचतुर्द-

सुहृद्भिश्चरितंमुरारेःतोन्योन्यशिक्यादीनित्यादिनोक्तं अघार्दनंचशाद्वलेजेमनंभोजनंचव्यक्तेतरत्व्यक्तात्प्र-
पंचादितरत शुद्धसत्वात्मकंवत्सवत्सपालरूपंयद्वाव्यक्तेतरतचिद्विलासः तेनरूपमितिरूपेणजसोहमहानभि-
ष्टवंब्रह्मस्तुतिं एतत्शृण्वन्गृणन्नरःसर्वपुरुषार्थान्प्राप्नोति ६० ६१ इतिश्रीपरमानंदनृसिंहपदद्व-
द्वपदःव्याकरोच्छ्रीधरःस्वामीयथामतिविधेःस्तुति इतिदशमस्कंधेचतुर्दशोध्यायः १४

श्री॰ भा॰ द॰ स्क॰ ७५ 75

ततः पंचदशेऽथ धेनुपालनं धेनुकार्दनं कालियह्लदतो गोपरक्षणं च निरूप्यते शैशवे स्तनपानं पीत्वा कौमारे दु
ष्टकादिकान् पौगंडे देवदैत्यानां महन्मदमहानलः अहिवक्त्रप्रवेशेन वृथाविख्यातसर्वोऽनन्तः कृष्णः प्रावे।
शायत्पक्वफलं तालालिकाननं पशुपालसंमतो पशुपालने संमतौ पशुपालानां वा संमतौ ईषद्योवलाति
रेकमनुकृतवंतावित्यर्थः अतीव पुण्यं वृंदावनं चक्रतुः सर्वतः प्रसर्पणेन १ स्वयशो गृणद्भिस्तद्वनं प्राविश

॥ ॥ शुक उवाच ततश्च पौगंडवयः श्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ गाश्चारयंतौ सखि
भिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः १ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो
बलान्वितः पशून्पुरस्कृत्य पशव्यमाविशत्विहर्तुकामः कुसुमाकरं वनं २ तन्मंजुघोषा
लिमृगद्विजाकुलं महन्मनः प्रख्यपयः सरस्वता वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भ
गवान्मनो दधे ३

त॰ २ तद्वनं निरीक्ष्य भगवान् श्रीकृष्णो रंतुं मनो दधे कथंभूतं मंजुघो
षाश्च ये अलिमृगद्विजाः भ्रमरमृगपक्षिणः तैराकुलं व्याप्तं महन्मनः प्रख्यपयः सरस्वता महतां मनसा
तुल्यं प्रख्यं स्वच्छं पयो यस्मिंस्तत्सरः आश्रयत्वेनास्त्यस्य तेन वातेनेति शैत्यमुक्तं शतपत्रगंधिनेति परिमल ७५
वत्त्वमुक्तं वनमिति माहात्म्यसूचितम् ३

75A

अरुणपल्लवश्रियासहस्पृशंत्यःशिखाःशाखाग्राणियेषांतान्वीक्ष्याग्रजंवलंप्रत्याह ४ तरुजन्मयेन
कृतंतस्यतमसःपापस्यापहत्यैनाशाय अथवायेनत्वयाईश्वरेणसर्वोपकारकंतरुजन्मकृतंतेत्वांनमंति
एवंश्लाघ्येपिजन्मनियद्ज्ञानरूपंतमोस्तितस्यापहत्यै ५ हेअनघवनेगूढमापित्वांनत्यजंति त्वयिवे

सतत्रतत्रारुणपल्लवश्रियाफलप्रसूनोरुभरेणपादयोः स्पृशच्छिखान्वीक्ष्यवनस्पतीन्मु
दास्मयन्निवाहाग्रजमादिपूरुषः ४ श्रीभगवानुवाच अहोअमीदेववरामरार्चितंपादांबुजं
तेसुमनःफलार्हणं नमंत्युपादायशिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतं ५ एतेलि
नस्तवयशोखिललोकतीर्थंगायंतआदिपुरुषानुपदंभजंते प्रायोऽमीमुनिगणाभवदी
यमुख्यागूढंवनेपिनजहत्यनघात्मदैवं ६ नृत्यंत्यमीशिखिनईड्यमुदाहरिण्याःकुर्वंतिगोप्य,
इवतेप्रियमीक्षणेन सूक्तैश्चकोकिलगणागृहमागतायधन्यावनौकसइयान्हिसतांनिसर्गः

षेणामनुष्यनिरूढेसत्यपिमुनयोअलिवेषेणनिगूढास्त्वांभजंतीत्यर्थः ६ इयान्हिसतांनिसर्गइतियद
स्तिप्रियंवस्तुस्वस्मिन्तद्गृहमागतायमहतेसमर्पयंतीति ७ ॥

तृणवीरुधस्त्वत्तव पादौ स्पृशंतीति तथा करजाभिमृष्टाः नखैः स्पृष्टाः सदयैरवलोकनैः श्रीरपि यस्य स्पृह-
यति केवलं तेन भुजयोरंतरेण वत्सा गोप्यो धन्या इति ८ एवं श्रीमद्वृंदावने प्रतिप्रीतः सन्नद्रेः समीपवर्ति
सरित्तटेषु पशून् संचारयन् सानुगो लोकप्रसिद्धाभिः क्रीडाभिः प्रीतमना रेमे ९ तामेव रतिमाह दश

धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः नद्योद्रयः खगमृगाः
सदयावलोकैः गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ८ एवं वृंदावनं श्रीमत्कृष्णः प्रीतमनाः प
शून् रेमे संचारयन्नद्रेः सरिद्रोधस्सु सानुगः ९ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः उपगी
यमानचरितः स्रग्वी संकर्षणान्वितः क्वचिच्च कलहंसानामनुकूजति कूजितं अभिनृत्यति नृत्यंतं
बर्हिणं हासयन् क्वचित् ११ मेघगंभीरया वाचा नामभिर्दूरगान् पशून् क्वचिदाह्वयति प्रीत्या गो
गोपालमनोज्ञया १२ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः अनुरौति स्म सत्वानां भीतवद्व्याघ्र

भिः क्वचिदित्यादिभिः १० बर्हिणं नृत्यंतमनु अभिनृत्यति बर्हिणमभिमुखो नृत्यतीति वा सखीन् हासयन्
आनंदयन् इति भावः ११ १२ चकोरादीननुकृत्य रौति कदाचिच्च सत्वानां मध्ये व्याघ्रसिंहयोस्ताभ्यां भीतव ७६
द्भवति सत्वेषु पलायमानेषु पलायत इत्यर्थः तयोः व्याघ्रसिंहयोः सत्वानां च बलोद्रेकेण भीतवद्भवतीति

76A

आर्यमग्रजंविश्रमयति विगतश्रमंकरोति १४ मिथोनृत्यादीनकुर्वतोगोपानप्रशशंसतुः १५ १६ व्यजनैः
पल्लवादिनिर्मितैः १७ १८ ईशचेष्टितइति निगूढस्वभावत्वेप्यंतरांतराईशस्यैवचेष्टितानिदर्शयंतेयस्मिन्सः

क्वचित्क्रीडापरिश्रांतंगोपोत्संगोपबर्हणं स्वयंविश्रमयत्यार्यंपादसंवाहनादिभिः १४ नृत्यतोगा
यतःक्वापिवल्गतोयुध्यतोमिथः गृहीतहस्तौगोपालान्हसंतौप्रशशंसतुः १५ क्वचित्पल्लवतल्पेषु
नियुद्धश्रमकर्षितः वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्हणः १६ पादसंवाहनंचक्रुःकेचित्तस्यमहा
त्मनः अपरेहतपाप्मानोव्यजनैःसमवीजयन् १७ अन्येतदनुरूपाणिमनोज्ञानिमहात्मनः गायंतिस्म
महाराजस्नेहक्लिन्नधियःशनैः १८ एवंनिगूढात्मगतिःस्वमाययागोपात्मजत्वंचरितैर्विडंबयन्
रेमेरमालालितपादपल्लवोग्राम्यैःसमंग्राम्यवदीशचेष्टितः १९ श्रीदामानामगोपालोरामकेशव
योःसखा सुबलस्तोककृष्णाद्याःगोपाप्रेम्णेदमब्रुवन् रामराममहाबाहोकृष्णदुष्टनिबर्हण इतो
विदूरेसुमहद्वनंतालालिसंकुलं २१ फलानितत्रभूरीणिपतंतिपतितानिच संतिकिंत्ववरुद्धानि
धेनुकेनदुरात्मना २२

१९ ईशचेष्टितत्वमेवदर्शयितुमाह श्रीदामेति स्तोकःकृष्णःकश्चित् २०
तालालिसंकुलंपक्वफलानांतालानांपंक्तिभिर्व्याप्तं २१

श्री॰ भा॰ द॰ टी॰ ७७

विश्वीनः सर्वतः प्रसृतः २५ २६ सनगं समहतं २८ प्रसगभ्यां पश्चिमाभ्यां काशाहमिति गर्दभजातिशब्दानुकरणं
पर्यसरत्परितोभ्यधावदित्यर्थः ३० उपक्रोष्टा गर्दभः पराक्प्रतिश्रवः अपरो पश्चिमो वलायवलहृते ३१ न

सोतिवीर्यो महारोगामदेहकृत्सखराह्यपथत आत्मतुल्यवलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहा
राद्भीतैर्नृभिरमेवृहत नसेव्यते पशुगणैः पत्तिसंघैर्विवर्जितं २४ विद्यते भुक्तपूर्वाणि फलानि सुरभी
णि च पुष्वेसहाभिगंधोविश्वचीनोवशून्यते प्रयच्छतानि नः कृष्णगंधलोभितचेतसां वांछासीन्महती राम
मगम्यतां यदि रोचते २६ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य जग्मतुर्गोपौ वृतौ तालवनं प्रभू २७
बलः प्रविश्य बाहुभ्यां तालान्संपरिकंपयन् फलानि पातयामास मतंगजइवौजसा २८ फलानां पततां शब्द
हृनिशम्यासुररासभः अभ्यधावत्क्षितितलं सनगं परिकंपयन् समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां वलं वली
निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ३० पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः चरणावपरौ राज
न्बलाय प्रत्यपद्रुषा सतंगृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३२
तेनाहतो महातालो वेपमानो बृहच्छिराः पार्श्वस्थं कंपयन्भग्नः स चान्यं सोपि चापरं ३३ बलस्य लीलयोत्सृष्ट
खरदेहहताहता तालाश्चकंपिरे सर्वे महावातेरिता इव ३४ नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ओतप्रोत
णराजन्त्यातः ३५ ३३ अत्र हे खरदेहेन तैर्हताः चकंपिरे चकंपत ३४ यस्मिन्निदं विश्वमोतं ऊर्ध्वमंततुपटवद्यथितं सो

३७ ३८ घनैर्नभश्चभुवस्तलेरराज तत्रफलप्रकरसंकीर्णत्वमितिदैत्यदेहैस्तालाग्रैः असंकीर्णमितिमहणाश्वेतनी॥
लवनमाहृष्यसंपादने ३९ आदन्नभक्षयन् ४० ४१ गोरजोभिः छुरितेषुकुंतलेषुवद्धंवर्हंवन्यानिप्रसूनानि
चयस्यरुचिरमीक्षणंचारुहासश्चयस्यतंच तेचदिदृक्षितदृशः दिदृक्षणादर्शनोत्कंठायुक्ताहृशोयासांताः ४२

ततःकृष्णंचरामंचज्ञातयोधेनुकस्यये क्रोष्टारोभ्याद्रवन्सर्वेसंरब्धाहतबांधवाः ३६ तांस्तानापततः
कृष्णोरामश्चनृपलीलया गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णंदैत्यदेहै
र्गतासुभिः रराजभूःसतालाग्रैःघनैरिवनभस्तलं ३८ तयोस्तत्सुमहत्कर्मनिशम्यविबुधादयः मुमु
चुःपुष्पवर्षाणिचक्रुर्वाद्यानितुष्टुवुः ३९ अथतालफलान्यादन्मनुष्यागतसाध्वसाः तृणंचपशव
श्चेरुर्हतधेनुककानने ४० कृष्णःकमलपत्राक्षःपुण्यश्रवणकीर्तनः स्तूयमानोनुगैर्गोपैःसाग्रजो
व्रजमाविशत् ४१ तंगोरजच्छुरितकुंतलवद्धवर्हवन्यप्रसूनरुचिरेक्षणचारुहासं वेणुंक्वणंतमनु
गैरनुगीतकीर्तिंगोप्योदिदृक्षितदृशोभ्यगमन्समेताः ४२ पीत्वामुकुंदमुखसारघमक्षिभृंगैःतापंज
हुर्विरहजंव्रजयोषितोह्नि तत्सत्कृतिंसमधिगम्यविवेशगोष्ठंसव्रीडहाससविनयंयदपांगमोक्षं ४३

मुकुंदमुखपद्मगतंसारघंमधु अह्नियोविरहः तस्माज्जातंतापंस्रवतासांसत्कृतिंस्रजांकांतांसत्कृतिंकथंवाक्त
तांतामाहसव्रीडेति सलज्जेनहासेनविनयोयथाभवति तथा यदेतत्किंअपांगमोक्षंकटाक्षदर्शनं तथातां।

श्री॰ भा॰ द॰ पं॰ ७८ 78

४४ ५० संप्रति सद्यपवरताग्रामास्मृतिर्यैस्तेसंप्रतीतस्मृतयः यद्वासम्यक्प्रतीताप्रतिग्रामास्मृतिर्यैस्ते
तथेति ५१ पतदनुसंमत ५२ इतिदशमेपंदशः १५ षोडशेकालियसोत्क्रोनिग्रहोयमुनाह्रदे तत्पत्नीभि
तयोर्यशोदारोहिण्योपुत्रयोःपुत्रवत्सले यथाकामंयथाकालंव्यधत्तांपरमाशिषः ४४ गताधान
श्रमौतत्रमज्जनोन्मर्दनादिभिः नीवीवसित्वारुचिरांदिव्यस्रग्गंधमंडितौ ४५ जनन्युपहृतंप्राश्य
स्वाद्वन्नमुपलालितौ संविश्यवरशय्यायांसुखंसुषुप्तुर्व्रजे ४६ एवंसभगवान्कृष्णोवृंदावनचरः
क्वचित् ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ४७ अथगावश्चगोपाश्चनिदाघातपपीडिताः
दुष्टंजलंपपुस्तस्यास्तृषार्ताविषदूषितं ४८ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः निपेतुर्व्यसवः
सर्वेसलिलांतेकुरूद्वह ४९ वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ईक्षयामृतवर्षिण्यास्वनाथा
न्समजीवयत् ५० तेसंप्रतीतस्मृतयःसमुत्थायजलांतिकात् आसन्सुविस्मिताःसर्वेवीक्षमाणाः
परस्परं ५१ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितं पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ५२
इतिश्रीभागवतेदशमेपंचदशः १५ शुकउवाच ॐविलोक्यदूषितांकृष्णांकृष्णःकृष्णाहिनाप्रभुः त
स्तेनाथकृष्णेनानुग्रहःपुनः २ हत्वारासभदैत्येयान् // स्याविशुद्धमन्विच्छन्सर्पंतमुदवासयत् १
जग्धातालफलामलंप्रीतोन्नत्यमरुणारंगेकालियस्यकलानिधे १ उदवासयन् निसारितवान् १ ॥ ॥ ७८

78A

वहन्निप्सुगान्यावासोयस्यतमहर्दिमस्वैशुद्धिः अंतरजलचरोपितस्मिन्नंतर्जलेयथायेनप्रकारेणासीत् अथवा॥
वहन्निष्णुगान्यावासोयथाभवतितथातेनप्रकारेणसर्वतज्ञासीदितिकथ्यतामिति २ गोपालेनयडुदारमाचरि
तंतद्देवामृतंअंतः कथ्यतामिति ३ श्रप्यमाणपच्यमाणपयोयस्यसः अतउपरिगच्छंतःखगायस्मिन्पतंतीति ४
विप्रुष्मताश्रुत्कणयुक्तेनविषोदकतरंगस्पर्शमारुतेनाभिमर्षिताःस्पृष्टायस्यतीरगाम्रियंतेसहृदआसीत् ५ ते

राजोवाच कथमंतर्जलेगाधेन्यगृह्णात्भगवानहिं सवैवहुयुगावासंयथासीद्विप्रकथ्यतां २ ब्र
ह्मन्भगवतस्तस्यभूम्नःस्वच्छंदवर्तिनः गोपालोदारचरितंकस्तृप्येतामृतंजुषन् ३ श्रीशुकउ॰ कालिं
द्यांकालियस्यासीद्ध्रदःकश्चिद्विषाग्निना श्रप्यमाणपयोयस्मिन्पतंत्युपरिगाःखगाः ४ विप्रुष्मता
विषोदोर्मिमारुतेनाभिमर्षिताः म्रियंतेतीरगायस्यप्राणिनःस्थिरजंगमाः ५ तंचंडवेगविषवीर्यमवे क्ष्य
तेनदुष्टांनदींचखलसंयमनावतारः कृष्णःकदंबमधिरुह्यततोतितुंगादास्फोट्यगाढरशनोन्यपतद्वि

कालियंचंडोवेगोयस्यतंविषमेववीर्यंयस्यतंकदंबमिति किंचिद्दर्पोरसोयस्यसरसंवाभाविनाश्रीकृष्णचरणस्पर्श
भाग्येनसपल्लवीरेणशुष्कः अथवाअमृतमाहरतागरुत्मताक्रांतत्वादितिपुराणांतरे आस्फोट्यबाहुंकरतलेना
हत्यगाढंदृढंवद्धारशनाकटिवंधनवस्त्रंयस्यसः ६

श्री: भा: द: टी: ७९

तदा सर्पस्य ह्रदः पुरुषश्रेष्ठस्य पतनभरेण संक्षोभितानामुरगाणां विषैरुच्छ्वसितोंबुराशिर्यस्य सः विषेण कषायी-
कृता भयंकरा ऊर्मयो यस्य सः पर्यक् परितः धनुःशतं ततः प्रसृतः नैतच्चित्रमित्याह अनंतबलस्येति ७
भुजदंडाहतोदकघोषं श्रुत्वा ततः स्वसद[illegible]नाभिभवं च निरीक्ष्य तदसहमानः सर्पः समसरत् समाजगामसं

सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः पर्यक्प्लुतो विषकषायविभी
षणोर्मिर्धावन्धनुःशतमनंतबलस्य किं तत् ७ तस्मिन्ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंग वर
वारणविक्रमस्य आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ८ तं प्रेक्ष
णीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य
मर्मसु रुषा भुजया चछाद ९ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः
कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः १०

दुःखमागतः अयं वाल्लवाभिप्रायः असौ मत्वा सीमम यद्‌हमायातो मयास्माभ्युद्गमनं करणीयमिति ८ प्रेक्षणी-
यश्चासौ सुकुमारश्च घनवदुज्ज्वलश्च तं श्रीवत्सपीतवसने दे विहरतः श्रीवत्सेन सह उरस्युच्चलत्पीतवसनं यस्य तं भुजया
भोगेन चछाद आवेष्टयत् ९ स प्रियो येषां ते तत्प्रियाः ते च ते च सखायश्चेति १० ॥ ७९

११ तत्रभुविभूकंपादयः दिविउल्कापातादयः आत्मनिवामनेत्रस्फुरणादयः आसन्नंभयंशंसितंशीलंयेषांते १२
79A तानमहोत्पातानालक्ष्यगोकुलान्निर्जग्मुरितितृतीयेनान्वयः भयोद्विग्नाः भयहेतुभ्योभीताःभ

गावोवृषावत्सतर्यःक्रंदमानाःसुदुःखिताः कृष्णेन्यस्तेक्षणाभीतारुदंत्यइवतस्थिरे ११ अथव्रजेमहो
त्पातास्त्रिविधास्त्वतिदारुणाः उत्पेतुर्भुविदिव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्यभयोद्विग्नागोपा
नंदपुरोगमाः विनारामेणगाःकृष्णंज्ञात्वाचारयितुंगतं १३ तैर्दुर्निमित्तैर्निधनंमत्वाप्राप्तमतद्विदः
तत्प्राणास्तन्मनस्कास्तेदुःखशोकभयातुराः १४ आबालवृद्धवनिताःसर्वेंगपशुवृत्तयः निर्जग्मुर्गोकु
लाद्दीनाःकृष्णदर्शनलालसाः १५ तांस्तथाकातरान्वीक्ष्यभगवान्माधवोबलः प्रहस्यकिंचिन्नोवाच
प्रभावज्ञोनुजस्यसः तेन्वेषमाणादयितंकृष्णंसूचितयापदैः भगवल्लक्षणैर्जग्मुःपदव्यायमुनातटं १७

येनकंपमानाइतिवा १३ नतंविदंत्यतद्विदः १४ पशुवृत्तयःपशूनामिववृत्तिर्येषांतेपशुषुपंचभूतेषुवृत्तिः
स्थितिर्येषांवाअतिवत्सलाइत्यर्थः हेअंग १५ कातरान्भीतान्बलःबलभद्रः १६ भगवंतंलक्षयंतियानिपदा
नितैःपदैःसूचितयापदव्यामार्गेण १७

श्री॰
भा॰ द॰
पू॰
८॰
80

पदैर्मार्गज्ञानप्रकारमाह तत्रेति विट्पतेः श्रीकृष्णस्य अन्येषांपदानामन्तरांतरेमध्येतन्नदपोद्देन यथागवांश्रुती॰
नांमार्गंसत्वराः अप्रमत्ताः योगिनस्तन्नद्रूपाध्ययवादेनयथापरंतत्त्वंमृगयते अब्जयवज्राङ्कुशाशनानि ध्वजैश्चक

तैतत्रतत्राब्जयवांकुशाशनिध्वजोपपन्नानिपदानिविट्पतेः मार्गेगवामन्यपदांतरांतरेनिरीक्षमाणा
ययुरंगसत्वराः १८ अंतर्ह्रदेभुजगभोगपरीतमारात्कृष्णंनिरीहमुपलभ्यजलाशयांते गोपांश्चमूढ
धिषणान्परितःपशूंश्चसंक्रंदतःपरमकश्मलमापुरार्ताः १९ गोप्योनुरक्तमनसोभगवत्यनंतेतत्सौहृ
दस्मितविलोकगिरःस्मरन्त्यः ग्रस्तेहिनाप्रियतमेभृशदुःखतप्ताः शून्यंप्रियव्यतिहृतंददृशुस्त्रि॰
लोकं २० ताःकृष्णमातरमपत्यमनुप्रविष्टांतुल्यव्यथाःसमनुगृह्यशुचास्रवंत्यः तास्ताव्रजप्रियकथाः
कथयंत्यआसन्कृष्णाननेर्पितदृशोमृतकप्रतीकाः २१ कृष्णप्राणान्निर्विशतोनंदादीन्वीक्ष्यतंह्रदम्
प्रत्यषेधतसभगवान्रामःकृष्णानुभाववित् २२

त्वातिपदानिसत्यलोकादीनिभुवनानितद्ददितिभावः १८ ततश्चसर्पशरीरवेष्टितंकृष्णंसंहृतान्निरीक्ष्यगोपालांश्च
पशूंश्चतथानिरीक्ष्यार्ताः परंमोहमापुः १९ प्रियेणश्रीकृष्णेनविरहितंत्रैलोक्यंशून्यंददृशुः २० २१ २२ ॥ ८॰

80A

अनन्यगतिमात्मानमित्थं निरीक्ष्य अतएवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञायदुरंगावंधाद्दतिष्टदित्य
न्वयः २३ तस्य प्रध्यमानेनवपुषाव्यथितात्मभोगोभुजंगः कुंडली उन्मुच्यतेत्यक्ताङ्घ्रिपितः अग्रतः स्वफणानु
न्नमय्यश्वसन्केवलमीक्षमाणः तस्याकर्षंभूतः श्वसनरंध्रेषुनासाविवरेषुविषंयस्यसः तथाश्रमरीषोमांड

इत्थं स्वगोकुलमनन्यगतिंनिरीक्ष्यसस्त्रीकुमारमतिदुःखितमात्महेतोः आज्ञायमर्त्यपदवीमनुवर्तमा
नः स्थित्वामुहूर्तमुदतिष्ठदुरंगवंधात् २३ तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्त्वोन्नमय्यकुपितः स्वफ
णान्भुजंगः तस्थौश्वसन्श्वसनरंध्रविषोम्बरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः २४ तंजिह्वयाद्वि
शिखयापरिलेलिहानंद्वेसृक्किणीह्यतिकरालविषाग्निदृष्टिं क्रीडन्नमुंपरिससारयथाखगेंद्रोवभ्रामसो
प्यवसरंप्रसमीक्षमाणः २५ एवंपरिभ्रमहतौजसमुन्नतांसमानम्यतत्पृथुशिरःस्वधिरूढआद्यः तन्मूर्ध
रत्ननिकरस्पर्शातिताम्रपादांवुजोखिलकलादिगुरुर्ननर्त २६

कपाकभाजनंतद्वत्संतप्तानिस्तब्धानिर्ईक्षणानियस्य तथाउल्मुकानिमुखेषुयस्यसचसच २४ हरिस्तुक्रीडन् तमसुं
सर्पंपरिससारपरितोवभ्राम अतिकरालाविषाग्नियुक्ताहष्टिर्यस्यतं निह्वयाद्विशिखयेतिप्रतिमुखमेवं २५ परिभ्रमे
णैवहृतमोजोयस्यतम् उन्नतावंसौयस्यतम् तस्यमूर्धस्थयेरत्नैराताम्रैस्तेषांस्पर्शेनातिरुणौपादांवुजेयस्यसः ननु
कथंचंचलेषुशिरःसुननर्तेतत्राह अखिलकलानामादिगुरुः २६

श्री॰ भा॰ द॰ टी॰ ८१

81

२० शतैकशीर्ष्णः शतंपञ्चोत्तराणिमुख्यानिशीर्षाणियस्य तस्यतीर्णायुषोपिपुनर्भ्रमतः यद्यच्छिरोननमते
स्तब्धतांनजहाति नृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द तदाचआस्यतोमुखेभ्योनस्तोनासाविवरेभ्यश्चअसृग्वमन्
नागः परमकश्मलमापः २८ पुनरपिरुषाउच्चैःनिःश्वसतोयद्यत्समुन्नमतिसकृत्पदाघातेनानुनमयत् इह अस्मि

तंनर्त्तमुद्यतमवेक्ष्यतदातदीयगंधर्वसिद्धमुनिचारणदेववध्वः प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पो
पहारनुतिभिः सहसोपसेदुः २७ यद्यच्छिरोननमतेंगशतैकशीर्ष्णस्तत्तन्ममर्दखलदंडधरोंघ्रिपातैः
क्षीणायुषोभ्रमतउल्बणमास्यतोसृङ्नस्तोवमन्परमकश्मलमापनागः २८ तस्याक्षिभिर्गरलमुद्वमतः
शिरःस्वयद्यत्समुन्नमतिनिःश्वसतोरुषोच्चैः नृत्यन्पदानुनमयन्दमयांबभूवपुष्पैःप्रपूजितइवेहपुमा
न्पुराणः २९ तच्चित्रतांडवविरुग्णफणातपत्रोरक्तंमुखैरुरुवमन्नृपभग्नगात्रःस्मृत्वाचराचरगुरुंपुरुषं
पुराणं नारायणंतमरणंमनसाजगाम ३० कृष्णस्यगर्भजगतोतिभरावसन्नंपार्ष्णिप्रहारपरिरुग्णफ
णातपत्रं दृष्ट्वाहिमाद्यमुपसेदुरमुष्यपत्न्यआर्ताःश्लथद्वसनभूषणकेशबंधाः ३१

नैवमरैर्हृष्टैर्गंधर्वादिभिःशोभा सन्तःपुराणःपुरुषश्चवसयशोदानंदनःपुष्पैःपूजितः यद्वा तदागंधर्वादिभिःपुष्पैः
प्रपूजितोगोपैःपुराणःपुमानिवदृष्टइति यद्वापुष्पैःसुपूजितइवेह प्रसन्नःसन्दमयांबभूवहितंकृतवानित्यर्थः २९
अशरणशरणं ३० गर्भेजगंतियस्यतस्यअतिभरेणअवसन्नंआक्रांतंपार्ष्णिःपादपृष्ठंआद्यंश्रीकृष्णंस्मरयंतोविसंसमा

[illegible] ३१

८१

81A

ताः शरणं प्रपन्नाः सत्यः तं प्रणेमुः सविग्नमनसः विह्वलचित्ताः भुवीति तस्मिन्स्थाने जलादधस्तादातीरे वा शमल
स्य पापात्मनोपि भर्तुर्मोक्षमेवः भर्तुर्यच्छमलं तस्य वा भूतपतिं प्राणिसार्थस्य पतिं शरणं आश्रयप्रदं ३१ प्रथमं ता
वत्कोपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति न्याय्यो हीति तत्र दंडानुमोदनं षड्भिर्दशभिश्चाहरेरेवेतिः प्रा
र्थनं पंचभिः श्लोकैस्ततः पन्नगयोषितो नच निग्रहानुग्रहलक्षणं तव वैषम्यमित्याहुः धत्सेदममिति अनुशंसन्

तास्ते सविग्नमनसोथ पुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः साध्व्यः कृतांजलिपुटाः शमल
स्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ३२ नागपत्न्य ऊचुः न्याय्यो हि दंडः कृतकिल्बिषेस्मिंस्तवाव
तारः खलनिग्रहाय रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ३३ अनुग्रहोयं भवतः कृतो
हि नो दंडोसतां ते खलु कल्मषापहः यद्दंदशूकत्वममुष्य देहिनः क्रोधोपि तेनुग्रह एव संमतः ३४ तपः
सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन च धर्मोथवा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजीवः

आलोचयन् ३३ निग्रहोप्यनुग्रहायेत्युक्तमिदानीमनुग्रह एवायं न निग्रह इत्याहुः अनुग्रह इति नः अस्माकं यस्माद
समर्पत्वं दृश्यते अतः तन्मूलपापनिवर्तको दंडोनुग्रह एव क्रोधत्वेन प्रतीयमानोपीत्यर्थः ३४ महात्माऽयमनुग्र
ह इत्यनेनास्य पूर्वपुण्यमभिनंदंति तप इति स्वयं मानरहितेनान्येभ्यो मानदेन च सर्वं जीवयतीति सर्वजीवः ३५

श्री· भा· द· पू· ८२ 82

नतपआदिनिमित्तएषभाग्योदयः किंत्वचिंत्यंतवकृपावैभवमित्याहुः श्लोकत्रयेणकस्यानुभावइति तपआदि
नात्वलाद्योपियस्याः श्रियःप्रसादमिच्छति साश्रीललनापिश्रीरेवललनाउत्तमास्त्रीयस्य त्वदंघ्रिस्पर्शाधिका
रस्यवांछयातपआचरत् अस्यसर्पस्यतुः किंकृतइतिकोवेत्तीत्यर्थः ३६ यत्तवपादरजःप्रपन्नाःप्राप्ताःपारमेष्ठ्यादि
कमपितत्त्वंमन्यते ३७ अहोतदेषःप्रपन्नतएवप्राप्यअन्यैर्लक्ष्म्यादिभिरपिपुनःकथंभूतपादरजः यदिच्छतःसेव्यमे

कस्यानुभावोस्यनदेवविद्महेतवांघ्रिरेणुस्पर्शाधिकारः यद्वांछयाश्रीर्ललनाचरत्तपोविहायकामान्सु
चिरंधृतव्रता ३६ ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं नयोगसिद्धीरपुनर्भवंवावांछंतिय
त्पादरजःप्रपन्नाः ३७ तदेषनाथापदुरापमन्यैस्तमोजनिःक्रोधवशोप्यहीशः संसारचक्रेभ्रमतःशरीरि
णोयदिच्छतःस्याद्विभवःसमक्षः ३८ नमस्तुभ्यंभगवतेपुरुषायमहात्मने भूतावासायभूतायपरायपर
मात्मने ३९

व भवत्वितिप्रार्थयतएवसमक्षः प्रत्यक्षएवविभवःअपेक्षितः सम्यग्भवति ३८ नमस्तुभ्यंभ
गवतेअचिंत्यैश्वर्यादिगुणाय तदुपपादनायदशभिःश्लोकैर्विशेषणानि पुरुषायपूर्णाय पूर्णत्वेहेतुः सर्वदेहे
ष्वन्तर्यामिरूपेणवर्तमानाय महात्मनेएवमपिनातिपरिच्छिन्नायकुतोभूतावासायआकाशाद्याश्रयायएव ८२
तदपिकुतोभूतायसर्वमपिसतेकुतःपरायकारणाय किंचपरमात्मनेकारणातीताय ३९

82A कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिस्तूभयोर्निधये ।
ताभ्यां पूर्णाय कथं तथात्वमत उक्तं ब्रह्मणेनंतशक्तये ब्रह्मणे कथंभूताय अगुणाय अविकाराय कथंभूताय अ
नंतशक्तये प्राकृताय प्रकृतिप्रवर्तकाय । प्राकृतायेति वा अप्राकृताय अनंतशक्तियुक्ताय अयमर्थः अगुणत्वादवि
कारं ब्रह्म तन्निमात्रत्वात्कारणातीतं प्रकृतिप्रवर्तकोनंतशक्तिर्विज्ञाननिधित्वादीश्वरः कारणं तदुभयात्मने नम
इति ४० अनंतशक्तित्वात्कालशक्त्या विश्वस्रष्टृत्वादिरूपेण नमस्यंति कालाय कालस्वरूपाय कालनाभाय काल

ज्ञानविज्ञाननिधये ब्रह्मणेनंतशक्तये अगुणायाविकाराय नमस्ते प्राकृताय च ४०
कालाय कालनाभाय कालावयवसाक्षिणे विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ४१
भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ४२

शक्त्याश्रयाय कालावयवानां क्षणादिसमयानां साक्षिणे ततश्च विश्वाय विश्वरूपाय तर्हि किं जडो नेत्याह तदुपद्र
ष्ट्रे न च तद्द्रष्टृमात्राय किं तु तत्कर्त्रे न च तत्कर्तृमात्राय विश्वहेतवे सर्वकारणरूपाय ४१ तदेवाहुः भूतमात्रेंद्रियप्राणम
नोबुद्ध्याशयात्मने आशयश्चित्तं भूतादिरूपाय अतः सर्वकारणरूपायेति अहंकारात्मतया नमस्यंति त्रिगुणेनेति
एवं सृष्टिकार्ये यस्त्रिगुणोभिमानस्तेन गूढः स्वांशभूतानामात्मनामनुभूतिर्येन तस्मै ४२

श्री·
भा·द·
सू·
८३
83

तेत्वहंकारानावृतइतिस्तुवंति नमोनंतायअहंकारापरिच्छेदात् अतःसूक्ष्मायअदृश्यत्वात् अतएवकूटस्थाय
षड्रूपाधिकृतविकाराभावात् अतएवविपश्चितेसर्वज्ञाय एवंवस्तुतःस्तुत्वा अचिंत्यमायात्वेनपुनःस्तुवंति ना
नावादानुरोधायअस्तिनास्तिसर्वज्ञःकिंचिज्ज्ञःबद्धोमुक्तएकोऽनेकइत्यादीन्नानावादाननुरुणद्धिमाययाऽनुवर्त
तेयस्तस्मै किंचवाच्यवाचकशक्तये अभिधानाभिधेयशक्तिभेदादपिनानारूपत्वेनप्रतीतायेत्यर्थः ४३ अनावृत
त्वमेवदृढत्वंतरेणापिस्तवयंत्यःस्तुवंति नमःप्रमाणमूलायप्रत्यायमानकार्यस्तज्ज्ञानानुभावःप्रमा प्रमायोगाद्यवच्छिन्नं

नमोऽनंतायसूक्ष्मायकूटस्थायविपश्चिते नानावादानुरोधायवाच्यवाचकशक्तये ४३
नमःप्रमाणमूलायकवयेशास्त्रयोनये प्रवृत्तायनिवृत्तायनिगमायनमोनमः ४४ न
मःकृष्णायरामायवसुदेवसुतायच प्रद्युम्नायाऽनिरुद्धायसात्वतांपतयेनमः ४५

प्रमाणं चक्षुरादीनांचक्षुरादिरूपाय अतएवकवयेस्वयंतन्निरपेक्षज्ञानाय कुतः शास्त्रयोनयेवेदात्मकनिःश्वासा
य किंच प्रवृत्तायनिवृत्तायनिगमायनमोनमः ४४ अनावृतैश्वर्यत्वादेवचतुर्मूर्तिरूपेणसर्वोपास्यत्वेननमस्यंति
नमःकृष्णायेतिश्लोकेन रामायसंकर्षणाय वसुदेवसुतायच वसुदेवशब्दितेशुद्धसत्वेतत्प्रकाशमानायवा ८३
सुदेवायेत्यर्थः सात्वतामुपासकानांपतयेसालोक्यादिनापालकाय एवंचतुर्मूर्तयेकृष्णायतुभ्यंनमइति ४५

83A

कथंचतुर्मूर्तितेतितदाह: नमोगुणप्रदीपायेति गुणान्अंतःकरणानितानिप्रदीपयतिप्रकाशयतीतितस्मै
तथापितज्ञाद्यधिष्ठातृत्वेनचतुर्मूर्तितेत्यर्थः ननुतथाप्येकस्यैवकथंचतुष्टयमतआह: गुणात्मच्छादनायचतै
रेवगुणैरुपासकानांफलवैचित्र्यायआत्मानमाच्छादयतानात्वेनप्रकाशमानायेत्यर्थः नन्वेकथंतर्हिप्रतीति
रतआह गुणवृत्त्युपलक्ष्यायचित्तादीनांचेतनाध्यवसायादिवृत्तिभिरुपलक्ष्याय उपलक्षणमेवाह: गुणद्रष्ट्रे

नमोगुणप्रदीपायगुणात्मच्छादनायच गुणवृत्त्युपलक्ष्यायगुणद्रष्ट्रेस्वसंविदे ४९
अव्याकृतविहारायसर्वव्याकृतसिद्धये हृषीकेशनमस्तेस्तुमुनयेमौनशीलिने ५०

तत्साक्षिणेकथंचिदुपलक्ष्यएवनज्ञेयइत्याह: स्वसंविदे अगोचरायेत्यर्थः ४९ अगोचरत्वमुपलक्ष्यत्वंचदर्शयं
स्तोनमस्यति अव्याकृतविहाराय अतर्क्यमहिम्नइत्यर्थः सर्वव्याकृतसिद्धयेसर्वकार्योत्पत्तिप्रकाशहेतवेनाप
लक्षणयोग्यायेत्यर्थः उपलक्षणांतरमाह: हृषीकेशकरणप्रवर्तक किंविषयलिप्सयान मुनयेआत्मारामाय
किंसाधनवशेन नहिनहि मौनशीलिने मौनमात्मारामतातत्स्वभावाय ५० ये

ज्ञतः परावरगतिज्ञायस्थूलसूक्ष्माणांगतिज्ञत्वेननकापिसज्जमानायेत्यर्थः अपिच सर्वाध्यक्षायसर्वस्याधि
श्री· ष्ठात्रेकृतपतत् अविश्वायनुविश्वंयस्मिन् तन्निषेधावधये विश्वायचतद्विवर्त्ताधिष्ठानायेत्यर्थः किंच तद्दृष्ट
भा·द· अध्यासापवादसाक्षिणे अपिच अस्यचविश्वाध्यासस्यतदपवादस्यचसर्वैर्विद्याविद्याभ्यांहेतवेसहेतवेविद्या
पु· रूपायअसहेतवेअविद्यारूपाय यद्वा अविश्वायविश्वस्मैतेजसाध्वस्तावस्थारहिताय विश्वायचमाययास्वांशैस्तत्र
८४ द्वस्थायतद्दृष्टेतासामवस्थानांभावाभावसाक्षिणे अन्यत्समानं तस्मात्सर्वगतिज्ञत्वसर्वाधिष्ठातृत्वात्मा॥
84

परावरगतिज्ञायसर्वाध्यक्षायतेनमः अविश्वायचविश्वायतद्द्रष्टेस्यचहेतवे ४८ त्वंह्यस्यजन्मस्थितिसं
यमान्विभोगुणैरनीहोऽकृतकालशक्तिधृक् तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविहारईहसे

मन्वादिभिर्निरतिशयैश्वर्यायतुभ्यंनमइति विशेषणैरसंकीर्णैः पंचपंचाशताद्भुतः अहिह्वीभिःप्रसन्नोवा।
स्मासामिवभवेदरिः ४८ एवंतावत्दंडानुमोदनेननमस्कारैश्चभगवंतंप्रसाद्यइदानींत्वदधीनानांप्राणिनां
कोपराधस्त्वाशयवंतः प्रार्थयंते त्वंहीति अस्यलोकस्यजन्मादीन्त्वमेवाकृतस्वकरोः नतस्वतोलालसेस्का
रहूपेणसतः स्वभावानत्योरत्वादीन्प्रतिबोधयन्ईहसेक्रीडसि यद्वा अस्यजन्मादीन्त्वमीहसेइत्यन्वयः क ८४
थंभूतः अकृतानादिर्याकालशक्तिस्तांधारयतीतितथान्यत्समानं ४९

84A अतस्तस्य तवैव अमूस्तनवस्तन्वं ते इति क्रीडोपस्कराः तथापि तवाधुना शांताः प्रियाः कृतः सतां धर्मपरि
पालनेच्छया ईहतः प्रवर्तमानस्य अतस्तानवितुं स्थातुः स्थितस्य ५० एवं च तवाप्रियाचरणयोयमपराधः त

तवैव तेमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः शांताः प्रियास्ते ह्यधुनावितुं सतां स्थातु
श्च ते धर्मपरीप्सयेहतः ५० अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः क्षंतुमर्हसि शांतात्मन्मूढस्य
त्वामजानतः ५१ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः स्त्रीणां नः साधुशोच्यानां पतिः प्राणः
प्रदीयतां ५२ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात् ५३
शुक उ० इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ५४ प्र
तिलब्धेंद्रियप्राणः कालियः शनकैर्हरिं कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ५५ कालिय उ०
वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ५६

हि सोढव्य इति ५१ ५२ युष्मदनुग्रहे अन्येषां मत्सरे एवेति चेन्नेत्याहुः विधेहीति त्वदाज्ञया प्राणिनो नाशयामेति
भावः ५३ ५४ यदसद्ग्रह इति यतः स्वभावो असद्ग्रहरूपः यद्वा यतः स्वभावादसति देहादौ ग्रहः सदुस्त्यज इति ५६

श्री॰ भा॰ द॰ पू॰ ८५

८५

गुणैः विविधतया सृज्यत इति गुणविसर्जनं तत्रापि नानास्वभावादयो यस्य तत् ५७ जात्या जन्मनैव उरुमन्यवो येषां
ते स्वयं कथं त्यजामः ५८ हि यस्मात् तत्र त्वन्मायात्यागे भवानेव कारणमिति अनुग्रहं विधेहि ममाज्ञयात्वा

त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं नानास्वभाववीर्यौजोयोनिबीजाशयाकृतिः ५७ वयं च तत्र भग
वन्सर्पा जात्योरुमन्यवः कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयं ५८ भवान्हि कारणं तत्र सर्वज्ञो ज
गदीश्वरः अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ५९ श्रीशुक उवाच इत्याकर्ण्य वचः प्राह भगवान्कार्यमा
नुषः नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरं ६० सज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी पद्यभि
श्रुतिभिश्चैव श्रुतो याहि ममाज्ञया य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं कीर्तयन्नुभयोः संध्योर्न युष्म
द्भयमाप्नुयात् ६१ योऽस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते
द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ६३

दत्तीति ईश्वरत्वाद्विग्रहं च विधेहीति ५९ ६० यतो गोभिर्नृभिश्च नदी भुज्यतामिति न युष्मत्तो भयमाप्नुयात् न
स युष्माभिर्भयं नोत्पादनीयमित्याज्ञा ६१ इतोऽपि त्वया निर्गन्तव्यमित्याह योऽस्मिन्निति त्वयि स्थिते तन्न संभवतीति ८५

भयः ६२ नत्वत्तनवमभयंमवेदिंत्याह द्वीपमिति ॥

85A ६४ ६७ ७१ इतिभावार्थेदशमेषोडशोध्यायः १६ नागंसमदशेनागालयंतंनिरयापयत् वंभुन्नाडुःखतः॥

ऋषिरुवाच एवमुक्तोभगवताकृष्णेनाद्भुतकर्मणा तंपूजयामाससुदानागपत्न्यश्चसादरं ६४ दि
व्यांबरःस्रगमणिभिःपरार्ध्यैरपिभूषणैः दिव्यगंधानुलेपैश्चमहत्योत्पलमालया ६५ पूजयित्वाजग
न्नाथंप्रसाद्यगरुडध्वजं ततःप्रीतोभ्यनुज्ञातःपरिक्रम्याभिवंद्यतं सकलत्रसुहृत्पुत्रोद्वीपमब्धेर्जगा
मह तदैवसामृतजलायमुनानिर्विषाभवत् ६७ अनुग्रहाद्भगवतःक्रीडामानुषरूपिणः गतेस
र्पेपरिष्वज्यमृतंपुनरिवागतं ६८ गोपामूर्ध्न्यभिषिंचन्तिहार्दनस्निग्धचक्षुर्भिर्नेत्रजैर्जलैः कृष्णमक्लिष्टकर्माणमन्ये
विस्मितचेतसः ६९ तुष्टुवुर्मुदितागोपाःदृष्ट्वाशिवजलांनदीं ७० गीयमानेसगोपीभिश्चरितेचारु
विक्रमः संस्तूयमानोगोपैश्चकृष्णोव्रजमुपागमत् ७१ इतिश्रीभागवतेदशमस्कंधेषोडशोध्यायः १६
राजोवाच नागालयंरमणकंकस्मात्तत्याजकालियः कृतंकिंवासुपर्णस्यतेनैकेनासमंजसं १ शुकउ
उपहार्यैःसर्पजनैर्मासिमासीहयोबलिः वानस्पत्योमहाबाहोनागानांप्राक्निरूपितः २

श्रोतान्स्वमात्मत्रदवादपात् असमंजसंअप्रियं १ उपहार्यैःसुपर्णभक्ष्यैःसर्पजनैःसर्पायत्नैर्वानस्पत्यःवनस्पतेर्मू
लेदेयः नागानांतद्वाधपरिहाराय योबलिर्निरूपितः उपकल्पितः २

तेचनागाः स्वंस्वंतंभागंजनैर्दत्तं सुपर्णायप्रयच्छंति ततोभीताः गोपीथ्यायआत्मरक्षणाय ३ विषवीर्याभ्यांयोम
श्री॰ दस्तेनाविष्टः काद्रवेयः कद्रूपुत्रः गरुडंकदर्थीकृत्यअविगणय्य यद्वा उपहार्यैः सुपर्णभक्ष्यैः सर्पापवजना
भा॰द॰ सैः नागानांसंबंधी यस्मिन्नेकैकोनागोदीयते तथाभूतोयोबलिः सुपर्णायनिरूपितः तत्रस्वंस्वंभागंसर्वेनागाः
टी॰
८९ स्वंस्वंभागंप्रयच्छंतिनागाःपर्वणिपर्वणि गोपीथ्यायात्मनःसर्वेसुपर्णायमहात्मने ३ विषवीर्यमदा
विष्टःकाद्रवेयस्तुकालियः कदर्थीकृत्यगरुडंस्वयंतंबुभुजेबलिं ४ तच्छ्रुत्वाकुपितोराजन्गरुडो
भगवत्प्रियः विजिघांसुर्महावेगःकालियंसमुपाद्रवत् ५ तमापतंतंतरसाविषायुधःप्रत्यभ्ययादु
त्थितनैकमस्तकः दद्भिःसुपर्णंव्यदशद्ददायुधःकरालजिह्वोच्छ्वसितोग्रलोचनः ६ तंतार्क्ष्यपुत्रः
सनिरस्यमन्युमान्प्रचंडवेगोमधुसूदनासनः पक्षेणसव्येनहिरण्यरोचिषाजघानकद्रूसुतमुग्रविक्रमः

प्रयच्छंति कालियस्तुनप्रयच्छति किंतुअन्यैर्दत्तमर्पितंबलिंस्वयमेवबुभुजे ४ ५ विषमेवायुधंयस्यसःप्रत्य
भ्ययात् योद्धुंप्रतिजगाम उत्थितनैकमस्तकः उन्नमितानेकफणाः ददायुधः दंतायुधः करालजिह्वश्वासाव
च्छ्वसितोग्रलोचनश्च उच्छ्वसितानिउज्जृंभितानि उग्राणिलोचनानियस्यसः ६ तार्क्ष्यपुत्रोगरुडःमधुसूदनस्य ८६

86A

तस्यगरुडस्यागम्यं अगाधतयाचदुरासदं ८ तदगम्यत्वेकारणमाह तत्रेतिनिवारितोपि ९ ११ लेलिहःस

सुपर्णपक्षाभिहतःकालियोतीवविह्वलः ह्रदंविवेशकालिंद्यास्तदगम्यंदुरासदं ८ तत्रैकदाजलच
रंगरुडोभक्ष्यमीप्सितं निवारितःसौभरिणाप्रसह्यक्षुधितोहरत् ९ मीनान्सुदुःखितान्दृष्ट्वादीनान्मी
नपतौहते कृपयासौभरिःप्राहतत्रत्यक्षेममाचरन् १० अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति स
द्यःप्राणैर्वियुज्येतसत्यमेतद्ब्रवीम्यहं ११ तंकालियःपरंवेदनान्यःकश्चनलेलिहः अवात्सीद्गरुडाद्भीतः
कृष्णेनचविवासितः १२ कृष्णंह्रदाद्विनिष्क्रांतंदिव्यस्रग्गंधवाससं महामणिगणाकीर्णंजांबूनदपरि
ष्कृतं १३ उपलभ्योत्थिताःसर्वेलब्धप्राणाइवासवः प्रमोदनिभृतात्मानोगोपाःप्रीत्याभिरेभिरे १४ य
शोदारोहिणीनंदोगोप्योगोपाश्चकौरव कृष्णंसमेत्यलब्धेहाआसंलब्धमनोरथाः १५ रामश्चाच्युत
मालिंग्यजहासास्यानुभाववित् प्रेम्णातमंगमारोप्यपुनःपुनरुदैक्षत १६

र्पःअतस्तत्रावात्सीत् १२ जांबूनदंसुवर्णंतेनालंकृतं १३ असवः इंद्रियाणि प्रमोदनिभृतात्मानः आनंदपू
र्णमनसः १४ लब्धेहाः लब्धचेष्टाः १५ १६

श्री०
भा० द०
पू०
८७
87

नगा हृत्वा अपि सर्वे शुष्काः संतः सद्य एव विरूढा इत्यर्थः १७ ते विप्रा ऊचुः १८ नष्टलब्धप्रजा नष्टप्राया पुनर्ल

नगा गावो वृषा वत्सा लेभिरे परमां मुदं नंदं विप्राः समागम्य गुरवः सकलत्रकाः १७ ऊचुस्ते कालि
यग्रस्तो दिष्ट्या मुक्तस्तवात्मजः देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे १८ नंदः प्रीतमना राजन् गाः
सुवर्णं तदादिशत् यशोदा च महाभागा नष्टलब्धप्रजा सती १९ परिष्वज्यांकमारोप्य मुमोचाश्रुकलां
मुहुः तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः २० तदा शु
चिवनोद्भूतो दावाग्निः सर्वतो व्रजं सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे २१ तत उत्थाय संभ्रांता दह्य
माना व्रजौकसः कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं २२ कृष्ण कृष्ण महाभाग हे रामामितविक्रम
एष घोरतमो वह्निस्तावकान् ग्रसते हि नः २३ सुदुस्तरान्नः स्वान् पाहि कालाग्नेः सुहृदः प्रभो न शक्नु
मस्त्वच्चरणं संत्यक्तुमकुतोभयं २४

ब्धा प्रजा यया सा १९ श्रमेण कर्षिताः उपकूलतः कूलप्रांते २० २३ कालाग्नेर्मृत्युरूपादग्नेः न मृत्योर्बिभीमः ८७
किं तु त्वच्चरणवियोगादित्याहुः न शक्नुम इति २४

87A

विमोहितानहिदंडेनततः स्वंशरणंगतान् गोपानपादनंतोसावनंताद्भुतशक्तितः २५ इतिश्रीभावार्थेसप्तदशः
१७ अष्टादशेततोग्रीष्मेवसंतगुणलक्षिते अचालयद्बलेनालंप्रलंबलीलयाहरिः हतवान्तंफणाग्रेषुका
लियस्यसकौतुकं वलंप्रलंबंतंगोसमारोहयदरातिहा १ गोपालछद्ममायया गोपालानामेवछद्मयस्या

इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः तमग्निमपिवत्तीव्रमनंतोनंतशक्तिधृत् २५ इतिश्रीभागव
तेदशमस्कंधेसप्तदशः १७ श्रीशुकउ॰ अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः अनुगीयमानोन्य
विशद्व्रजंगोकुलमंडितं १ व्रजेविक्रीडतोरेवंगोपालछद्ममायया ग्रीष्मोनामर्तुरभवन्नातिप्रेया
न्शरीरिणां २ सचवृंदावनगुणैर्वसंतइवलक्षितः यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः ३
यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितम्

तया २ वसंतसाम्यमाह चतुर्भिः ३ सचेत्यादि यत्रग्रीष्मेपिनिर्झराणांनिर्ह्रादेन घोषेणनिवृत्तस्वनाः झि
ल्लिकाःकठोरध्वनयः सूक्ष्मकीटकायस्मिन् स्वरेतिपाठेगंधर्वजातिरुक्तोशेस्वराणांगंधर्वाणांकि
लिकाःकठोरध्वनिः भृंगास्तुइच्छद्वेपयत्रमदंगस्वतिकेचित् तथाभूतेवृंदावनेभवति किंचशश्वत्तेषांनिर्झरा
णांशीकरैःअंबुकणैः रजीषास्निग्धाश्चयेद्रुमास्तेषांमंडलैर्मंडितम् ४ ॥

श्री· भा·द· टी· ९८

४४

तत्र ग्रीष्मे वने वा निदाघो ग्रीष्मस्तेन तत्कालीनवह्न्यर्काभ्यां च यो भवति द्रवस्तापः अतिशाद्वले अतिहरिततृ
णाकीर्णे यद्वा अतिक्रांतशाद्वले यस्मिन् ५ ननु शाद्वलमेव ज्ञातस्मिंस्तत्राह अगाधानि तोयानि यासां तासां ह्र
दिनीनां तटस्पर्शाभिरूर्मिभिः पुलिनैर्द्रवत्पुरीषं पंको यस्याः तस्या भुवः रसं शाद्वलिनं शाद्वलरूपं तां च विष

सरित्सरःप्रस्रवणोर्मिवायुनाकल्हारकंजोत्पलरेणुहारिणा नविद्यतेयत्रवनौकसांदवोनिदा
घवह्न्यर्कभवोतिशाद्वले ५ अगाधतोयाह्रदिनीतटोर्मिभिर्द्रवत्पुरीषाः पुलिनैः समंततः नय
त्रचंडांशुकराविषोल्बणाभुवोरसंशाद्वलिनंप्रगृह्णते ६ वनंकुसुमितंश्रीमन्नदच्चित्रमृगद्विजं गा गा
यन्मयूरभ्रमरंकूजत्कोकिलसारसं ७ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः वे
णुंविरणयन्गोपैर्गोधनैःसंवृतोविशत् ८ प्रवालबर्हस्तबकस्रग्धातुकृत
भूषणाः रामकृष्णादयोगोपाननृतुर्युयुधुर्जगुः ९

वडल्बणा अपि सूर्यरश्मयो न गृह्णते न हरंति ६ तद्वनं प्राविशत् इत्युत्तरेणान्वयः नदंतः चित्रा मृगा द्विजा
श्च यस्मिन् गायंतो मयूरा भ्रमराश्च यस्मिन् कूजंतः कोकिलाः सारसाश्च यस्मिन् ७ तत्राविशत् ८ ९

१०॥ काकपक्षाः चूडाकरणात् प्राक्तनकेशाः भ्रामणादिप्रकारैः नियुद्धेन बाहुयुद्धेन विक्रीडंतः १२ १३
कुंभैः कुंभवृत्तफलैः अस्पृश्यपत्वंनेत्रबंधस्तदाद्यैः मृगाणां खगानां च चेष्टया १४ दर्दुरप्लावैः मंडूकप्लुतिभिः

नृत्यस्व नृत्यतः केचिज्जगुः केचिदवादयन् वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे १० गोपजा
तिप्रतिच्छन्ना देवा गोपालरूपिणः ईडिरे कृष्णरामौ च नटा इव नटं नृप ११ भ्रामणैर्लंघनैः क्षेपैरास्फोटन
विकर्षणैः विक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् १२ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्व
यं शशंसतुर्महाराज साधु साध्विति वादिनौ १३ क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः अ
स्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया क्वचिद्दर्दुरप्लावैर्विविधैरुपहासकैः कदाचित्स्पंदोलिक
या कर्हिचिन्नृपचेष्टया १५ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने नद्यद्रिद्रोणिकुंजेषु काननेषु सरः
सु च १६ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः गोपरूपी प्रलंबोऽगादसुरस्तज्जिहीर्षया १७

स्पंदोलिकया दोलालंबने नृपानामिव लीलया १५ नद्यः अद्रिद्रोणयः पर्वतदर्यः कुंजानि च लतादिपिहि
तगुहागाराणि १६ पशून् चारयतोः सतोः तद्वने तस्मिन्वने तयोर्जिहीर्षया हर्तुमिच्छया १७

श्री॰
भा॰ द॰
स॰
८९
89

१८ यथायथं वयोबलाद्यनुरूपं द्वंद्वीभूय १९ परिवृढौ नायकौ तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः २॰ २१
वाह्यमानाः हृष्टैर्नोह्यमानाः २२ २४ कृष्णदृष्टिवंचनाय अवरुह्यतेस्मिन्नित्यवरोहणं मर्यादा ततः परं दूरमगात्

तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् १८ तत्रोपाहूय गो
पालान्कृष्णः प्राह विहारवित् हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथं १९ तत्र चक्रुः परिवृढौ गो
पालरामजनार्दनौ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे २॰ आचेरुर्विविधाः क्रीडा वाह्यवाहकल
क्षणाः यत्रारोहंति जेतारो वहंति च पराजिताः २१ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं भांडीरकं ना
म वटं जग्मुः कृष्णपुरोगमाः २२ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः क्रीडायां जयिनस्तांस्तानूहुः
कृष्णादयो नृप २३ उवाह कृष्णो भगवान्श्रीदामानं पराजितः वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं
अविषह्यं मन्यमानो रामं दानवपुंगवः वहन्द्रुततरं प्रागादवरोहणतः परं २४ तमुद्वहन्धरणिधरें
द्रगौरवं महासुरो विगतरयो निजं वपुः समास्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवा

२५ धरणिधरेंद्रवत् वहुगौरवं यस्य तं निजमासुरं वपुरास्थितः पुरटपरिच्छदः सुवर्णालंकारः तडिद्द्युमान् वि
द्युद्दीप्तिमान्नित्यलंकारोपमा उडुपतिवाडिति रामोपमा उडुपतिं वहतीति उडुपतिवाट् यद्वियथो वितस्यानेस्थि
ताविद्युतो भवंति उपरि चोडुपतिस्तदा सोंबुदो यथा भाति तद्वद्बभाविसर्थः २९

८९

89A

अत्युमतिवेगेन प्रदीप्तेदृशौयस्मिन् तत् भ्रुकुटितटसंलग्नाउग्रादंष्ट्रायस्मिंस्तत् प्रदीप्तदृक् भ्रुकुटितटं
यस्मिन् उग्रादंष्ट्रायस्मिन् तच्चतच्चेतिवा ज्वलंत्यः शिखाः केशायस्मिन् तत् २७ आगतस्मृतिस्तानंयस्यस
अतएवाभयः आत्मनः सार्थंगोपसमूहंविहायहरंतंरिपुंअहनत् यद्वा विहायसाआकाशमार्गेण आत्म

निरीक्ष्यतद्वपुरलमंबरेचरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ज्वलच्छिखंकटककिरीटकुंडलत्विषा
द्भुतंहलधरईषदत्रसत् २७ अथागतस्मृतिरभयोरिपुंबलोविहायसार्थमिवहरंतमात्मनः रुषा
हनच्छिरसिदृढेनमुष्टिनासुराधिपोगिरिमिववज्ररंहसा २८ सआहतःसपदिविशीर्णमस्त
कोमुखाद्वमन्रुधिरमपस्मृतोसुरः महारवंव्यसुरपतत्समीरयन्गिरिर्यथामघवतआयुधाह
तः २९ दृष्ट्वाप्रलंबंनिहतंबलेनबलशालिना गोपाःसुविस्मिताआसन्साधुसाध्वितिवादिनः ३०
आशिषोभिगृणंतस्तंप्रशशंसुस्तदर्हणं प्रेत्यागतमिवालिंग्यप्रेमविह्वलचेतसः ३१ पापेप्रलंबे
निहतेदेवाःपरमनिर्वृताः अभ्यवर्षन्बलंमाल्यैः शशंसुःसाधुसाध्विति ३२ इतिश्रीभागवतेदश
मस्कंधेअष्टादशोध्यायः १८

नः प्राप्तमर्थमिवहरंतमिति वज्ररंहसावज्रवेगेनमुष्टिनातस्यप्र
लंबस्यमस्तकेमुष्टिहननेनजीवितत्यक्तः अपागतस्मृतिःप्राप्तमृतोवा २८ अपस्मृतः गतस्मृतिः महारवंस
मीरयन् व्यसुर्गतप्राणः २९ ३० तदर्हणंप्रशंसार्हंप्रशंसतः ३१ ३२ इतिदशमेअष्टादशोध्यायः १८

कृनविशेषेनिविष्टंतुगोपगोकुलमच्युतः मुंजारण्यमरण्याग्रेररक्ततत्रिपानतः १ दूरत्वाश्चारिणीःदूरचारि
श्री· एयः १ वनाद्वनांतरंनिर्विशंत्योदावेनतर्षिताः क्रंदंत्यः इषीकाटवींप्रस्थछिन्नत्वचनतृणविषाणपविवि
भा·द· ष्णुः २ कृष्णरामौसखादिदृक्षंतेनतौ ३ तासांगवांखुरैर्दंद्भिश्चछिन्नैस्तृणैः गोष्पदैरंकितैश्चभूप्रदेशैस्त
पू·
९०· ग्रुक·उ· क्रीडासक्तेषुगोपेषुतद्गावोदूरचारिणीः स्वैरंचरंत्योविविशुस्तृणलोभेनगह्वरं १
90 अथगावोमहिष्यश्चनिर्विशंत्योवनाद्वने इषीकाटवींविविशुःक्रंदंत्योदावतर्षिताः २ तेप
श्यंतःपशून्गोपाःकृष्णरामादयस्तदा जातानुतापनविदुर्विचिन्वंतोगवांगतिं ३ तृणैस्तत
खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां मार्गमन्वगमन्सर्वेनष्टाजीव्याविचेतसः ४ मुंजाटव्यांभ्रष्ट
मार्गंक्रंदमानंस्वगोधनं संप्राप्यतृषिताःश्रांतास्ततस्तेसन्न्यवर्तयन् ५ ताआहूताभगवता
मेघगंभीरयागिरा स्वनाम्नांनिनदंश्रुत्वाप्रतिनेदुःप्रहर्षिताः ६ ततःसमंताद्दवधूमकेतुर्य ७
दृच्छयाभूत्क्षयकृद्वनौकसां समीरितस्सारथिनोल्बणोल्मुकैर्विलेलिहानस्थिरजंगमान्महान्
ऐर्वोगवांमार्गमन्वगमन् नष्टाजीव्यागतजीविकासाधनाः अतएवविचेतसः ४ मुंजाटव्यपिमैवइषीकाट
वी ५ ६ गोपानांनाशहेतुर्वनवह्निःसर्वतः प्रादुरभूत् सारथिनावायुना ७ ९०·
का

90A

८ ॥ कृच्छ्राद्दुष्करप्रवेशात् तद्दुःश्रमादिजनितात् तत्क्षणमेव भांडीरकं नीत्वा तानमोचयदित्यर्थः १२

तमापतंतंपरितोदवाग्निंगोपाश्चगावश्चसमीक्ष्यभीताः ऊचुश्चकृष्णंसवलंप्रपन्नायथाहरिंमृत्यु
भयार्दिताजनाः ८ कृष्णकृष्णमहावीर्यहेरामामितविक्रम दवाग्निनादह्यमानान्प्रपन्नांस्त्रातु
मर्हथ ९ नूनंत्वद्बांधवाःकृष्णनचार्हंत्यवसीदितुं वयंहिसर्वधर्मज्ञत्वन्नाथास्त्वत्परायणाः १० श्री
शुक उ० वचोनिशम्यकृपणंबंधूनांभगवान्हरिः निमीलयतमाभैष्टलोचनानीत्यभाषत ११ तथे
तिमीलितात्तेष्वभगवानग्निमुल्बणं पीत्वामुखेनतान्कृच्छ्राद्योगाधीशोव्यमोचयत् १२ ततश्च
तेक्षीण्युन्मील्यपुनर्भांडीरमापिताः निशाम्यविस्मिताआसन्नात्मानंगाश्चमोचिताः १३ कृष्ण
स्ययोगवीर्यंतद्योगमायानुभावितं दावाग्नेरात्मनःक्षेमंवीक्ष्यतेमेनिरेमरं १४ गाःसन्निवर्त्य
सायाह्नेसहरामोजनार्दनः वेणुंविरणयन्गोष्ठमगाद्गोपैरभिष्टुतः १५

क्षणेनैव भांडीरं प्रापिताः ततश्च तेक्षीण्युन्मील्य विस्मितः १३ १४ ॥

श्री· भा· द· पृ· ९१

91

श्रीरामाद्रिस्वगोपानांस्वांगमाहात्म्यहृष्यतां स्वैश्वर्यमाविरकरोद्वनवह्निनिपानतः १८ इतिश्रीभावार्थप
कोनविंशः १९ विंशेप्रावृट्शरच्छोभावर्णनेनवनोचिताः प्रावृट्क्रीडानिरूप्यंतेगोपरामयुजोहरेः ह्रे
यादेयोपमानेनप्रावृट्शारदतश्रियोः वर्णनेनवद्भुतैश्वर्यहृस्वलीलाविवक्षया तत्रप्रावृड्वर्णने ततश्च

गोपीनांपरमानंदआसीद्गोविंददर्शनात् क्षणंयुगशतमिवयासांयेनविनाभवत् १९ इतिश्री
भागवतेदशमेएकोनविंशो १९ श्लक३· तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्षमात्मनः गोपाः
स्त्रीभ्यः समाचख्युः प्रलंबवधमेवच १ गोपवृद्धाश्चगोप्यश्चतदुपाकर्ण्यविस्मिताः मेनिरे
देवप्रवरौकृष्णरामौव्रजंगतौ २ ततः प्रावर्ततप्रावृट्सर्वसत्वसमुद्भवा विद्योतमानप
रिधिर्विस्फूर्जितनभस्तला ३ सांद्रनीलांबुदैर्व्योमसविद्युत्स्तनयित्नुभिः अस्पष्टज्योतिरा
च्छन्नंब्रह्मेवसगुणंबभौ ४

दिह्वाविंशास्या १२ सर्वेषांप्राणिनांसमुद्भवउत्पत्तितोजीवनतश्चयस्यांसाप्रावृट् विद्योतमानाःपरिधयः
परिवेषा परिवेशास्तपरिधिपरितिविद्युद्विलसितादिशोवायस्यांसा विस्फूर्जितंसंस्तंभितंनभस्तलंचयस्यां
सा ३ सांद्रैर्निविडैर्नीलांबुदैः विद्युद्गर्जितसहितैराच्छन्नंसगुणंगुणैरावृतंजीवात्वंविद्युद्गर्जितांबुदानांस

त्वरजस्तमोभिरुपमा ४

91A

पर्जन्योमेघस्सूर्यश्चयोरिति पर्जन्यः सूर्यः स्वगोभिः रश्मिभिः कालेयथोचितसमये अत्रराज्ञोपमा करादान
तः समयेपुनर्दानतश्चसूविता ५ अस्यविश्वस्यप्राणानेआप्यायनकारे जीवनमुदकंमुमुचुः कृपालवोय
थातमजनेनिरीक्ष्यानुकम्पमानाः तदाप्यायनायस्वजीवनमपित्यजेति तद्वन्महान्तोमेघास्तडित्वंतस्तमेवि

अष्टौमासान्निपीतंयद्भूम्याश्चोदमयंवसु स्वगोभिर्मोक्तुमारेभेपर्जन्यःकालआगते ५ तडित्वंतोम
हामेघाश्चंडश्वसनवेपिताः प्राणनंजीवनंह्यस्यमुमुचुःकरुणाइव ६ तपःकृशादेवमीढाआसी
द्वर्षीयसीमही यथैवकाम्यतपसस्तनुःसंप्राप्यतत्फलं ७ निशामुखेषुखद्योतास्तमसाभांतिनो
ग्रहाः यथापापेनपाषंडानहिवेदाःकलौयुगे ८ श्रुत्वापर्जन्यनिनदंमंडूकाव्यसृजन्गिरः तू
ष्णींशयानाःप्राग्यद्वद्ब्राह्मणानियमात्यये ९ आसन्नुत्पथवाहिन्यःक्षुद्रनद्योनुशुष्यतीः पुंसो
यथाःस्वतंत्रस्यदेहद्रविणसंपदः १०

स्वंनिरीक्ष्यचंडवायुभिर्वेपिताःसंतोजीवनंमुमुचुरिति ६ तपसाग्रीष्मेणकृशादेवमीढापर्जन्यसिक्ता मिहसे
चनेधातुः वर्षीयसीउच्छूनाउष्टाकाम्यंतपोयस्यतस्यततःकामान्संप्राप्ययथेति ७ नित्यकर्मावसाने आ
चार्यनिनदंश्रुत्वातद्विष्यायथोग्रधीयंतेतद्वदिति ९ अनुशुष्यतीःअनुशुष्यंत्यः अस्वतंत्रस्येंद्रियपरत

भागवतदशमस्कंध ८०

हरिद्भिः नीलैः शष्पैर्बालतृणैर्नीलवर्णाः क्वचित् क्वचिदिंद्रगोपैः कीटविशेषैर्लोहिताः तत्र तत्र उत्सिलिं
ध्रैः छत्राकारैरुद्भिन्नैः कृतच्छाया नृणां राज्ञां श्रीः सेनासनासमृद्धिरिव ११ क्षेत्राणीति तदा हि वृष्टेरविच्छे
देन सेतः प्रियंवादयोमुदं ददति विच्छेदे तु धनिनामुपतापं चेति १२ अबिभ्रन् अबिभ्रुः यथा हरिनिषेव

हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिताः उत्सिलिन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ११ क्षेत्रा
णि सस्यसम्पद्भिः कार्षिकाणां मुदं ददुः धनिनामुपतापं च दैवाधीनमजानतां १२ जलस्थलौकसः
सर्वे नववारिनिषेवया अबिभ्रन्रुचिरं रूपं यथा हरिनिषेवया १३ सरिद्भिः संगतः सिंधुश्चुक्षुभे
श्वसनोर्मिमान् अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा १४ गिरयो वर्षधाराभिर्हन्यमाना न
विव्यथुः अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः १५ मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना ह्यसं

येति हरिसेवायां प्रवृत्ता हि सद्य एव सर्वे रुचिरा भ \\ स्कृताः नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता
वंति तस्याः परमधर्मत्वात् परमसाधवत्वाच्छ्रुतद्ददिति १३ कामाक्तं काम वासनायुक्तमिति श्वसनो
र्मिसाम्यं गुणैर्विषयैर्युज्यत इति तथा सरित्संगति साम्यं १४ अधोक्षज एव चेतो येषां ते १५ असंस्कृता
अशोधिताः नाभ्यस्यमाना इत्यसंस्कृते साम्यं कालेन चाहता इति तृणाच्छादनसाम्यं १६

श्री·
भा·द·
टी·
९२

92A स्वभावःचपलःस्त्रीणांदोषःपुंसामतःस्मृतः प्रमदास्तुप्रमाद्यंतिक्वचिन्नैवविपश्चितः कामिन्यःपुरुषेषुगुणि
ष्विव यथा कामिन्यःपुंश्चल्यः ७ निर्गुणांज्यारहितमपि गुणिनिगर्जितशार्ङ्गवति अभ्रात्अशोभत गुणा^
व्यतिकरात्मकेव्यक्तेप्रपंचे अगुणवान्निर्गुणःपुरुषोयथेति ८ स्वभावासाभासितयाहंममेति स्वचैतन्येन

लोकबंधुषुमेघेषुविद्युतश्चलसौहृदाः स्थैर्यंनचक्रुःकामिन्यःपुरुषेषुगुणिष्विव ७ धनुर्वियति
माहेंद्रंनिर्गुणंचगुणिन्यभात् व्यक्तेगुणव्यतिकरेःगुणवान्पुरुषोयथा ८ नरराजोडुपच्छन्नःस्व
ज्योत्स्नाराजितैर्घनैः अहंमत्याभासितयास्वभासापुरुषोयथा मेघागमोत्सवाहृष्टाःप्रत्यनन्दन्शिखं
डिनः गृहेषुतप्तानिर्विण्णायथाच्युतजनागमे १० पीत्वापःपादपाःपद्भिरासन्नानात्ममूर्तयः प्रा
क्क्षामास्तपसाश्रांतायथाकामानुसेवया ११ सरःस्वशांतरोधःसुन्यूषुरंगापिसारसाः गृहेष्वशां
तकृत्येषुग्राम्याइवदुराशयाः १२

वप्रकाशितेनाहंकारेणच्छन्नोजीवोयथा यद्वा अहंवि
ज्ञानद्रातावेत्ताकर्ताइतिस्वप्रतीत्यैःवारोपितयेति ९ मेघागमेनउत्सवोयेषांतेष्वपि स्वगृहःनितरामवसन्नो
प्रतोहृष्टाः १० नानात्ममूर्तयः अनेकरूपदेहाः ११ अशांतानिपंककण्टकादियुक्तानिरोधांसितटानियेषां
तेष्वपि स्वगृहःनितरामवसन् सारसाःचक्रवाकाः अशांतानिघोराणिअरतानिवाकृत्यानियेषुतेष्वपिगृहेषु १२

श्री· भा·द· टी· ९३ 93

ईश्वरे रुद्रे २३ तुन्नः प्रेरिताः अर्थिषः कामान् विट्पतयो राजानः वणिजापतयो वा द्विजेरिताः पुरोहि
तेरुक्ताः २४ प्रावृषिकृतां क्रीडां वर्णयति एवं वनमिति सप्तभिः वर्षिष्ठे समृद्धे २६ वनौकसः पुलिंदाः
प्रमुदिताः भगवान्ददृशे तथा वनराजीः मधुच्युतो मधुस्रवा ददृशे गिरेः सकाशात् जलधाराश्च तास्ता

जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे पाषंडिनामसद्वादैर्वेदमार्गाः कलौ यथा २३ व्यमुंचन्वा
युभिर्नुन्ना भूतेभ्योऽथामृतं घनाः यथाशिषो विट्पतयः काले काले द्विजेरिताः २४ एवं वनं तद्वर्षि
ष्ठं पक्वखर्जूरजंबुमत् गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः २५ धेनवो मंदगामिन्य ऊधोभा
रेण भूयसा ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः २६ वनौकसः प्रमुदिता वनराजीर्मधुच्यु
तः जलधारा गिरेर्नादादासन्ना ददृशे गुहाः २७ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति नि
र्विश्य भगवान्रेमे कंदमूलफलाशनः २८ दध्योदनं समुपानीतं शिलायां सलिलांतिके संभोजनीयै
र्बुभुजे गोपैः संकर्षणान्वितः २९

नादान् आसन्नान् निकटावर्तिनीर्गुहाश्च यद्वा वनौकसः प्रमुदिता आसन् तथा च वनराजीः वनराजयः मधु
च्युतः आसन् गिरेर्जलधारा आसन् तानेवंभूतान् आददृशे सर्वतो ददर्श भगवान् तथा धाराणां नादान् गु ९३

93A

३॰ ३१ शारदंवर्णयति एवंनिवसतोरित्यष्टादशभिः विगतानिअभ्राणियस्यांसा स्वच्छानिअंबूनि या
स्यांसा अपरुषः शांतोनिलोयस्यांसाचसाच ३१ नीरजानांउत्पत्तिर्यस्यांतयाशारदाकृत्वानीरजानांशत्प
त्यावा ३२ व्योमाब्दइति व्योमादीनांचतसॄणांचत्वरोमलान् शारदहरत् आश्रमिणांचतसॄणांकृच्छ्रेजाताभ
क्तिर्यया: शुभमस्तुखेहरति तथाहिब्रह्मचारिणोगुर्वर्थोदकाहरणकुंभश्रमंयथाभक्तिर्हरति तथाप्र

शाद्वलोपरिसंविश्यचर्वतोमीलितेक्षणान् तृप्तान्वृषान्वत्सतरान्नागस्तोषोथभरश्रमाः ३॰ प्राव
ट्श्रियंचतांवीक्ष्यसर्वभूतमुदावहां भगवान्पूजयांचक्रेआत्मशक्त्युपबृंहितां ३१ एवंनिवसतोस्त
स्मिन्रामकेशवयोर्व्रजे शरत्समभवद्व्यभ्रास्वच्छांब्वपरुषानिला ३२ शरदानीरजोत्पत्त्यानीरा
णिप्रकृतिंययुः भ्रष्टानामिवचेतांसिपुनर्योगनिषेवया ३३ व्योमाब्दोभ्रंभूतशावल्यंभुवःपंकमपां
मलं शरज्जहाराश्रमिणांकृच्छ्रेभक्तिर्यथाशुभं सर्वस्वंजलदाहित्वाविरेजुःशुभ्रवर्चसः यथात्य
णांस्यतेनानुपयोगात् गुरुभिरप्यकृतार्थस्यतस्यानियो क्तैषणाः शांतामुनयोमुक्तकिल्विषाः ३५
गात् एवंव्योमाब्दाभ्रंशरतजहार यथाचशुद्धिणापमादिसांकर्यंभक्तिर्हरतिविविक्तवासरतस्मतेः तथाभूता
नांशावल्यंसांकर्यंशरत् वर्षासुहिहरितैर्भिर्यासांजलानिवसति यथाचवनस्थस्यमलधारणक्लेशंभक्तिर्ह
रति एवंभुवःपंकंशरत् यथाचयतीनांकामादिवासनामलंश्रीकृष्णभक्तिर्हरति एवमपांमलंशरदिति ३४

श्री० भा० द० टी० ९४ 95

गिरिष्विति अयंभावः नतुयावद्व्यायाः कर्मविद्यामिवज्ञानिनोज्ञानामृतंसर्वतोवितरन्ति अपितुकृपया
क्वचिदेव एवंगिरयःशिवंनिर्मलंतोयंक्वचिन्मुमुचुःक्वचिन्न नपुनःप्रावृषीवसर्वतइति ३६ ३७ गाधे
ह्रदेजलेचरंतीति तथातेमीनादयोऽविदन्लेभिरे ३८ शनैःशनैरिति तत्र ममतामिवपंकंसहंतामि

गिरयोमुमुचुस्तोयंक्वचिन्नमुमुचुःशिवं यथाज्ञानामृतंकालेज्ञानिनोददतेनवा ३६ नैवा
विन्दन्क्षीयमाणंजलंगाधजलेचराः यथाऽयुरन्वहंक्षय्यंनरामूढाःकुटुंबिनः ३७ गाधवारि
चरास्तापमविन्दन्शारदर्कजं यथादरिद्रःकृपणःकुटुम्ब्यविजितेंद्रियः ३८ शनैःशनैर्जहुः
पंकंस्थलान्यामंचवीरुधः यथाहंममतांधीराःशरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णीं
समुद्रःशरदागमे आत्मन्युपरतेसम्यङ्मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्वपोऽगृह्णन्कर्षि
काःदृढसेतुभिः यथाप्राणैःस्रवज्ज्ञानंतन्निरोधेनयोगिनः ४१

वामतापक्वतांजहुरिति ३९ आत्मनिजीवात्मन्युपरतेनिष्क्रियेमुनिरिवनिश्चलांबुःसन्एवव्युपरतागमो
निवृत्तवेदघोषएवंतूष्णींबभूवेति ४० केदारेभ्योवद्धसेतुशालिक्षेत्रेभ्योदृढैःसेतुभिरपोऽगृह्णन् ततः ९४
परेवृष्ट्यभावात् प्राणैरिंद्रियैःसन्निरोधेनइंद्रियप्रत्याहारेण ४१

94A देहाभिमानजंबोधइवव्रजयोषितांमुकुंदइवेत्यर्थः ४२ शारदाविमलास्तारकायस्मिंस्तत् शाब्दब्रह्मणोवेदा
स्यार्थान्सत्वंतरमीमांसानिर्णीतान्दर्शयतीतियथातद्वदिव ४३ ४४ समोन्यूनाधिकःशीतश्चउष्णश्चतंप्र
फुल्लकुसुमसंपृक्तंमारुतमाश्लिष्यजनास्तापंजहुः नतुगोप्यःकृष्णापहृतचेतसः तेनतासांसंतापोडुःस

शारदर्कांशुजांस्तापान्भूतानामुडुपोहरत् देहाभिमानजंबोधोमुकुंदोव्रजयोषितां ४२ खमशो
भतनिर्मेघंशरद्विमलतारकं सत्वयुक्तंयथाचित्तंशब्दब्रह्मार्थदर्शनं ४३ अखंडमंडलोव्योम्नि
रराजोडुगणैःशशी यथायदुपतिःकृष्णोवृष्णिचक्रावृतोभुवि ४४ आश्लिष्यसमशीतोष्णंप्रसू
नवनमारुतं जनास्तापंजहुर्गोप्योनकृष्णहृतचेतसः ४५ गावोमृगाःखगानार्यःपुष्पिण्यः
शारदाभवत् अन्वीयमानाःस्ववृषैःफलैरीशक्रियाइव ४६ उदहृष्यन्वारिजानिसूर्योत्थाने
कुमुद्विना राज्ञातुनिर्भयालोकायथादस्यून्विनानृप ४७

हृइति यद्वा नकारउपमानार्थः तदाकृष्णहृतचेतसइतिचेतसाकृष्णमाश्लिष्ययथागोप्यःतापंजहुरितिःस्य
र्थः ४५ पुष्पिण्योपागर्भिण्यःअन्वीयमानाःस्ववृषैःस्वपतिभिरनिच्छंत्योपिवलादनुगम्यमानाईश्वराराधना
र्थाक्रियावलात्फलैरनुगम्यमानाःसमस्तभोगगर्भायथेति ४६ कुमुत्कुमुदंकुत्सितेमुत्यस्येतिदस्युसाम्य ४७

मा

श्री॰ भा॰ द॰ पू॰ ९५ 95

आग्रयणोर्नवान्नप्राशनार्थैर्वैदिकैरिन्द्रियैरिन्द्रियार्थैर्लौकिकैश्च महोत्सवैः कलाभ्यां रामकृष्णाभ्यां दर्शनादि
महोत्सवाभ्यां ४८ वणिजोयतयोनृपाःस्नातकाश्चशरद्दृष्टाभ्यां वर्षरुद्धाः संतोनिर्गम्यार्थान्वाणिज्यस्वा
ध्यायरविजयविद्यादींश्च प्रपेदिरे प्रापयंत यथामंत्रयोगादिसिद्धाः कालेश्चागते स्वपिंडान्योगादिप्राप्या

पुरग्रामेष्वाग्रयणैरिंद्रियैश्च महोत्सवैः बभौभूः पक्वसस्याढ्याकलाभ्यांनितरांहरेः ४८ वणिङ्मु
निनृपस्नातानिर्गम्यार्थान्प्रपेदिरे वर्षरुद्धाःयथासिद्धाःस्वपिंडान्कालआगते ४९ इतिश्रीदश
मेविंशोध्यायः २० श्रीशुकउवाच इत्थंशरत्स्वच्छजलंपद्माकरसुगंधिना न्यविशद्वायुना
वातंसगोगोपालकोच्युतः १ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं म
धुपतिरवगाह्यचारयन्गाःसहपशुपालबलश्चुकूजवेणुम् २

न् देवादिदेहानिति ४९ इतिश्रीभावार्थे विंशोध्यायः २० एकविंशेशरद्रम्यवृंदावनगतेहरौ तद्वेणु
स्वनमाकर्ण्यगोपीभिर्गीतमीर्यते इत्थमेवंभूतंवनं तदेवाह शारदास्वच्छानिजलानियस्मिंस्तत् वायु
नावातमनुगतंवनंतदेकव्यानमित्यर्थः १ ततश्चकुसुमितवनराजिषुशुष्मिणोमत्ताः भृंगादिजाश्चतेषां
कुलानितैर्घुष्टाः सरांसिसरितःमहीध्राश्चयस्मिन् तद्वनेकृष्णोवगाह्यप्रविश्यवेणुमवादयत् २ ९५

95A

तत्कृष्णस्यवेणुगीतंस्मरस्योदयोयस्मात् तदाश्रुत्यपरोक्षंयथाभवति व्रजेस्थितत्वात् ३ विक्षिप्तमनसो
व्याकुलचित्ताः ४ यादृक्कृष्णस्य स्मरणंतासांमनसः क्षोभकंजातंतदाह वर्हापीडमिति नटवत्वरंवपुः
बिभ्रत्वृंदावनंप्राविशत् कथंभूतंवने स्वपदैरंकितैः रमणंरतिजनकं गोपवृंदैर्गीतकीर्तिः तथावर्ह

श्री
तद्व्रजस्त्रियमाश्रुत्यवेणुगीतंस्मरोदयं काश्चित्परोक्षंकृष्णस्यस्वसखीभ्योन्ववर्णयन् ३ तद्वर्ण
यितुमारब्धाःस्मरंत्यःकृष्णचेष्टितं नाशकन्स्मरवेगेनविक्षिप्तमनसोनृप ४ वर्हापीडंनटवरवपुः
कर्णयोःकर्णिकारंबिभ्रद्वासःकनककपिशंवैजयंतीचमालां रंध्रान्वेणोरधरसुधयापूरयन्
गोपवृंदैर्वृंदारण्यंस्वपदरमणंप्राविशद्गीतकीर्तिः ५ इतिवेणुरवंराजन्सर्वभूतमनोहरम्
श्रुत्वाव्रजस्त्रियःसर्वावर्णयंत्योभिरेभिरे ६

मयमापीडंशिरोभूषणंबिभ्रत् वर्हमापीडोयस्मिन्नितिवपुषोविशेषणंवा वेणुवादनमुत्प्रेक्षते रन्ध्रान्वे
णोरिति अतोनूनंअधरसुधयैवपूर्णाद्वेणोरुच्चलंतीगीतवत्समर्पितमर्हतीतिभावः अभिरेभिरे वर्णयं
तः पदेपदेपरमानंदमूर्तिकृष्णंपरिरब्धवंत्यः ६

हे सख्यः

अनुवर्णनमेवाह अक्षण्वतामिति त्रयोदशभिः अक्षण्वतां चक्षुष्मतां तावदिदमेव फलं प्रियदर्शनं परमन्यंन
विदामः न विद्म इत्यर्थः तच्च फलं सखिभिः सह पशून्वनं प्रवेशयतोः रामकृष्णयोः वक्त्रं यैर्निपीतं तैरेव जुष्टं से
वितं नान्यैरित्यर्थः कथंभूतं वक्त्रं अनुवेणु वेणुमनुवर्तमानं तं वादयन् तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटा
तविसर्गं अथवा यैर्निपीतं तयोर्वक्त्रं तैर्जुष्टमिदमेव अक्षण्वतां अक्ष्णोः फलमिति ७ अन्याऊचुः चूतेति चूतप्रा
वालादीनां विचित्राभिर्मालाभिः अनुदृष्टे ईषदंतरांतरतः संपृक्ते परिधाने नीलपीतांबरे ताभ्यां विचित्रौ वेषौ य

गोप्यऊचुः अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः वक्त्रं व्रजेशसुतयोरनु
वेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षं ७ अन्याऊचुः चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्त
परिधानविचित्रवेषौ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्वच गायमानौ ८ अन्याऊचुः गो
प्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानां भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृ

यौस्तौ क्वचकदाचित् पशुपालगोष्ठ्यां गोपालसभायां मध्ये अलमत्यर्थं विरेजतुः अहो गोपानां पुण्यमिति भावः ८
अन्याऊचुः हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत् कृतवान् कथं यत् यस्मात् गोपिकानामेव भोग्यामृतमपि दामो
दराधरसुधां स्वयं तंत्रेण यथेष्टं भुंक्ते कथमवशिष्टरसं केवलमवशिष्टरसमात्रं यथा भवति यतः यासां पयसा पुष्ट
लामातृत्वात् ह्रदिन्यः हृष्यत्त्वचः विकसितकमलवनमिषेण रोमांचिता लक्ष्यंते येस्तासां वंशे जातास्ते तरवोपि म

स्वा२ तथा

96A

काश्चिदाहुः हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण तनोति कथंभूतं यद्देवकीसुतस्य पदांबु
जाभ्यां लब्धा लक्ष्मीः शोभासंपत् येन तत् किंच गोविंदस्य वेणुमत्र वेणुनिनादं श्रुत्वा अनंतरं मंदग
र्जितं नीलमेघं च मत्वा मनाग्धे मयूरास्तेषां नृत्यं प्रेक्ष्य सत्त्वशस्तत्र तत्र अद्रिसानुषु अवरतानि उपरतक्रिया
णि अन्यानि सत्वमत्तानि समानि यस्मिंस्तत् नैतदन्येषु लोकेषु विद्यते अतो भुवः कीर्तिं वितनोतीत्यर्थः

काश्चिदूचुः वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मीः गोविंद
वेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्त्वं ९ अपराश्चाहुः धन्याः स्म मूढ
मतयोपि हरिण्य एता या नंदनंदनमुपात्तविचित्रवेषं आकर्ण्य वेणुरणितं सहकृष्णसाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ११

१० अपराश्चाहुः हे सखि मूढमतयः तिर्यग्जातयोपि एता हरिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुना
दमाकर्ण्य नंदनंदनं प्रतिप्रणयसहितैरवलोकनैर्विरचितां पूजां संमानं दधुः कृतवत्यः किंच कृष्णसारैः
स्वपतिभिः सहिता एव दधुः अस्मत्पतयस्तु गोपाः क्षुद्राः सम्मर्दनं न सहंते इति भावः सविस्मये ११

श्री॰
भा॰द॰
पू॰
३०
97

अन्याऊचुः हेगोप्यआश्चर्यंशृणुत वनितानामुत्सवोयस्मात्तत्रूपंशीलंचयस्यतंश्रीकृष्णंनिरीक्ष्य तेनवा
दितवेणुरवमाकर्ण्यगीतंचश्रुत्वाविमानैर्गच्छंत्योदेव्योदेवानामंगेषुस्थिताअपि स्मरेणनुन्नसाराःपरि
त्यक्तधैर्यामुमुहुः मोहलिंगमाहुः भ्रश्यत्प्रसूनाःकबराश्चूडायासांताविगतानीव्योयासांताः अत्रसर्वत्रवा
क्रमभेदान्नातीवसंगतिर्वक्तव्या ॥ अन्याऊचुः वेणुरवेणैवानंभिन्नैः उन्नमितैःकर्णपुटैःपिबंत्यःसत्यः त

अन्याऊचुः कृष्णंनिरीक्ष्यवनितोत्सवरूपशीलं श्रुत्वाचतत्क्वणितवेणुविचित्रगीतं देव्यो
विमानगतयःस्मरनुन्नसाराभ्रश्यत्प्रसूनकबरामुमुहुर्विनीव्यः ॥१२॥ गावश्चकृष्णमुखनि
र्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैःपिबंत्यः शावाःस्नुतस्तनपयःकवलाःस्मतस्थु
गोविंदमात्मनिदृशाश्रुकलाःस्पृशंत्यः ॥१३॥

थाशावाश्चवत्साश्चस्तनपानेप्रवृत्ताः समनं
तरमेववेणुगीतंश्रुत्वा तदेवपीयूषमुत्तभितकर्णपुटैःपिबंत्यःस्नुतस्तनपयःकवलाःकेवलंस्तनेभ्यः
क्षरितक्षीरग्रासास्तुखेषुयेषांते तस्थुःविस्मृतक्रियाबभूवुरित्यर्थः तत्रहेतुः गोविंददृशामार्गेणआत्म ३०
निमनसिस्पृशंत्यः आलिंगंत्यः अतएव अश्रूणांकलालेशालोचनयोर्यासांताः गावः तेचशावाःवत्साः १३

97A

भोश्चंद्रमातः अस्मिन्वनेयेविहगाः पक्षिणः तेप्रायेणमुनयोभवितुमर्हंतीति कुतः कृष्णेक्षितंकृष्णस्यदर्शनंत
च्चफलाद्यंतरंविनायथा भवति तथारुचिराः प्रवालायेषांतान् द्रुमभुजान् वृक्षाणांशाखाआरुह्यतेन
कृष्णेनउदितंप्रकटितंकलवेणुनागीतं केनापिमुखेनामीलितदृशास्त्यक्तान्यवाचःसंतः येशृण्वंतिइति
तथाहिमुनयः श्रीकृष्णदर्शनेयथाभवंतितथावेदोक्तकर्मफलपरित्यागेन वेदद्रुमशाखारूढाःरुचिर

अन्याआहुः प्रायोबतांबविहगामुनयोवनेस्मिन्कृष्णेक्षितंतदुदितंकलवेणुगीतं आरुह्ययेद्रुम
भुजान्रुचिरप्रवालान्शृण्वंतिमीलितदृशोविगतान्यवाचः ॥४॥ नद्यस्तदातदुपधार्यमुकुंदगीत
मावर्तलक्षितमनोभवभग्नवेगाः आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंतिपादयुगलंकमलोप

प्रवालस्थानीयानिकर्माणियेवोपददानाः सुखिनः संतः श्रीकृष्णगीतमेवशृण्वंति अतस्तएवैतेभवितुम
र्हंतीतिभावः येभगवद्गीतंभागवतंशृण्वंतितेवासुदेवरूपाभवितुमर्हंतीत्यर्थः ॥४॥ आस्तांचेतनानांकथा
नद्योपिआवर्तैःपरिभ्रमैर्लक्षितेनसूचितेनमनोभवेनकामेनभग्नोवेगोयासांताः आलिंगनेनस्थगितमा
च्छादितंयथाभवतितथा ऊर्मयएवभुजास्तैः कमलोपहाराःकमलान्युपहरंतः मुरारेःपादयुगलंगृह्णंति

अन्यच्चतिर्यञ्चोऽप्यतो दृष्टेति लोकातिदूरगाशीलत्वादिसाम्यात्सख्युः श्रीकृष्णस्याग्रेऽम्बुदस्तदुपरितउदितः पुनः
श्री· प्रेमणाप्रवृद्धः सन् कुसुमावलीभिः पुष्पसमूहैस्तत्तत्पाषाणोद्भिमभेदैरपि शीकरैरपि हिमैरपि वेति कोशः धारै
भा·द· र्वा सह स्ववपुषाच्छत्रं विहितवान् १६ सानंदकारमाह: पूर्णाः कृतार्थाः पुलिंद्यः शवरांगनाः कथमित्यत
टी· आह प्रथमं दयितानां स्तनेषु मंडितेन आलिप्तेन पुनः स्मरतिसमये उरुगायस्य श्रीकृष्णस्य पादाब्जयोः।
९८

दृष्ट्वातपे व्रजपशून्सहरामगोपैः संचारयंतमनुवेणुमुदीरयन्तं प्रेमप्रवृद्धउदितः कुसुमाव
लीभिः सख्युर्व्यधात्स्ववपुषाम्बुदआतपत्रं १६ पूर्णाः पुलिंद्यउरुगायपदाब्जरागश्रीकुंकुमे
न दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषितेन लिंपन्त्यआननकुचेषु जहुस्तदाधिं १७

गेणारुणेन श्रीः कांतिर्यस्य तेन कुंकुमेन पुनस्तस्य वनस्थलीषु चंक्रमणेन तृणेषु रूषितेन लग्नेन तद्दर्श
नेन तथाभूतस्य कुंकुमस्य दर्शनेन स्मररुजा कृतापीडा यासां ताः तेन कुंकुमेन आननेषु कुचेषु च काम
तप्तेषु लिंपत्यः तदा कामव्यथां जहुः अतः कृतार्थाः धिगस्मान्मादृशाया: एवंभूतमप्याधिशम
नेन न लभंत इति १७

१९८ पुनरप्याश्चर्यं हंतेति हर्षेणाह । हे सख्यः अयमद्रिर्गोवर्धनो भवेद्धरिदासेषु श्रेष्ठः कुतस्तत्राह यस्माद्रा
मकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः तृणाद्युद्गममिषेण रोमहर्षदर्शनात् किंच यन्मानं तनोति स
हगोभिः गणेन सखिसमूहेन च वर्तमानयोस्तयोः कैः पानीयैः सूयवसैः शोभनतृणैः कंदरैर्मूलैश्च
यावितमः तोयमतिपन्नरत्यर्थः १८ हे सख्य इदं त्वतिचित्रमिति गोपैः सह गोवर्धने गाः संचारयतोस्त

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शनप्रमोदः मानं तनोति सहगोगण
योस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १८ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः
कलपदैस्तनुभृत्सु सख्यः अस्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्वि
चित्रं १९ एवंविधा भगवतो या वृंदावनचारिणः वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः
इति श्रीभागवते महापुराणे दशमस्कंधे एकविंशोऽध्यायः २१

योरामकृष्णयोर्मधुरपदैर्महावेणुनादैश्च शरीरिषु ये गतिमंतः तेषामस्पंदनं स्थावरधर्मः तरूणां पुलको
जंगमधर्म इत्यर्थः निर्युज्यंते गाव आभिरिति निर्योगाः पादबंधनरज्जवः अथ च पशवोकर्षणार्थाः पाशा
स्तैः कृतं लक्षणं चिह्नं ययोः शिरसि निर्योगावेष्टनेन स्कंधस्थपाशेन च गोपपरिष्कृतश्रिया विराजमा
नयोरित्यर्थः १९ २० इति श्रीभावार्थे दशमस्कंधे एकविंशोऽध्यायः २१

श्री· भा·द· अ·२२

99

द्वाविंशेगोपकन्यानांवस्त्राहरणलीलया वरंदत्वागतःकृष्णोयज्ञशालामितीर्यते १ गोपीनांकामतःकृष्णे
निस्सीमप्रेमसंगमः कात्यायन्यर्चनोद्भूततत्प्रसादमहोदयः प्रथमेमासिमार्गशीर्षे १२ महामायेत्यादि
संबोधनैस्तवनकिंचिदशक्यमितिसूचयंत्यः प्रत्येकंप्रार्थयंत्यः ४ कृष्णचेतसएवमेवाह भूयान्नन्दसुतःपति

शुकउ॰ हेमंतेप्रथमेमासिनन्दव्रजकुमारिकाः चेरुर्हविष्यंभुंजानाःकात्यायन्यर्चनव्रतं १
आप्लुत्यांभसिकालिंद्याजलांतेवोदितेरुणे कृत्वाप्रतिकृतिंदेवीमानर्चुर्नृपसैकतीं २ गंधैर्मा
ल्यैःसुरभिभिर्बलिभिर्धूपदीपकैः उच्चावचैश्चोपहारैःप्रवालफलतंडुलैः ३ कात्यायनिमहा
मायेमहायोगिन्यधीश्वरि नंदगोपसुतंदेविपतिंमेकुरुतेनमः इतिमंत्रंजपंत्यस्ताःपूजांच
क्रुःकुमारिकाः ४ एवंमासंव्रतंचेरुःकुमार्यःकृष्णचेतसः भद्रकालींसमानर्चुर्भूयान्नन्दसुतः
पति ५ ऊषस्युत्थायगोत्रैःस्वैरन्योन्याबद्धबाहवः कृष्णमुच्चैर्जगुर्यांत्यःकालिंद्यांस्नातुमन्वहं ६ नद्यां
कदाचिदागत्यतीरेनिक्षिप्यपूर्ववत् वासांसिकृष्णंगायंत्योविजह्रुःसलिलेमुदा ७ भगवांस्तदभिप्रेत्य

रित्यानर्चुरिति ५ व्रतस्यपूर्वांगमाह ऊषसीतिगोत्रैर्नामभिः अन्योन्यमाबद्धबाहवःपरस्परगृहीतपाणय ६ ७
योगेश्वराणामीश्वरइतिप्रत्येकंतादृग्मनोरथपूरणसामर्थ्यंदर्शयति तासांकर्मणःसिद्धये फलदातायइति

९६

११A नीपं कदंबं बालै: सह: ९ हे अबला: नो नर्म परिहास: यस्माद्यूयं व्रतश्रांता: १० एकैकशो वा आगत्य स्वी
कुरुत सह एव वा न तत्रास्माकमाग्रह इत्यर्थ: ११ क्ष्वेलितं परिहासं प्रेमपरिप्लुता: प्रेमरससमग्ना: १२ १३

तासां वासांस्युपादाय नीपमारुह्य सत्वर: हसद्भि: प्रहसन्बालै: परिहासमुवाच ह ९ अत्रागत्या
बला: कामं स्वं स्वं वास: प्रगृह्यतां सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्षिता: १० न मयोदितपूर्वं वा
अनृतं तदिमे विदु: एकैकश: प्रतीच्छध्वं सहैवात सुमध्यमा: ११ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्य: प्रेमप
रिप्लुता: व्रीडिता: प्रेक्ष्य चान्योन्यं जातहासा न निर्ययु: १२ एवं ब्रुवति गोविंदे नर्मणाक्षिप्तचेतस:
आकंठमग्ना: शीतोदे वेपमानास्तमब्रुवन् १३ मानयं भो कृथास्त्वां तु नंदगोपसुतं प्रि
यं जानीमोंग व्रजश्लाघ्यं देहि वासांसि वेपिता: १४ श्यामसुंदर ते दास्य: करवाम तवो
दितं देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे १५ श्रीभगवानुवाच भवत्यो यदि मे दास्यो मयोक्तं वा २
करिष्यथ अत्रागत्य स्ववासांसि प्रतीच्छध्वं शुचिस्मिता: १६ ततो जलाशयात्सर्वा दारिका: शीतवेपि हि
ता: पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरु: शीतकर्षि

अंग भो श्रीकृष्ण अनयमन्यायं मा कृथा: १४ नो चे
द्राज्ञे नन्दाय कंसाय वा ब्रुवामहे इत्येति १५ प्रतीच्छध्वं गृह्णीध्वं १६ प्रोत्तेरु: निर्गता: १७

आहताईषत्तत्तयोनीर्वीक्ष्य १८ यूयंधृतव्रताः सत्योविवस्त्राः अपोव्यगाहत अप्सुस्नाना इति यत् एतत्तदु
देवहेलनमपराधमवेत्यर्थः व्रतवैगुण्यभीतानां प्रायश्चित्तमाह अंहसः पापस्य निवृत्तये मूर्ध्न्यञ्जलिं बद्ध्वा
अधोनमः प्रणामं कृत्वेति १९ इति दोषत्वेनाच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्यच्युतिहेतुं मत्वा तस्यव्रत
स्यपूर्तिकामास्तदशेषकर्मणां तस्यव्रतस्य अन्येषामशेषकर्मणां च साक्षात्कृतं फलभूतं तमेव नेमुः यतः

भगवानाहतावीक्ष्य शुद्धभावप्रसादितः स्कन्धे निधाय वासांसि प्रीतः प्रोवाच सस्मितं १८ यूयं विवस्त्रा
यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनं बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेंहसः कृत्वा नमोऽधोवसनं प्रगृह्यतां
इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिं तत्पूर्तिकामास्तदशेषकर्मणां साक्षा
त्कृतं नेमुरवद्यमृग्यतः २० तास्तथावनता दृष्ट्वा भगवान्देवकीसुतः वासांसि ताभ्यः प्रायच्छत्करुणा
स्तेन तोषितः २१ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः वस्त्राणि चैवाप
॥ हृतान्यथाप्यमुं ता नाभ्यसूयन् प्रियसंगनिर्वृताः २२

स एवावद्यमृक् पापमार्जकः २० २१ दृढमत्यर्थं प्रल
ब्धा वञ्चिताः यूयं विवस्त्रा इत्यादिना त्रपया लज्जया च हापिताः त्याजिताः अत्रागत्य स्ववासांसि इत्यादि ग्रहेण
प्रस्तोभिता उपहसिताः सम्बुवाणि नो नर्मेत्यादिना क्रीडनवत्कारिताश्च बद्ध्वाञ्जलिमित्यादिना प्रायश्चित्त

तत्र कृतः प्रियसंगनिर्वृताः श्रीकृ
ष्णसंयोगेन सुखिताः २२

च्छलेन ताना अभ्यसूयन् दोषदृष्ट्या नापश्यन्

१००

100A

प्रेष्टसंगमेन सज्जितावशीकृताः अतोगृहीतचित्ताः सत्योनोचेल्लः गृहीतचित्तत्वमाह तस्मिन्कृसेलज्जापितेत्तणाः
लज्जाविलसितमीत्तणयासांताइत्यर्थः २३ दामोदरइतिभक्तवात्सल्यंदर्शयति अवलाःप्रति २४ भोसाध्व्योभव
तीनांमदर्चनमेवसंकल्पोमनोरथः सचलज्जयायुष्माभिरकथितोपिमयाविदितः समयानुमोदितः अतःसत्यो

परिधायस्ववासांसिप्रेष्टसंगमसज्जिताः गृहीतचित्तानोचेलस्तस्मिंलज्जापितेत्तणाः २३ तासांविज्ञा
यभगवान्स्वपादस्पर्शकाम्यया धृतव्रतानांसंकल्पमाहदामोदरोवलाः २४ संकल्पोविदितःसाध्व्यो
भवतीनांमदर्चनं मयानुमोदितःसोसौसत्योभवितुमर्हति २५ नमय्यावेशितधियांकामःकामायक
ल्पते भर्जिताःक्वथिताधानाःप्रायोवीजायनेष्यते २६ यातावलाव्रजंसिद्धामयेमारंस्यथत्तपाः यडद्दि
श्यव्रतमिदंचेरुरार्यार्चनंसतीः २७ शुकउ० इत्यादिष्टाभगवतालब्धकामाःकुमारिकाः ध्यायंत्यस्तत्प

भवितुमर्हतिग्रहंतीतिसंभावनोक्त्या आत्यंतिकोनभविष्यतीतिसूचितं \\ दांभोजंकृच्छ्रात्रिर्विविशुर्व्रजं २८
२५ तत्कुतइत्यतआह नमयीति कामायपुनःकामभोगाय विषयमहिम्नाकामस्यापिशांतिहेतुत्वादितिभावः
कामाप्ररोहदृष्टांतः भर्जितादग्धाः क्वथितापक्वाः धानाःयवादि वीजाय अंकुरोत्क्रमायनप्रभवंति प्रायइतिस
त्वयापुनःप्ररोहमपिसूचयति २६ सिद्धाःपूर्णमनोरथाःतदाह इमाआगामिनीःक्षारदाःरात्रीःमयारंस्यथेति आर्याका

दशम टि० ११२

श्री॰ २९ ३० ३१ भक्त्यानुकम्पकत्वात्तास्तद्विवर्जितयज्वनां पत्न्यनुग्रहतस्तेषामः हन्कर्ममहामदं विप्रभार्याणामनु
भा॰द॰ ग्रहाय यज्ञवाटंगच्छन् विप्राणांकाठिन्यमभिप्रेत्य तेभ्योपिद्रुमाः श्रेष्ठाइतितानभिनंदतिचतुर्भिः पश्यतेतिनेह
टी॰ लोकत्तुसादयोगोपाः एतान्द्रुमान्पश्यत परार्थमेवएकांतेनजीवितंयेषांतान् तदाह वातवर्षादीन्स्वयंसह
१०१

101

अथगोपैःपरिवृतोभगवान्देवकीसुतः वृंदावनाद्गतोदूरंचारयन्गाःसहाग्रजः २९ निदाघार्कातपेतिग्मे
छायाभिःस्वाभिरात्मनः आतपत्रायितान्वीक्ष्यद्रुमानाहव्रजौकसः ३० हेस्तोककृष्णहेअंशोश्रीदामन्सु
बलार्जुन विशालर्षभतेजस्विन्देवप्रस्थवरूथप ३१ पश्यतैतान्महाभागान्परार्थैकांतजीवितान् वातव
र्षातपहिमान्सहंतोवारयंतिनः ३२ अहोएषांवरंजन्मसर्वप्राण्युपजीवनं सुजनस्येवयेषांवैविमुखायां
तिनार्थिनः ३३ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते
३४ एतावज्जन्मसाफल्यंदेहिनामिहदेहिषु प्राणैरर्थैर्धियावाचाश्रेयएवाचरेत्सदा ३५ इतिप्रवालस्त
वकफलपुष्पदलोत्करैः तरूणांनम्रशाखानांमध्येनयमुनांगतः ३६

मानाअस्माकंनिवारयंति ३२ सुजनस्यकृपालोरर्थिनइव ३३ निर्यासोद्यनरसः तोक्माःपल्लवाद्यंकुराः ३४ ३५ ३ १०१
त्यन्वयनन्वयन् प्रवालादिसमूहैर्नम्रशाखानां तरूणांमध्यतोयमुनांप्राप्तः ३६

101A

३७ कुमारिकाभ्यः पूर्वमेव तन्मर्म्मोज्ज्वलतयाः गृहीतभोज्यानामेव निर्गमात् त्वथार्तास्त्वकं ३८ इतिभावा
र्थे दशमे द्वाविंशः २२ त्रयोविंशे ततो गोपैरन्नयाञ्चापदेशतः तत्पत्न्यनुग्रहात्कृष्णो दीक्षितानन्वतापयत्
१२ भक्ताया इत्येकवचनं मत्वः साधुज्याभिप्रायेण यद्वा जातावेकवचनं १ देवयजनं यज्ञवाटं ४ अस्माद्धि

तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलं ३७ तस्या उ
पवने कामं चारयंतः पशून्नृप कृष्णरामावुपागत्य क्षुधार्ताः इदमब्रुवन् ३८ इति श्रीभागवते दशमे
द्वाविंशः २२ श्रीशुक उ॰ तत्र गत्वोपविष्टास्ते गोपाला यमुनातटे कृच्छ्रं बुभुक्षिता राजन्रामकृष्णो जग
त्पती १ गोपा ऊ॰ राम राम महावीर्य कृष्ण दुष्टनिवर्हण एषा वै बाधते क्षुन्नस्तच्छांतिं कर्तुमर्हथ २
श्रीशुक उ॰ इति विज्ञापितो गोपैर्भगवान्देवकीसुतः भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ३
श्रीभगवानु॰ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया ४
तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः कीर्तयंतो भगवत आर्यस्य मम चाभिधां ५

सर्जिताः आवाभ्यां प्रहिताः संतो याचध्वं ननु वयं गोपा दातारो न तु याचकाः इति चेत्तत्राह आवाभ्यां युष्मा
कं कान्नं तत्र तज्ज्ञा ननु तथापि अपात्रत्वादस्माकं किमिति दास्यंतीति चेत्तत्राह कीर्तयंत इति अस्मन्नामकी
र्तनेनैव युष्माकं पात्रता भविष्यतीति भावः ५

७ अविदूरेवर्त्तमानौसंतौवोयुष्मदन्नमुलषतोभिलषतः वृंगोदनंश्रद्धाचयद्यस्तितर्हियच्छतेति ८ दीक्षि
तावयमभोज्यान्नाइतिवदिष्यंतीतिस्वयमेवाशंक्याहुः दीक्षायाइति दीक्षायाआरभ्याग्नीषोमीयपशुआले
भात्पूर्वंदोषः नततोन्यत्र तथासौत्रामण्याश्चावोःभोज्यान्नत्वंदीक्षितस्य नततोन्यत्रपरस्मिन्नदोषइत्यर्थः ९

मुकडं इत्यादिष्टाभगवतागत्वायाचंततेतथा कृतांजलिपुटाविप्रान्दंडवत्पतिताभुवि ६ हेभूमि
देवाःशृणुतकृष्णस्यादेशकारिणः प्राप्तांजानीतभद्रंवोगोपान्नोरामचोदितान् ७ गाश्चारयंताव
विदूरओदनंरामाच्युतौवुलषतोबुभुक्षितौ तयोर्द्विजाओदनमर्थिनोर्यदिश्रद्धाचवोयच्छतधर्म
वित्तमाः ८ दीक्षायाःपशुसंस्थायाःसौत्रामण्याश्चसत्तमाः अन्यत्रदीक्षितस्यापिनान्नमश्नन्हिदुष्य
ति ९ इतितेभगवद्याच्ञांशृण्वंतोपिनशुश्रुवुः क्षुद्राशाभूरिकर्माणोबालिशावृद्धमानिनः १० दे
शःकालःपृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ११

तदेतत्कृष्णरूपविस्मरणाद्वाचाणमात्रेषेशांते यद्वा क्षुद्राशास्तुच्छांतःकरणाः भूरीणिक्लेशाधिकानिकर्मा
णियेषांतेबालिशाः अतोज्ञाःवृथावयंज्ञानवृद्धाइतिमानयंतः १० ननुकर्मक्रमप्रमुहुल्लब्धाःदेशकालेत्या
यमनंतंकथमनयंसंदेयंतत्राह देशइति पृथग्द्रव्यंपुरोडाशादिद्रव्यं तंत्रंप्रयोगः धर्मोःपूर्वं ११ १०२

102A

मनुष्योयमितिदृष्ट्वा मर्त्यात्मानोब्राह्मणावयंमहान्तइतिमन्यमानाः १२ १३ लौकिकींगतिमिति नहि
कार्यार्थिनोनिर्विद्यतेकोवायाचकोनपराभूयतइत्यादिलोकस्थितिंदर्शयन् १४ केवलंदेहेनगृहेषुवसंति

तंब्रह्मपरमंसाक्षाद्भगवंतमधोक्षजं मनुष्यदृष्ट्यादुष्प्रज्ञामर्त्यात्मानोनमेनिरे १२ नतेयदोमिति
प्रोचुर्नंनेतिचपरंतप गोपानिराशाःप्रत्येत्यतथोचुःकृष्णरामयो तदुपाकर्ण्यभगवान्प्रहस्यज
गदीश्वरः व्याजहारपुनर्गोपान्दर्शयंल्लौकिकींगतिं १४ मांज्ञापयतपत्नीभ्यःससंकर्षणमागतं
दास्यंतिकाममन्नंवःस्निग्धामय्युषितािधिया १५ गत्वाथपत्नीशालायांदृष्ट्वासीनाःस्वलंकृताः न
त्वाद्विजसतीर्गोपाःप्रश्रिताइदमब्रुवन् नमोवोविप्रपत्नीभ्योनिबोधतवचांसिनः इतोविदूरेचरता
कृष्णेनेहोषितावयं १७ गाश्चारयन्सगोपालैःसरामोदूरमागतः बुभुक्षितस्यतस्यान्नंसानुगस्यप्र
दीयतां १८ श्रुत्वाच्युतमुपायातंनित्यंतद्दर्शनोत्सुकाः तत्कथाक्षिप्तमनसोबभूवुर्जातसंभ्रमाः १९

धियात्मन्येवोषिताःयतोमयिस्निग्धाःप्रेमयुक्ताः अन्नंवास्निग्धंसघृतमन्नंदास्यंतीति १५ १६ उषिताःप्रेरि
ताः १७ सकृष्णागोपालैःसह १८ तत्कथाक्षिप्तमनसस्तद्दर्शनोत्सुकाः अतएवतमुपागतंश्रुत्वाजातसंभ्रमा

भागवतटी० ५१

भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौरभ्यादयो यस्मिंस्तत् भाज
श्री· नैरमत्रैर्भाण्डैर्वा पत्न्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णं अभिसस्रुः अभिजग्मुः अप्रतिबन्धे दृष्टान्तः
भा·द· समुद्रं निम्नगा नद्य इवेति २० अत्र हेतुः भगवतीति दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो या
ए·
१०३

103

चतुर्विधं बहुगुणमन्नमादाय भाजनैः अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः
२० निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः भगवत्युत्तमश्लोके दीर्घश्रुतधृता
शयाः २१ यमुनोपवनेऽशोकनवपल्लवमण्डिते विचरन्तं वृतं गोपैः साग्रजं ददृशुः स्त्रि
यः २२ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेशमनुव्रतांसे विन्य
स्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं २३

भिस्ताः २१ तथागताः संत्यस्ता ददृशुः २२ हिरण्यवत्परिधिः परिधानं यस्य तं पीताम्बरमित्यर्थः वन
मालया बर्हैर्धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं अनुव्रतस्य सख्युरंसे विन्यस्तो निहितो हस्तो येन तं इतरे
ण हस्तेन लीलयाब्जं धुनानं भ्रामयन्तं कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य। १०३

व

103A

वृत्तेरपिलयेनसामर्थ्यमाह प्रायइति वृष्णाः श्रुतायेप्रियतमस्यउदयाउत्कर्षाः तएवकर्णपूराकर्णाप
रयंतिकृतार्थीकुर्वंतीतितथोक्ताः कर्णाभरणैरितिवा यस्मिन्श्रीकृष्णेनिमग्नमनसः आविष्टचेतसःलोच
नरंध्रैरंतःप्रविश्यसुचिरमुपगूह्यतापंजहुः यथाअभिमतयःअहंवृत्तयः प्राज्ञंसुषुप्तिसाक्षिणंपरिरभ्यत
त्स्मिंल्लयंप्राप्य जाग्रत्स्वप्ननिमित्तंतापंजहतितद्वदित्यर्थः २४ अखिलेतरगृहस्थाः सर्वबुद्धिसाक्षीतास्तथाप्राप्तावि

प्रायःश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः अंतःप्रवेश्यसुचिरंपरिरभ्य
तापंप्राज्ञंयथाभिमतयोविजहुर्नरेंद्रः २४ तास्तथात्मकसर्वाशाःप्राप्ताआत्मदृष्टया विज्ञाया
खिलेतरगृहस्थाप्राह प्रहसिताननः २५ श्रीभगवानुः स्वागतंवोमहाभागा आस्यतांकरवामकिं य
न्नोदिदृक्षयाप्राप्ताउपपन्नमिदंहिवः नन्वहामर्थिकुर्वंतिकुशलाःस्वार्थदर्शिनः अहैतुक्यव्यवहि

तांयापितथ्येसेतद्विवृणोति त्यक्ताःसर्वाआशायाभिस्ताःकेवलमात्मनःस्वस्यैवदिदृक्षयेति २५ हेमहाभा
गाःवःस्वागतंशुभमागमनं तदेवाह यतयस्मात्यतिवर्पतिरस्कारेणास्माकंदिदृक्षयाप्राप्ताइति इदंवउपप
न्नंसमस्यग्युक्तमितिवा २६ युक्तत्वमाह नन्विति आत्मप्रिये आत्माचप्रियश्च तस्मिन्मयिकुशलाविवेकिनो
तएवस्वस्यात्मनोर्थंपश्यंतियेते यथावद्भक्तिंकुर्वंति यथात्वमेवाह अद्धासाक्षात् अत्रहेतुः अहैतक्यव्यव

आत्मनः सर्वतः प्रेष्ठत्वमुपपादयति अत इति स्वाज्ञातयः आत्मा देहः एते सर्वे यत्संपर्कात् यस्याध्यासेन
उपकरणत्वेन वा २८ तत्तस्मात्कृतार्था यूयं यात देवयजनं यज्ञवाटं गच्छत ननु कृतार्थाः किमि
ति यास्याम इति चेत्तत्राह पतय इति पारयिष्यंति समापयिष्यंति पत्नीनामनुग्रहायेत्यर्थः २९

प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः यत्संपर्कात्प्रिया आसंस्ततः कोन्वपरः प्रियः
२८ तद्यात देवयजनं पतयो वो द्विजातयः स्वसत्रं पारयिष्यंति युष्माभिर्गृहमेधिनः २९
पत्न्य ऊचुः मैवं वचोर्हति भवान्नादितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं प्राप्ता
वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ३०

नृशंसं परुषं निगमं प्रतिज्ञां न मे भक्तः प्रणश्यतीति वेदं वा निगमं प्रति सत्यं तव पादमूलं वा न
त्स पुनरावर्तते इति पदावसृष्टं अवज्ञयापि दत्तं बहुमानेन केशैर्निवोढुं दासीभवितुं तस्माच्छ्रीचर
णसेवां विधास्याम इति शेषः ३०

104A

यदुक्तं भगवता युष्माभिः पतयः स्वसत्रं पारयिष्यंतीति तत्राऽऽह गृह्णंतीति किंच नगृह्णंतिनोस्मान् हे
अरिंदम कामलोभप्राणादिदमन भवतः पदाग्रयोर्निपतितदेहानां अन्यास्वर्गादिगतिर्यथिन भवेत् माश्रुत
तत्तस्मात्तदास्यमेव विधेहीति २१ मयाऽउपेताः नुत्ताताः प्रसत्तं देवान् प्रदर्शयीह देवाअपीति २२ तथापिता

गृह्णंतिनोनपतयः पितरौसुतावा नभ्रातृवंधुसुहृदः कुतएवचान्ये तस्माद्भवत्पदयोः पतिता
त्मनांनोनान्याभवेद्गतिररिंदमतद्विधेहि २१ श्रीभगवानुः पतयोनाभ्यसूयेरन्पितृभ्रातृसुतादयः
यः लोकाश्चयेमयोपेतादेवाअप्यनुमन्यते २२ नप्रीतयेनुरागाय ह्यंगसंगोनृणामिह तन्मनोम
यिंयुंजानाअविरान्मामवाप्स्यथ २३ स्मरणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्तनात् नतथासन्निक
र्षेणप्रतियाततोगृहान् श्रीशुकउः इत्युक्ताद्विजपत्न्यस्तायज्ञवाटंपुनर्गताः तेचानसूयवः स्वाभिः
स्त्रीभिस्सत्रमपारयन् २५ तत्रैकाविधृताभर्त्राभगवंतंयथाश्रुतं हृदोपगृह्यविजहौदेहंकर्मानुवंधु

सक्तेनशक्नुमइतिचेत्तत्राह नेति प्रीतयेसुखायअनुरागायस्नेहवृद्धये अंगसंगः अंगाभ्यांसंगः शरीरसं
पर्कः तस्माद्गृहेस्थिताः पतिरूपेणमामेवसेवध्वमितिभावः २३ २४ अनसूयवः अदोषदृष्टयः सत्रंयज्ञं अ
पारयन् समर्थ्यं चक्रुः २५ भर्त्रातत्रविधृतावारितातत्रैकाद्विजपत्नीतदीयंदेहंतत्रैवविहायचैतत्र भगवंतंप्रा

श्री· भा·द· टी· १·५
105

३७ अनुशीलयन्ननुकुर्वन् गोगोपगोपीनामितिकर्मणिषष्ठी गोगोपगोपीरित्यर्थः रूपवाक्कृतैःरूपे
णवाचाकृतैश्चारमयन् तानरमयितरेमइत्यर्थः ३८ अनुस्मृतिप्रकारमाह नृविडंवयोर्नरानुकरण
वतोर्विश्वेश्वरयोर्याञ्चायत् अहन्नहतवंतः तत्कृतागसोवयमित्यनुस्मृत्येति ३९ तदास्वभार्याणउह्

भगवानपिगोविंदस्तैनैवान्नेनगोपकान् चतुर्विधेनाशयित्वास्वयंचबुभुजेप्रभुः ३७ एवंलीला
नरवपुर्नृलोकमनुशीलयन् रेमेगोगोपगोपीनांरमयन्रूपवाक्कृतैः ३८ अथानुस्मृत्यवि
प्रास्तेअन्वतप्यन्कृतागसः यद्विश्वेश्वरयोर्याञ्चामहन्मर्त्यविडंवयोः ३९ दृष्ट्वास्त्रीणांभगवति
कृष्णभक्तिमलौकिकीं आत्मानंचतयाहीनमनुतप्ताव्यगर्हयन् ४० विप्राऊः धिग्जन्मनस्त्रि
वृतंधिग्व्रतंधिग्वहुज्ञतां धिक्कुलंधिक्क्रियादाक्ष्यंविमुखायेत्वधोक्षजे ४१ नूनंभगवतोमा
यायोगिनामपिमोहिनी यद्वयंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ४२

निवमानयंतोभगवद्भक्तिरहितमात्मानंव्यनिन्दन्नित्याह अलौकिकींलोकातीतां ४० त्रिवृतंशौक्रं
सावित्रंदैक्ष्यमिति त्रिगुणितंजन्मव्रतंब्रह्मचर्यं क्रियाःकर्माणिदाक्ष्यंच क्रियादाक्ष्यमित्येकवापदं
धिगित्यपितेपि येवयमधोक्षजेविमुखास्तेषांनोजन्मादि नत्सर्वंधिगपिगितिव्यगर्हयन्नित्यर्थः ४१

स्वार्थेहरिभक्तौ ४२ १·५

105A योविद्यत्प्रच्छिन्नततेडरंतंभावंभक्तिंप्रपन्नेति ४२ द्विजातिसंस्काराउपनयनं क्रियाःसंध्योपासनादयः
आत्ममीमांसाआत्मविचारः ४४ ४५ अहोकष्टंभगवताकारुण्यपसागरेणप्रबोधितापिवयंनबुद्धमेता

अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ डरंतभावंयोविध्यन्मृत्युपाशान्गृहाभिधान् ४३ नासां
द्विजातिसंस्कारोननिवासोगुरावपि नतपोनात्ममीमांसानशौचंनक्रियाःशुभाः अथापिह्युत्तमश्लो
केकृष्णेयोगेश्वरेश्वरे भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि ४४ नूनंस्वार्थविमूढानांप्रमत्ता
नांगृहेहया अहोनःस्मारयामासगोपवाक्यैःसतांगतिः ४६ अन्यथापूर्णकामस्यकैवल्याद्याशिषां
पतेः ईशितव्यैःकिमस्माभिरीशस्यैतद्विडंबनं ४७ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयासकृत्
स्वात्मदोषापवर्गेणतद्याञ्चाजनमोहिनी ४८ देशःकालःपृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायज
मानश्चक्रतुर्धर्मश्चयन्मयः ४९ सएषभगवान्साक्षाद्धिस्वयोगेश्वरेश्वरः जातोयदुष्वित्याशृण्मह्यपि विष्णुर्
विमूढानविद्महे ५० अहोवयंधन्यतमायेषांनस्तादृशीःस्त्रियः भक्त्यायासांमतिर्जाताअस्माकंनिश्च

नूनमिति रूढः ४६ ननुसकृत्स्मोत्तनार्थीगोपान्प्रस्थापयामासनयुष्मान्स्मारयितुमितिचेत्तत्राहः अन्यथेति ४७ स्वात्म
दोषापवर्गेणचांचल्यगर्वादित्यागेन ४८ ४९ इत्याश्रृण्वानाः एवंसर्वंश्रुतवंतोपितथापीति ५० ५१

श्री॰
भा॰द॰
पू॰
१०६
106

५४ नचाचलन् तयोर्दर्शनाय नजग्मुः ब्राह्मणाः कंसाज्ञीताः स्वाश्रमस्थ एव भगवंतमभजन्निस्यर्थः ५४
इति भावार्थदीपिकायां त्रयोविंशः २३ चतुर्विंशे महेंद्रस्य मखं विद्याव्य हेतुभिः कृष्णः प्रवर्त्तयामास गोवर्धनम
खोत्सवं भूसुराणां क्रियागर्वं निरस्य स्वःसुरेषु च मद्यवन्मदभंगाय तन्मखं समवारयत् ब्राह्मणाः

नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ५२ स वै
न आद्यः पुरुषः स्वमायामोहितात्मनां अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमं ५३ इति स्वाग
मनुस्मृत्य कृष्णे ते कृतहेलनाः दिदृक्षवो व्यच्युतयोः कंसाद्भीता न चाचलन् ५४ इति श्रीभा
गवते दशमस्कंधे त्रयोविंशोध्यायः २३ श्रीशुक उ॰ भगवानपि तत्रैव बलदेवेन संयुतः अपश्य
पा॰ न्निवसन्गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोपि भगवान्सर्वात्मा सर्वदर्शनः प्रश्रयावनतो
पृच्छद्वृद्धान्नंदपुरोगमान् २ श्रीभगवानुवाच कथ्यतां मे पितः कोयं संभ्रमो व उपागतः
किंफलं कस्य वोद्देशः केन वा साध्यते मखः ३
कंसाद्भीताः स्वाश्रमस्था एव भगवंतमभजन् भग
वानपि तत्रैव निवसन् इंद्रयागकृतोद्यमान् गोपानपश्यदिति संबंधः १।२ कोयं संभ्रमो यं न भवति म
खोयमिति एवं चेत्किमत्र फलं का देवता केनाधिकारिणा केन वा साधनेन साध्यते ३ १०६

106A

एतद्बुद्धिमहान्कामोममश्रवणेवर्तते यदा तवमहान्कामोऽद्यएतदिति तूष्णींस्थितंप्रत्याह नेति सर्वात्म
नांसर्वज्ञात्मदृष्टीनांकृतंसंगोपनीयंनभवतीतिभावः ४ अतएवनविद्यतेस्वःपरइतिदृष्टिर्येषांतथास्वःपर
इतिदृष्ट्यभावादेव तेऽद्रदामित्राद्योपियेषांनसंतीत्याह अमित्रइति नमित्रं उदास्तउदासीनोविद्विट् ये
षांतेषांकृतं सर्वंकर्मनगोपनीयंकिंचिदस्तीत्यर्थः स्वस्यपिभेददर्शने उदासीनःशत्रुवत्तवर्ज्यः आत्मतु।

एतद्बुद्धिमहान्कामोमहत्संश्रुश्रूषवेपितः नद्विगोप्यंद्धिसाध्यनोकृतंसर्वात्मनामिह ४
यतोःस्वपरदृष्टीनाममित्रोदास्तविद्विषा उदासीनोरिवद्वर्ज्यआत्मवत्सुहृदुच्यते ५
ज्ञात्वाज्ञात्वाचकर्माणिजनोयमनुतिष्टति विदुषःकर्मसिद्धिःस्यात्तथानाविदुषोभवेत्
ततस्तावत्क्रियायोगोभवतोकिंविचारितः अथवालोकिकस्तन्मेएच्छतःसाधुभव्यतो ६

त्यत्वात् सुहृत्त्वंत्वेवुनवर्जनीयइत्याह उदासीनइति ५ किंच सुहृद्भिः सहविचार्यज्ञात्वैवकर्मकर्तव्यं
नतुगतानुगतिकमात्रेणेत्याह ज्ञात्वेति अज्ञात्वाच तत्रविदुषोयथावत्कर्मफलंस्यात् तथा।
नाविदुषः ६ भवतामयंक्रियायोगःशास्त्रतःकिंविचारितःप्रवृत्तः लौकिकव्या
चारप्राप्तोवेति साधुसोपपत्तिकं भव्यतो कथ्यतामिति ६

आचारप्राप्तमेवेति सन्देहत्वकमाह पर्जन्य इति आत्ममूर्तयः प्रियामूर्तयः ८ ततः किमत आह तमिंद्रा
वार्मुचां मेघानां तद्रेतसा तद्वृष्टिपयसा ९ उपजीवंति जीविकां कल्पयंति त्रिवर्गफलहेतवे धर्मार्थका
मसिद्धये ननु कृष्यादिभिर्जीवितां किमिंद्रेणात आह पुंसामिति फलभावनः फलसाधकः पर्जन्य

नंद उवाच पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः ते भिवर्षंति भूतानां प्राणनं जीवनं पयः ८
तं तात वयमन्ये च वार्मुचां पतिमीश्वरं द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ९ तच्छेषेणोपजी
वंति त्रिवर्गफलहेतवे पुंसां पुरुषकाराणां पर्जन्यः फलभावनः १० य एनं विसृजेद्धर्मं पारम्पर्या
गतं नरः कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनं ११ श्रीशुक उ॰ वचो निशम्य नंदस्य तथान्येषां व्र
जौकसां इंद्राय मन्युं जनयन्पितरं प्राह केशवः १२ श्रीभगवानु॰ कर्मणा जायते जंतुः कर्मणै
व हि लीयते सुखं भयं क्षेमं कर्मणैवाभिपद्यते १३ उ॰ खं

विनाकृष्यादिवैफल्यादित्यर्थः १० ।। इंद्राय म
न्युं जनयन्निति कोपजननद्वारा गर्वपर्वतात्तादिंद्रमवतारयितुं देवतानिराकरणं न त्वयमेवाभिप्राय इत्यर्थः
१२ प्रथमं तावत्कर्मवादेन देवान्निराकरोति कर्मणेति ननु जडात्कर्मणः केवलात्कथं फलसिद्धिः स्यादिति १०७
चेत् अहो अपीलितमीमांसानां स्वमतिविलसिता श्रद्धा कर्मणां फलकारणत्वे वचनं ततो वगते किं ततो नु

107A

केचित्तुनरपिसादृ सभीताः कर्मपरतंत्रमीश्वरंमन्यंतेतन्मतमनूद्यनिराकरोति अस्तिचेदिति स्वयंक
र्मभिरलिप्तः अन्येषांजीवानांकर्मणां फलहृपीफलदाताकर्तारंभजतेतत्कर्मफलदानेन १४ अतः
कर्मणएवफलसिद्धेः तत्पारतंत्र्येव अजागलस्तनतुल्यत्वान्नदेवतयाकृत्यमित्याह किमिंद्रेणेति न

अस्तिचेदीश्वरःकश्चित्फलरूप्यन्यकर्मणां कर्तारंभजतेसोपिनह्यकर्तुःप्रभुर्हि
सः १४ किमिंद्रेणेहभूतानांस्वस्वकर्मानुवर्तिनां अनीशेनान्यथाकर्तुंस्वभावविहि
तंनृणां १५ स्वभावतंत्रोहिजनःस्वभावमनुवर्तते स्वभावस्थमिदंसर्वंसदेवासुरमा
नुषं १६ देहानुच्चावचांजंतुःप्राप्योत्सृजतिकर्मणा शत्रुर्मित्रमुदासीनःकर्मैवगुरुरी
श्वरः १७

तुकर्मणोपिप्रवृत्तिरंतर्यामिरूपेतत्रैवकथंसर्वथादेवतायाअनुपयोगइत्याशंक्याह स्वभावविहित
मिति स्वभावेनप्राक्तनसंस्कारेणविहितंयत्कर्मतदन्यथाकर्तुमनीशेन १५ एतद्विवृणोति स्वभाव
तंत्रइतिप्रवृत्तेःसंस्काराधीनत्वात्किमंतर्यामिरूपेणत्यर्थः १६ तस्मात्स्वभावतोनिष्पन्नस्यकर्मणएव
कारणत्वात्कर्मैवपूज्यमित्याह देहानितिसार्धेन १७

श्री·
भा·द·
पू·
१०८
108

संपूजयेत्संमानयेत् ननुदेवतोद्देशेनद्रव्यत्यागात्मकत्वात्कर्मणः कथंदेवतांविनासिद्धिरित्याशं
क्य कर्मांगमात्रंदेवतेतिपक्षमुपसंहरन्निवहेतुवादमाश्रित्यान्योन्यमेवशीलगवादिरूपंदेवतासमर्थ
यते अंजसेति १८ हेतुबलेनैवविपक्षेदोषमाह आजीव्येतिउपजीवतिसेवते १९ स्ववृत्तिंवक्तुंदृष्टांतत्वे

तस्मात्संपूजयेत्कर्मस्वभावस्थःस्वकर्मकृत् अंजसायेनवर्त्तेततदेवास्यहिदैवतं १८
आजीव्यैकतरंभावंयस्त्वन्यमुपजीवति नतस्माद्विंदतेक्षेमंजारान्नार्यसतीयथा १९
वर्त्तेतब्रह्मणाविप्रोराजन्योरक्षयाभुवः वैश्यस्तुवार्त्तयाजीवेच्छूद्रस्तुद्विजसेवया
कृषिवाणिज्यगोरक्षाकुसीदंतुर्यमुच्यते वार्त्ताचतुर्विधातत्रवयंगोवृत्तयोनिशं २१
सत्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २२

नवर्णानांवृत्तिभेदमाह वर्त्तेतेतिब्रह्मणावेदाध्यापनादिना २० वैश्यवृत्तेश्चातुर्विध्यमाह कृषीति कृषि
वाणिज्यसहितागोरक्षा एवंत्रयंकुसीदंवृद्धिजीवनं तुर्यंचतुर्थं २१ ननुगवामपिवृष्टिर्महेंद्राधीनैवेत्या १०८
शंक्यगिरीश्वरसाध्यमनाश्रयेणनिराकरोति सत्वमितिश्लोकद्वयेन अन्योन्यंस्त्रीपुरुषयोगेन २२

108A

सर्वंतत्रइतिसमुद्रशिलोच्चयादिष्वपिदृष्टदर्शनात्प्रेतावत्सर्वेकत्वंदृष्टेरितिभावः तैरेवमेवैरेवसिध्यंति॥
जीवंति २२ तथापियोगतेमार्थदेवतापेतेतिचेदतआह ननःपुरइति पुरःपत्तनानि जनपदादेशाः
नोस्माकंयोगतेमहेतवोवनशैलादयएवेतिभावः २४ ब्राह्मणानपिमन्हूत्तान्निरामयति तस्मादिति

रजसाचोदितामेघावर्षंत्यंबुनिसर्वतः प्रजास्तैरेवसिध्यंतिमहेंद्रः किंकरिष्यति २३ ननःपुरो
जनपदाग्रामानगृहावयं वनौकसस्तातनित्यंवनशैलनिवासिनः तस्माद्गवांब्राह्मणानामद्रेश्चा
रभ्यतांमखः यइंद्रयागसंभारास्तैरयंसाध्यतांमखः २५ पच्यंतांविविधाःपाकाःसूपांताःपायसा
दयः संयावापूपशष्कुल्यःसर्वदोहश्चगृह्यतां २६ हूयंतामग्नयःसम्यग्ब्राह्मणैर्ब्रह्मवादिभिः
अन्नंबहुविधंतेभ्योदेयंवोधेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचंडालपतितेभ्योयथार्हतः यव
\\ संचगवांदत्वागिरयेदीयतांबलिः २८

स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह यइंद्रया
गमुखसंभाराइतिसार्धैःपंचभिः संभारास्तापनानि २५ सूपंमोजंपायसंकेवलेपयसिपक्वंसंयावाद
योगोधूमादिविक्रियाः क्रमश्चात्रसूपपायसयोश्चकृत्वादोहस्यार्थतोन्येषांपाठततः २६ यागशोभार्थंश्र
द्धोत्पादनार्थंचाह हूयंतामितिधेनुदक्षिणाःधेनुसहितादक्षिणाः तापश्चवादक्षिणाःवःयुष्माभिः २७

४८

श्री॰ भा॰ द॰ सु॰ १९ 109

सर्वान्शिरःकम्पनेनानुमोदयन्नाह गोब्राह्मणाद्रीणामितिमख्यं समच ३॰ ३१ तद्द्रव्येणातेनमहेंद्रम
खद्रव्येण गिरिद्विजान्वतियथायथं ३२ वलीनुपहृत्यदत्वा आदृताःसादराः ३५ अनुडुद्युक्तानिउन्न

सलंकृताभुक्तवंतःस्वनुलिप्ताःसुवाससः प्रदक्षिणंचकुरुतगोविप्रानलपर्वतान् २९ एतन्मम
मतंतातक्रियतांयदिरोचते अयंगोब्राह्मणाद्रीणांमह्यंचदयितोमखः ३० श्रीशुकउ॰ कालात्मना
भगवताशक्रदर्पजिघांसता प्रोक्तंनिशम्यनंदाद्याःसाध्वगृह्णंतनद्वचः ३१ तथाचव्यदधुःसर्वं
यथाहमधुसूदनः वाचयित्वास्वस्त्ययनंतद्द्रव्येणगिरिद्विजान् ३२ उपहृत्यवलीन्सर्वानादृताय
र वसंगवां गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणं ३३ अनांसिनडुद्युक्तानितेचारुह्यस्वलंकृताः
गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्विजाशिषः ३४ कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः शै
लोस्मीतिब्रुवन्भूरिवलिमादद्बृहद्वपुः ३५ तस्मैनमोव्रजजनैःसहचक्रेत्मनात्मने अहोपश्यतशै
लोसौरूपिनोनुग्रहंव्यधात् ३६

मानडुद्भिर्युक्तानि सद्विजाशिषःद्विजाशीर्भिःसहिताः ३४ गोप
विश्रंभणंगोपानांविश्वासजनकंरूपंगतःप्राप्तःसन्वलिमुपहारंआदत् अभक्षयत् ३५ तस्मैआत्मनेआत्मना

१०९

109A

अहो इति सार्धं श्लोकं पठन् कामरूपी सर्वादिरूपः अस्मै अद्य ये शर्मणे ते नमाय ३७ कर्मैवालं प्राकृतभावो
गुणो वा कर्मणि गवानहं शोवा महेशः वार्ताकत्रीदेवतेतीयमुक्ता देवतो भेषणमतीनन्वभीष्टा ३८ इतिश्री
भावार्थे चतुर्विंशः २४ पंचविंशे रुषा शक्रो व्रजनाशाय वर्षति उहृत्यगिरिमासारादरक्षज्ञाज्ञलप्रभुः

एषोऽवजानतो मर्त्यान्कामरूपी वनौकसः हन्ति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवां ३७ इत्यद्रि
गोद्विजमखं वासुदेवप्रचोदिताः यथा विधाय ते गोपाः सहकृष्णा व्रजं गताः ३८ इतिश्रीभाग
वते दशमे चतुर्विंशः २४ श्रीशुक उ० इन्द्रस्तदात्मनः पूजां विज्ञाय विहतां नृप गोपेभ्यः कृष्णनाथे
भ्यो नन्दादिभ्यश्चुकोप सः १ गणं सांवर्तकं नाम मेघानां चान्तकारिणं इन्द्रः प्राचोदयत्क्रुद्धो वा
क्यं चाहेशमानिस्तुत २ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां कृष्णं मर्त्यमुपाश्रित्य
ये चक्रुर्देवहेलनं ३

कृष्णो नाथो येषां तेभ्यः १ क्रुद्धस्सन्निन्द्रः सांवर्तकं नाम संवर्तः प्रल
यः तत्कर्तारं मेघानां प्रसिद्धं गणं प्राचोदयत् प्रेषयामास ननु कथं कृष्णनाथानां नाशे प्रवृत्त इत्याश
ङ्क्यात्मसंभावनया निरस्तविवेकत्वादित्याशयेनाह वाक्यं चाहेत्यादि पंचभिः ईशमानी अहमेवेश्वर इ
तिगर्ववान् २ देवहेलनं देवस्य ममावज्ञां ३

श्री. भा. द. ए. ११.

110

अदृढैः असमर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अतएवनाममनौनिभैः नाममात्रेणयानावस्तिष्ठवक्रियंतेतेनतस्

दृशैः आन्वीक्षिकीमात्मानात्मस्मृतिरूपां ४ वालिशंशिशुं अज्ञंमूर्खंपंडितमानं अतएवस्तब्धमविनीतमिति

निंदायोजितापीद्स्यभारती श्रीकृष्णस्तोत्रं तितथाहि वाचालं शास्त्रयोनिं वालिशं एवमपिशिशुवन्निरभिमानि

नंस्तब्धंअनम्रस्वंयस्याभावादनमं अज्ञं नास्तिज्ञोयस्मात् तंसर्वज्ञमित्यर्थः पंडितमानिनंब्रह्मविदांबहुमा

यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ४ वाचालंबा

लिशंस्तब्धमज्ञंपंडितमानिनं कृष्णंमर्त्यमुपाश्रित्यगोपामेचक्रुरप्रियं ५ एषांश्रियावलिप्तानांकृष्णे

नं नाध्मापितात्मनां धुनुतश्रीमदस्तंभंपशून्नयतसंक्षयं ६ अहंचैरावतंनागमारुह्यानुव्रजेव्रजं मरुद्ग

णैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ श्रीशुक उवाच इत्थंमघवताज्ञप्तामेघानिर्मुक्तबंधनाः नंदगोकु

लमासारैः पीडयामासुरोजसा ८

ननीयं कृष्णंसदानंदरूपंपरंब्रह्म मर्त्यंतथापिभक्तवात्सल्येनमनु

ष्यतयाप्रतीयमानमिति ५ अवलिप्तानांमत्तानामाध्मापितात्मनांबृंहितदेहानां धुनुतअपनतश्रीमदेनय

स्तंभोगर्वस्तं ६ विस्मितस्तान्प्रत्याह अहंचेति अनुव्रजेअनंतरमेवागमिष्यामिमरुद्गणैर्देवगणैः सह ७

मघवताज्ञप्ताःनिर्मुक्तंबंधनंयेषांतेप्रलयाभिप्रायेणबद्धाआसन् तदानिर्मुक्तबंधनाः संतः आसारैर्धारासंपातै

११०

110A

स्तनयित्नुभिरस्वानिभिः नंदंतः गर्जतः मरुद्गणैरावहप्रवहादिवायुसमूहैर्नुन्नाः प्रेरिताः जलशर्क
राः जलोपलान् ९ स्थूणावत्स्थूला अभ्रेषु मुंचत्सु सत्सु नतोन्नतं नतं निम्नं निम्नोन्नतं उच्चविपरीतं य
था भवति तथा भून्नादृश्यत १० जातवेपना जातकंपाः ११ तत्र पश्चनां यानं विशिनष्टि १२ गोगोपगो

विद्योतमाना विद्युद्भिर्नदंतः स्तनयित्नुभिः तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ९ स्थूणा
स्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं १० अत्यासा
रातिवातेन पशवो जातवेपनाः गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ११ शिरः सुतांश्च कायेन
प्रच्छाद्यासारपीडिताः वेपमाना भगवतः पादमूलमुपाययुः १२ कृष्ण कृष्ण महाभाग त्वन्नाथं गो
कुलं प्रभो त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल शिलावर्षनिपातेन हन्यमानमचेतनं निरी
क्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः १४ अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं स्वयागे निहतेऽस्मा

पीनां प्रार्थनामाह कृष्णेति त्वमेव नाथो यस्य तत् गोकुलं गवां कुलं वंशं नः \\ भिरिंद्रो नाशाय वर्षति १५
अस्माकं देवादिंद्रात् त्रातुं रक्षितुमर्हसि १३ विज्ञापनात्स्वमेव कुपितेनेंद्रेण कृतं तद्वर्षं मेने कथं मेनेत
दाह १४ अपर्त्विति अपगतमृतुर्यस्मात्तद्वर्षं प्रतिशायितो वातो यस्मिंस्तत् अतिवातं शिलामयं शिला

श्री०
भा०द०
टी०
१११

तत्रप्रतिज्ञापूर्वकंगोवर्धनोद्धरणमाह तत्रेति प्रतिविधिंप्रतीकारंग्रात्मयोगेनस्वसामर्थ्येन साधयिष्यामि तेनचमोघ्यात लोकेशमानिनांश्रीमदलक्तणंतमोहरिष्यामि वहुवचनेनेवरुणादीनभिप्रेति १९ ननुदेवाः सात्विकाःत्वद्भक्ताश्चअतस्तेषांनमस्तत्राह नहीतिसद्भावःसत्वंमद्भक्तिर्वातद्युक्तानांसुराणामीशावयमिति।

तत्रप्रतिविधिंसम्यगात्मयोगेनसाधये लोकेशमानिनांमौढ्याद्धरिष्येश्रीमदंतमः १९ न हिसद्भावयुक्तानांसुराणामीशविस्मयः मत्तोसतांमानभंगःप्रशमायोपकल्पते २० तस्मा न्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहम् गोपायेस्वात्मयोगेनसोयंमेव्रतआहितः २१ इत्यु क्त्वैकेनहस्तेनकृत्वागोवर्धनाचलम् दधारलीलयाकृष्णश्छत्राकमिवबालकः २२ अथा हभगवान्गोपान्हेंबतातव्रजौकसः यथोपजोषंविशतगिरिगर्तंसगोधनाः २३ नत्रासऽ इहवःकार्योमद्धस्ताद्रिनिपातने वातवर्षभयेनालंतत्त्राणंविहितंहिवः २४

विस्मयोगर्वोहियस्मान्नघटते अतोसंतस्तेकिंचतेषांमानभंगोनुग्रहएवेत्याह मत्तइति २० गोपायेरक्षिष्यामि किंच सोयंमेमयाव्रतोनियमःसंकल्पोवाआहितोधृतइत्यर्थः २१ कृत्वाउत्कृत्यउद्धृत्य छत्राकं शिलींध्रंयथा २२ यथोपजोषंयथासुखम् २३ २४ १११

सधनाः सगोधनाः सव्रजाः शाकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः यथावकाशम
111A वकाशमनतिक्रम्य तस्मिन्नेव स्थिताः २२ पदात्स्थानात्सप्तदिनानि यावत् २३ २४ व्युदप्रायाविगतोदकप्रायाः स्वल्पजलाश्च

तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः यथावकाशं सधनाः सव्रजास्सोपजीविनः २२ क्षुत्
तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत्पदात् २३ कृष्ण
योगानुभावं तं निशम्येन्द्रोऽतिविस्मितः निःस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्सन्न्यवारयत् २४ खंव्यभ्र
मुदितादित्यं वातवर्षं च दारुणं निशम्योपरतं गोपान्गोवर्धनधरोऽब्रवीत् २५ निर्यात त्यजत त्रासं
गोपाः सस्त्रीधनार्भकाः उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः २६ ततस्ते निर्ययुर्गोपाः स्वं स्वमा
दाय गोधनं शाकटोढोपकरणं स्त्रीबालस्थविराः शनैः २७ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्र
भुः पश्यतां सर्वभूतानां स्थापयामास लीलया २८ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः
परिरंभणादिभिः गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः २९

र्घाः २६ शाकटोढोपकरणं शाकटैरूढमुपकरणं भांडादिकं यथा भवति तथा गोधनमादाय शनैर्निर्ययुः
२७ २८ निभृताः पूर्णाः यथा यथोचितपरिरंभणादिभिः समीयुरुपजग्मुः सदाशिषः श्रेष्ठाना आशीर्वादान् २९

श्री· ३१ ३२ ततोगोवर्धनस्थानात् अस्यश्रीकृष्णस्यतथाविधानिगोवर्धनोद्धरणादिरूपाणिकृतानिकर्माणिगायंत्य
भा· द· ईयुर्ययुः कथंभूताः प्रेम्णाहृदिस्पृशंतीतिहृदिस्पृशःताः यद्वा कथंभूतस्यप्रेष्ठत्वेनतासांहृदिस्पृतीतिहृदिस्पृ
इ· शस्तस्य ३३ इतिश्रीभावार्थेपंचविंशः २५ षड्विंशेविस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः नन्दोगर्गोक्तिमाश्रा
११२ यशोदारोहिणीनंदोरामश्चबलिनांवरः कृष्णमालिंग्ययुयुजुराशिषःस्नेहकातराः ३० दिविदेवग
112 णाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणिपार्थिव ३१ शंखदुंदुभयोनेदुर्दिवि
देवप्रणोदिताः जगुर्गंधर्वपतयस्तुंबुरुप्रमुखानृप ३२ ततोनुरक्तैः पशुपैः परिश्रितोराजन्स्व
गोष्ठंसबलोव्रजद्धरिः तथाविधान्यस्यकृतानिगोपिकागायंत्यईयुर्मुदिताहृदिस्पृशः ३३ इ
तिश्रीभागवतेदशमेगोवर्द्धरणोनामपंचविंशोध्यायः २५ श्रीशुकउवाच एवंविधानिकर्माणि
गोपाः कृष्णस्यवीक्ष्यते अतद्वीर्यविदः प्रोचुः समभ्येत्यसुविस्मिताः १ गोपाऊचुः बालस्ययदेतानि
कर्माण्यत्यद्भुतानिवै कथमर्हत्यसौजन्मग्राम्येष्वात्मजुगुप्सितं २ क

व्यतदैश्वर्यमवर्णयत् १ समभ्येत्यनंदमभिगम्यप्रोचुस्तदाह बालकस्येति यद्यस्माद्बालकस्यकृष्ण
स्यात्यद्भुतानिकर्माणि तस्माद्ग्राम्येषुगोपालेषुकथंजन्मार्हतिग्राम्यात्मजुगुप्सितमात्मानर्हम् २ ११२

112A अस्यद्भुतानिकर्माण्याहुः द्वादशभिः यस्सप्तहायनइत्यादिभिः सप्तहायनः सप्तवार्षिकः कथंविभ्रत्स्थि
तः पुष्करंपद्मंगजराट्महागजइव ३ महौजसोमहाबलायाः पूतनायाः तनोर्वय आयुर्यौवनंवाकालेन
यथापीयतेतद्वत् कथमित्यनुवर्त्तते ४ अनसोधः शयानस्यमासस्यमासास्त्रयः परिच्छेदकायस्यउदक्

यः सप्तहायनोबालः करेणैकेनलीलया कथंविभ्रद्गिरिवरंपुष्करंगजराडिव ३ तोकेनामीलि
ताक्षेणपूतनायामहौजसः पीतः स्तनः सहप्राणैः कालेनेववयस्तनोः हिन्वतोधः शयानस्यमा
सस्यचरणावुदक् अनोपतद्विपर्यस्तंरुदतः प्रपदाहतं ५ एकहायनआसीनोह्रियमाणोविहा
यसा दैत्येनयस्तृणावर्त्तमहन्कंठग्रहातुरं क्वचिद्धैयंगवस्तैन्येमात्राबद्धउदूखले गच्छन्नर्जुनयो
र्मध्येबाहुभ्यांतावपातयत् ७ वनेसंचारयन्वत्सान्सरामोबालकैर्वृतः हन्तुकामंबकंदोर्भ्यांमुख
तोरिमपाटयत् ८

ऊर्ध्वंचरणौहिन्वतस्त्यालयतः प्रपदेनपादाग्रेणाहतंविपर्यस्तंविपरीतमः
नः कथमपतत् ५ योदैत्येनह्रियमाणः सन्तंतृणावर्त्तंदैत्यंकथमहन्नित्यर्थः ६ हैयंगवस्तैन्येनवनीत
चौर्येबाहुभ्यांगच्छन् द्विवृक्षावित्यर्थः हन्तुकामोयस्तंवकवेषमरिंबाहुभ्यांमुखतः कथमपाटयत् ८

श्री० भा० द० ए० ११३ 113

९ ॥ आशीविषतमः प्रतिक्रूरविषस्यासावहींद्रस्याशीविषतमाहींद्रं कालियं १२ औत्पत्तिकः स्वाभावि०

कः कथमितिकिंसर्वेषामात्मास्यादितिशंका १३ उत्क्रममपिप्रतिविस्मयेनाभिनयेनवदंति कसमद्वाय

वत्सेषुवत्सरूपेणप्रविशंतंजिघांसया हत्वान्यपातयत्तेनकपित्थानिचलीलया ९ हत्वारासभदै

त्यंतद्बंधूंश्चबलान्वितः चक्रेतालवनंक्षेमंपरिपक्वफलान्वितं १० प्रलंबंघातयित्वोग्रंबलेनब

लशालिना अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः आशीविषतमाहींद्रंदमित्वाविमदं ह्रदात्

प्रसह्योद्वास्ययमुनांचक्रेसौनिर्विषोदकां १२ दुस्त्यजश्चानुरागोस्मिन्सर्वेषांनोव्रजौकसां नंदतेत

नयेस्मासुतस्याप्यौत्पत्तिकःकथं कसमद्वायनोबालः कमहाद्रिविधारणं ततोनोजायतेशंका

व्रजनाथतवात्मजे १४ नंद उ० श्रूयतांमेवचोगोपाव्येतुशंकाचवोर्भके एनंकुमारमुद्दिश्यगा

र्गोमेयदुवाचह १५

नरति १४ प्राक्कृतमेवगर्गाचार्यवाक्यंतच्चरितपरिशीलनेननिर्हतासम्भावनस्यनंदस्यकृष्णतत्त्वाव ११३

बोधकंजातं सइदानींतेनैववाक्येनगोपानुपदिशतिश्रूयतामिति १५

113A वर्णानिवा १९ २१ तस्मात्तस्यकर्मसुविस्मयोनकार्यइतिनंदस्योक्तिः २२ इत्यद्धासाक्षात्मांप्रतिसमा

वर्णास्त्रयःकिलास्यासन्गृह्णतोनुयुगंतनूः शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १६ प्रा
गयंवसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइतिश्रीमानभिज्ञास्संप्रचक्षते १७ बहूनिसं
तिनामानिरूपाणिचसुतस्यते गुणकर्मानुरूपाणितान्यहंवेदनोजनाः १८ एषवःश्रेयआधा
स्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १९ पुरानेनव्रजपतेसाधवोद
स्युपीडिताः अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः २० यएतस्मिन्महाभागाःप्रीतिंकुर्वं
तिमानवाः नारयोभिभवन्त्येतान्विष्णुपक्षानिवासुराः २१ तस्मान्नंदात्मजोयंतेनारायणसमो
गुणैः श्रियाकीर्त्यानुभावेनतत्कर्मसुनविस्मयः २२ इत्यद्धामांसमादिश्यगर्गेचस्वगृहंगते
मन्येनारायणस्यांशंकृष्णमक्लिष्टकारिणं २३ इतिनंदवचःश्रुत्वागर्गगीतंव्रजौकसः दृष्टश्रु
तानुभावास्तेकृष्णस्यामिततेजसः मुदितानन्दमानर्चुःकृष्णं

दिश्यगर्गेचस्वगृहंगतेसतितदानींतथाममामानोपि इदानींकृष्णंनारायणांशंमन्ये अत्रहेतुः अक्लिष्टका

श्री॰
भा॰ द॰
सु॰
११४
115

गोवर्द्धनोद्धरणमितिसपरिकरमनुस्मरन् प्रकटितेस्वर्यस्यश्रीकृष्णस्यप्रीतिंप्रार्थयते देवइति यज्ञ
विप्लवेनयाकृद्ध तयादेवेंद्रेवर्षतिसति वज्राश्मवर्षानिलैःअशनिजलशर्करानीव्रवायुभिः सी
दत्पालपशुस्त्रिसीदंतःपालाःपशवःस्त्रियश्चयस्मिंस्तत् तथा आत्मास्वयमेवशरणंयस्यतन्नोऽष्टृह
ष्ट्वानुकम्पीकृपावान् उत्स्मयन्हसन् प्रादुर्मावियुर्वन् शैलमुत्पाद्य अवलोवालोलीलार्थमु॰

देवेवर्षतियज्ञविप्लवरुषावज्राश्मवर्षानिलैसीदत्पालपशुस्त्रियात्मशरणंदृष्ट्वाऽनु
कम्प्युत्स्मयनेउत्पाट्यैककरेणशैलमवलोलीलोच्छिलिंद्रंयथा विभ्रद्गोष्ठमपान्मखे
द्रमदभित्प्रीयान्नइंद्रोगवां २५ इतिश्रीभागवतेदशमेषड्विंशः २६

च्छिलिंद्रंयथा तथाएकेनकरेणविभ्रद्धरन् गोष्ठमपात् पालितवान्एवंमहेंद्रमदभित् गवामिंद्रश्चतत
दध्यायार्थंवस्मारयति सएवंभूतःश्रीकृष्णोनःप्रीयात्प्रीयतामिति षड्विंशेदशमेव्यक्तःषड्विंशोदश
मोहरिः वचनकंपंचविंशमांचतत्रविंशतितःपृथक् २५ इतिभावार्थेदशमेषड्विंशोध्यायः २६ सप्तविंशे
नदोलसकलसप्रभवंपरं वर्ण्यतेसुरभीन्द्राभ्यामभिषेकमहोत्सवः १ ११५

114A

गोवर्धने धृते शैल इति प्राक्तनसमयेनागमने हेतुः आसारात् रक्षिते व्रज इति सुरभेर्हर्षेणागमने हेतुः गोत्व सिद्धेर्मस्मरणात् १ तत्रैवेंद्र आगत्य किं कृतवांस्तदाह विविक्त उपसंगमे स्मादिना अथाह सुरैरभिरिशं तेन संबंधे न विविक्तप्रकाते पादयोः पस्पर्शनमस्कार कथंभूतः कृतहेलनः कृतावज्ञः २ अस्य श्रीकृष्णस्य श्रुतेश्वा सावज्ञभावस्यश्रुतानुभावः दृष्टः श्रुतानुभावो येन सः इंद्रः नष्टः त्रिलोकेशोऽहमिति मदो यस्य सः ३ तत्र

श्रीशुक उ० गोवर्धने धृते शैल आसाराद्रक्षिते व्रजे गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एव च १ विविक्त उपसंगम्य व्रीडितः कृतहेलनः पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा २ दृष्टश्रुतानुभावोस्य कृष्णस्यामिततेजसः नष्टत्रिलोकेशमद इंद्र आह कृतांजलिः ३ इंद्र उवाच विशुद्धसत्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं मायामयोयं गुणसंप्रवाहो न विद्यते ते ग्रहणानुबंधः ४

ममापराधं त्वमस्वेतिवक्तुं तव तावदपराधो नास्त्येव त्वयानुग्रह एव कृत इत्याह चतुर्भिः विशुद्धसत्वमिति धाम स्वरूपं शांतमेकरूपं अत एव तपोमयं प्रचुरज्ञानं सर्वज्ञ इत्यर्थः कुतः ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् अत एवायं अस्मदादिषु दृश्यमानः मायाकार्यरूपः गुणसंप्रवाहः गुणैः संप्रोक्षत इति तत्वात्त्तान्नो यत्र्छः संसार इत्यर्थः स ते तव न विद्यते यतः अग्रहणेनाज्ञानेनानुवध्यत इति तथा सः स

यतः ज्ञानतत्कृतदेहसंबंधौ न स्तः तदा तत्कृतानां लोभादीनां का वार्तेत्याह ऊतोन्विति हे ईश तत्कृतादेहसंबं
धकृताः तद्धेतवः पुनरन्यस्य देहस्य हेतवः लोभादयः लोभमन्युमोहादयस्तवेति ननु ज्ञानिनामपि ते दृश्यंते
अतस्त्वाह अबुद्धलिंगभावाः अज्ञानिनां गमकाः अज्ञानस्य च कार्याणीत्यर्थः यावद्रागादिमत्वं तावदज्ञानित्वमेवास्ति
इत्यर्थः लोभाद्यभावेपि सन्मानभंगो दंडार्थमित्याह तथापीति ५ ननु त्वद्दंडे मम गोपपशुत्रस्य का शक्तिः

ऊतोनु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः तथापि दंडं भगवान्बिभर्ति धर्मस्य गुप्त्यै खल
निग्रहाय ५ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः हिताय चेच्छातनुभिः समीहसे
मानं विधुन्वन् जगदीशमानिनां ६ ये मद्विधाज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेभयमाशु तन्मदं

किंच कारणं को वा दंडो मया कृत इत्यत आह पिते \\ हित्वार्यमार्गं प्रभजंत्यपस्मया ईहा खलानामपि तेनु शासनं ७
ति जगतां त्वं पिता जनकः गुरुरुपदेष्टा अधीशः नियंता इति दंडधारणे हेतुत्रयं कालत्वात्समर्थः दुर्लिंघ्यः
तस्मादुपात्तदंडो लीलावतारैः समीहसे तव समीहा लीलैव जगदीशमानिनामस्माकं मानं विधुन्वन्नित्यर्थः
६ कथमेतदित्यत आह य इति मद्विधा अज्ञाः अतएव जगदीशमानिनः काले भयकालेपि यथा अधु
नैव अतिदृष्टो त्वां मम यं भयमगणयंतं वीक्ष्य आशु तन्मदं जगदीश इति मदं हित्वा विगतगर्वाः संतः आर्यमा ११५

115A

एवंभगवत्स्वरूपमभिप्रायंचात्रवर्ण्यतेक्षमापयति सत्वमिति एवंभूताचासतीमतिर्मेपुनर्माभूदितिप्रा
र्थनोत्तरं ८ नत्रमहानयमपराधः कथंक्षंतव्य इतिचेत् अतआह तवेति स्वयंभराणांपुनस्त्वदुरुभारज
न्मनामसुरगणांवहूनांभाराणांजन्मयेभ्यस्तेषांचनृपतीनामभवायनाशाय युष्मच्चरणसेविनांतुभवाय अ

सत्वंममैश्वर्यमदप्लुतस्यकृतागसस्तेविदुषःप्रभावं क्षंतुंप्रभोऽथार्हसिमूढचेतसोमैवंपुनर्भून्म
तिरीशमेसती ८ तवावतारोयमधोक्षजेह स्वयंभराणामुरुभारजन्मनां चमूपतीनामभवायदे
वभवाययुष्मच्चरणानुवर्तिनां ९ नमस्तुभ्यंभगवतेपुरुषायमहात्मने वासुदेवायकृष्णाय
सात्वतांपतयेनमः १० स्वच्छन्दोपात्तदेहायविशुद्धज्ञानमूर्तये सर्वस्मैसर्वबीजायसर्वभूतात्म नेनमः

अतोममतत्सेवकत्वात् अस्यैतापराधिनोपिक्षंतव्यमितिभावः ९ क्षमापयन्नमस्करोति नमइति तु
भ्यंभगवतेकृष्णायनमः पुरुषायसर्वांतर्यामिने महात्मनेऽन्तःस्थत्वेप्यपरिच्छिन्नाय कुतःवासुदेवाय
सर्वनिवासायसात्वतामुपासकानांयादवानांवापतये १० तर्हिकिमहंयादवःनेत्याह स्वच्छन्दोपात्त
देहाय स्वेषांभक्तानांछंदेनेच्छयास्वीकृतदेहाय तत्रापिविशुद्धज्ञानमेवमूर्तिर्यस्यतस्मै कुतःमाय
यासर्वस्मैसर्वस्यबीजायकारणाय अतएवसर्वात्मनेनमइति ११

श्री· भा·१०· स्कं· ११६
116

कृतागसस्तस्य नेतोक्तमपराधं निवेदयति मयेदमिति आसारवायुभिर्गोष्ठनाशाय मयेदमकृत्यं विवे
ष्टितं कृतं १२ तथापि भो ईश त्वयानुगृहीतोस्मि अनुग्रहं दर्शयति ध्वस्तस्तंभ इति वृथोद्यम इति च १३
१४ इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैवाह मयेति इंद्रश्रिया देवराज्यत्वेन १५ १६ वः युष्माभि

मयेदं भगवन्गोष्ठनाशायासारवायुभिः चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना १२ त्वयेशा
नुगृहीतोस्मि ध्वस्तस्तंभो वृथोद्यमः ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः १३ श्रीशुक उ· एवं सं
कीर्तितः कृष्णो मघोना भगवानमुं मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् १४ श्रीभगवानु·
मयाते कारि मघवन्मखभंगोनुगृह्णता मदनुस्मृतये नित्यं मत्तस्येंद्रश्रिया भृशं १५ मामैश्वर्यश्री
मदांधो हि दंडपाणिं न पश्यति तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं १६ गम्यतां शक्र
भद्रं वः क्रियतां मेनुशासनं स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभ

वं वचनं वक्तृत्वाद्यभिप्रायेण न तु क्रूरं
तथा स्वर्गेपि नैवेश्वरत्वादिति चेत्तत्राह क्रियतामिति मदनुशासनेन यथापूर्वं तत्र स्थीयतामित्यर्थः युक्तैरप्र ११६

स्वसंतानैर्गोभिः सहोपामंत्र्य १८ कृष्ण कृष्णेत्यादि संबोधनैः इंद्रेणाहृता अपि भगवता सनाथा वयं कृ
ताः रक्षिताः इत्यर्थः १९ त्वं नः परमकं दैवं देवता अतो हे जगत्पते गोविप्रदेवानां ये अन्ये च साधवस्तेषां भ
वाया अभ्युदयाय यायत्वमेवेंद्रो भव २० ननु पुरंदरस्तावत् भवतीनामिंद्रोस्तीति वेद तत्राह इंद्रमिति अस्त

अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरं १८ सुरभिरुवा
च कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वसंभव भवता लोकनाथेन सनाथा वयमच्युत १९ त्व
न्नः परमकं दैवं त्वं न इंद्रो जगत्पते भवाय भव गोविप्रदेवानां चये साधवः २० इंद्रं नस्त्वाभिषेक्ष्या
मो ब्रह्मणा नोदिता वयं अवतीर्णोसि विश्वात्मन्भूमेर्भारापनुत्तये २१ श्रीशुक उ० एवं कृष्णमुपामं
त्र्य सुरभिः पयसात्मनः जलैराकाशगंगाया ऐरावतकरोद्धृतैः २२ इंद्रः सुरर्षिभिः साकं नो
दितो देवमातृभिः अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात्

पुरंदरस्येंद्रतयेत्यर्थः ननु देव इंद्रो भ
वति मनुष्योहं कथमिंद्रो भवेयमिति चेद् तत्राह अवतीर्णोसीति २१ सुरभिः आत्मनः पयसाभ्यषिंचत् इं
द्रस्त्वाकाशगंगाया जलैरभ्यषिंचत् २२ देवमातृभिरदित्यादिभिर्देवैर्मातृभिश्चेति वा गाः पश्चन् गाश्च
गं वा इंद्रे नेन विंदतीति कृत्वा गोविंद इत्यभिधानामस्कृतवानित्यर्थः २३

श्री· २४ देवनिकायेषुदेवसमूहेषुकेतवध्वजवद्दर्शनीयामुख्याइत्यर्थः गावःगांपृथिवींपयोभिर्द्रुतामार्द्रामयन्
अकुर्वन्नित्यर्थः २५ नानारसौघाःक्षीरादिवाहिन्यः अकृष्टपच्याःकर्षणंविनैवपक्वाओषधयोव्रीह्यादयः
भा·द· आसन् यद्वा अकृष्टपच्याओषधयोयेषुतेगिरयः उन्मणीन्गर्भगतान्बहिःप्रकटान् अबिभ्रन्अबिभरुः २६
टी·
११७ तत्रागतास्तुंबुरुनारदादयोगंधर्वविद्याधरसिद्धचारणाः जगुर्यशोलोकमलापहंहरेःसुरां
117 गनाःसंननृतुर्मुदान्विताः २४ तंतुष्टुवुर्देवनिकायकेतवोव्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः
लोकाःपरांनिर्वृतिमाप्नुवंस्त्रयोगावस्तदागामनयन्पयोद्रुतां २५ नानारसौघाःसरितोवृक्षा
आसन्मधुस्रवाः अकृष्टपच्यौषधयोगिरयोबिभ्रदुन्मणीन् २६ कृष्णेभिषिक्तएतानिसर्वाणि
कुरुनंदन निर्वैराण्यभवंस्तातक्रूराण्यपिनिसर्गतः २७ इतिगोगोकुलपतिंगोविंदमभिषि
च्यसः अनुज्ञातोययौशक्रोवृतोदेवादिभिर्दिवं २८ इतिदशमेसप्तविंशोध्यायः २७

२८ इतिश्रीभावार्थेसप्तविंशोध्यायः २७ अष्टाविंशेततोनंदानयनंवरुणालयात् वैकुंठदर्शनंचाथगो ११७
पानामनुवर्ण्यते १ गोवर्द्धनेसमुद्धृत्यवशीकृत्यामरेश्वरं नंदानयनतःकृष्णोवरुणंचवशेनयत् २

117A

कलामात्रायां द्वादश्यां पारणादराभिनिवेशेनासुरीं वेलामविज्ञायैव वरुणोदयात्सर्वमेव शास्त्रबलेन
निशिउदकं प्रविष्ट तदनभिज्ञो वरुणस्य भृत्यः अनयदिति नंदं गृहीत्वागतः तथा च शास्त्रं कलार्धं द्वाद
शीं दृष्ट्वा निशीथार्द्धमेव हि आमध्याह्नात्क्रियाः सर्वाः कर्तव्याः शंभुशासनात् इत्यादि वदंतिव व
रुणः अज्ञानतामामकेनेति भगवद्धर्ममज्ञानतेत्यर्थः २ स्वानां भगवद्धर्मपराणामभयदः माभैष्टेत्य

शुकउ· एकादश्यां निराहारः समभ्यर्च्य जनार्दनं स्नातुं नंदस्तु कालिंद्यां द्वादश्यां जलमाविशत् १
तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोन्तिकं अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि २ गोपालास्त
मपश्यंतः कृष्णरामेति चुक्रुशुः भगवांस्तदुपश्रुत्य पितरं वरुणाहृतं तदंतिकं गतो राजन्स्वाना
य मभयदो विभुः ३ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया महत्या पूजयित्वाह तद्दर्शनमहोत्सवः
४ वरुणउ· अद्य मे निभृतो देहो अद्यार्थोधिगतः प्रभो त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ५

भयंददत् तदंतिकं वरुणस्य समीपं ३ सपर्ययार्हणेन ४ अद्य इदानीं मे मया देहो निभृतः धृतः यद्यात्व
द्दर्शनंजातम् तदैव देहसाफल्यं प्राप्तमित्यर्थः यद्वा निभृतः पूर्णमनोरथ इत्यर्थः किंच अद्यैवार्थोधिग
तः सर्वरत्नाकरपतिनापीत्यर्थः इतः पूर्वं नैवंविधोर्थः प्राप्त इत्यर्थः किंच संसारोपि निवृत्त इत्याशयेनाह
त्वत्पादभजइति अध्वनः पारं मोक्षम् ५

श्री· भगवतेनिरतिशयैश्वर्याय ब्रह्मणोपूर्णाय परमात्मनेसर्वजीवनियंत्रे तत्रहेतुः नयत्रेतिलोकसृ-
भा·द· ष्टिविकल्पयतियामायासायत्रत्वयिनश्रूयते अविद्यमानेवतिष्ठतीत्यर्थः ६ अजानतामज्ञेनत्व
स· त्पित्राहरणंयत्कृतंतन्नदीति ७ नेदंविसृज्यसमर्पयति गोविंदेति ८ ९ अतींद्रियमदृष्टपूर्वंलोकपा
११८
118

नमस्तुभ्यंभगवतेब्रह्मणेपरमात्मने नयत्रश्रूयतेमायालोकसृष्टिविकल्पना ६ अजानतामा
मकेनमूढेनाकार्यवेदिना आनीतोयंतवपितातद्भवान्क्षंतुमर्हति ७ गोविंदनीयतामेषपिता
तातेपितृवत्सल ममाप्यनुग्रहंकृष्णकर्तुमर्हस्यशेषदृक् ८ शुकउ· एवंप्रसादितःकृष्णोभग
वानीश्वरेश्वरः आदायागात्स्वपितरंबंधूनांचावहन्मुदं ९ नंदस्त्वतींद्रियंदृष्ट्वालोकपालमहो
दयं कृष्णेचसन्नतिंतेषांज्ञातिभ्योविस्मितोब्रवीत् १० तेचौत्सुक्यधियोराजन्मत्वागोपास्त
मीश्वरं अपिनःस्वगतिंसूक्ष्मामुपाधास्यदधीश्वरः ११ इतिस्वानांसभगवान्विज्ञायाखिल राम
दृक्स्वयं संकल्पसिद्धयेतेषांकृपयैतदचिंतयत् १२

लस्यमहोदयंऐश्वर्यं १० औत्सुक्ययुक्ताधीर्येषांते अपिकिंस्वगतिंस्वस्थानं सूक्ष्मांब्रह्माख्यांच उपाधा
स्यत् उपाधास्यति नः अस्माकंप्रतिपादयिष्यतीतिसंकल्पितवंतइत्यर्थः ११ एवंभूतंस्वानांस्वेषांसं- ११८
कल्पंमनोरथं अखिलदृक्सर्वज्ञः स्वयमेवविज्ञायतेषांसंकल्पसिद्धयेकृपयाग्रतद्वक्ष्यमाणमचिंत

118A

अविद्यादेहाद्यहंबुद्धिस्ततः कामस्ततः कर्म ततउच्चावचासु देवमनुष्यतिर्यगादिषु भ्रमन् स्वीयांगतिंआत्मतत्त्वंनवेद १२
स्वंब्रह्मस्वरूपंलोकंचवैकुण्ठाख्यं तमसः प्रकृतेःपरं १४ देहादिव्यवहितानांदर्शनमशक्यमिति प्रथमंदेहादिव्यतिरिक्तंब्रह्म
स्वरूपंदर्शयामासतदाह सत्यमिति सत्यमबाध्यंज्ञानंअजडं अनंतमपरिच्छिन्नं ज्योतिःस्वप्रकाशंसनातनंशाश्वत्सिद्धं गु
णापायेगुणापायेऽक्रियमाणेज्ञानिनोयत्पश्यंति तद्रूपमेवदर्शयामास १५ एवंब्रह्मह्रदंब्रह्मैवह्रदः तत्रनिमग्नस्यविशे
षविज्ञानाभावात् तंब्रह्मह्रदं तेतुनीताःप्रापिताः तस्मिन्मग्नाश्चएवंब्रह्मह्रदंब्रह्मैवह्रदः तत्रनिमग्नस्यविशेषविज्ञाना

जनोवैलोकएतस्मिन्नविद्याकामकर्मभिः उच्चावचासुगतिषुनवेदस्वांगतिंभ्रमन् १३ इतिसंचिंत्यभग
वान्महाकारुणिकोहरिः दर्शयामासलोकंस्वंगोपानांतमसःपरं १४ सत्यंज्ञानमनंतंयद्ब्रह्मज्योतिःस
नातनं यद्धिपश्यंतिमुनयोगुणापायेसमाहिताः १५ तेतुब्रह्मह्रदंनीतामग्नाःकृष्णेनचोद्धृताः ददृशुर्ब्र
भावात्समाधेरिवोत्थापिताःसंतःब्रह्मणस्तस्यैवलोकंवैकुंठाख्यं ह्मणोलोकंयत्राक्रूरोऽध्यगात्पुरा १६
ददृशुरिति ननुब्रह्मणिमग्नानांपुनर्लोकदर्शनमघटितमित्याशंक्याह यत्रेति यत्रयस्मिन्कृष्णेनिमित्तेसति श्वफल्कसुतोऽक्रू
रोऽध्यगात् दृष्टवान् स्तुवन्परीति तत्संवादात्मकत्वादुक्तनिर्देशः नतुतत्कैश्वर्येभगवतिकिंविद्यपिअसंभावितमिति
भावः अथवाअक्रूरोऽध्यगात् यत्रदृष्टवान् तस्ययमुनाह्रदस्यब्रह्मह्रदइतिनामतेकृष्णेनीताः संतोब्रह्मणोलोकंददृशुः
पुनश्चकृष्णेनोद्धृताः स्वंस्ववत् तंदृष्ट्वाविस्मिताबभूवुरितिव्यवहितान्वयः प्रसिद्धकल्पनावृत्तांऽध्येति यद्वा अक्रूरो
ऽध्यगात् अधिगमिष्यति भाविनिभूतवदुपचारः नक्रूरः अक्रूरोयोगीसंसारनिवृत्तोसत्यांपरंलोकमधिगच्छतीतितथा

श्री॰ तत्रतस्मिन्ह्रदेकृष्णंछंदोभिर्वेदैः स्तूयमानंदृष्ट्वाविस्मितावभूवुः ९ इतिश्रीभावार्थेदशमेअष्टाविंशः २८
भा॰ द॰ ऊनत्रिंशेत्ररासार्थंयुक्तिप्रसक्तयोर्हरेः गोपीभीराससंरंभेतस्यचांतर्धिकौतुकं ब्रह्मादिजयसंरूढदर्पकं
टी॰ दर्पदर्पहा जयतिश्रीपतिर्गोपीरासमंडलमंडनः ननुविपरीतमिदंपरदारविनोदेनकंदर्पविजेतृत्वम्प्र
११९ 119

नंदादयस्तुतंदृष्ट्वापरमानंदनिर्वृताः कृ
ष्णंचतत्रछंदोभिःस्तूयमानंसुविस्मिताः ९
इतिश्रीभागवतेदशमस्कंधेअष्टाविंशोध्या
यः २८ श्रीशुकउवाच भगवानपिताारात्रीः शार
दोत्फुल्लमल्लिकाः वीक्ष्यरंतुंमनश्चक्रेयोगमा
यामुपाश्रितः १

~ श्रीं

तीतेः मैवं योगमायामुपाश्रितः आत्मारामोप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरत इत्यादिषुस्वातं
त्र्याभिधानात् तस्माद्रासक्रीडाविडंबनंकामजयख्यापनायेत्येवंतत्त्वंकिंचशृंगारकथापदेशेनविशेषतोनिवृ ११९
त्तिपरेयंपंचाध्यायीतिव्यक्तीकरिष्यामः तारात्रीरितियाताः बलाव्रजेसिद्धा मयेमारंस्यथक्षपाइतिप्रतिश्रुतारत्र

तदा तस्मिन्नेवक्षणे तत्प्रीतये उडुराजश्चंद्रः उदगात् उदितः किं कुर्वन् दीर्घेन कालेन दर्शनं यस्य सः स्वप्रियायाः मुखं अरुणेन कुंकुमेन यथा प्रियो विलिंपति तथा प्राच्याः ककुभः दिशो मुखं शंतमैः सुखतमैः करैः रश्मिभिः अरुणेन उदयरागेण विलिम्पन् अरुणीकुर्वन्नित्यर्थः सः प्रसिद्धः उडुराजः तथा चर्षणीनां जनानां शुचस्तापस्तानीः मृजन् अपनयन् २ कुमुद्वंतं कुमुदं विकसनीयं विद्यते यस्य

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शंतमैः सचर्षणीनामुदगाच्छुचो मृजन्प्रियः प्रियाया इव दीर्घदर्शनः २ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ३ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो

तं कुमुद्वंतं अखंडं मंडलं यस्य तं रमाया आननस्याभेव आभा यस्य तं नवकुंकुममिवारुणं एवंविधं चंद्रं दृष्ट्वा तथा वनं च तस्य कोमलैर्गोभिः रंजितं दृष्ट्वा कलं मधुरं जगौ अगायत कथं वामदृशां वामाः कमनीया मनोहरा दृशो यासां तासां मनोहरं यथा भवति तथा ३ असापत्न्याय अन्योन्यमलक्षितेन ज्ञापितः उद्यमो याभिस्ताः स कांतो यत्र तत्र गीतध्वनिमार्गेणाजग्मुः जवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ताः ४

श्री॰
१॰ पु॰
टी॰
१२॰
120

श्रीकृष्णस्य वंशशब्दश्रवणेन तत्स्वरणाविनतानां तत्क्षणमेव वैदिकलौकिककर्मनिवृत्तिं द्योतयन्नस्य स्वार्थविस्मृतं
कर्मविहाय ययुरित्याह दुहंत्य इति पयः स्थाल्यां चुल्ल्यामधिश्रित्य तत्काप्यमप्रतीक्ष्यमाणाः काश्चिद्ययुः सं
यावं गोधूमकणान्नपक्वं अनुद्वास्य अनवतार्य ५६ लिंपंत्योऽग्र्याः प्रमृजंत्यः अंगोद्वर्तनादि कुर्वंत्यः काश्चि

दुहंत्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ५ परिवेष
यंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योपास्य भोजनं ६ लिंपंत्यः प्रम
जंत्योन्या अंजंत्यः काश्च लोचने व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ७ तावार्यमाणाः
पितृभिः पतिभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो न निवर्तंत मोहिताः ८ अंतर्गृहगताः का
श्चिद्गोप्योऽलब्धविनिर्गमाः कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९

तत्कृष्णस्य तत्स्वार्थं मन्यमानाः कृतमपि कर्म तदा सकामम् न सांफल्यायेवेति द्योतयन्नाह व्यत्यस्तेति स्थानतः स्वरू
पतः क्रमतश्चाधरोत्तरत्वेन विपर्ययं प्राप्तानि वस्त्राण्याभरणानि च यासां ताः चरणाभरणं कर्णे कृत्वा कर्णाभर
णं करे कृत्वा ययुरिति ७ न च कृष्णाः कृष्णमनसो विघ्नाः प्रभवंतीत्याह तावार्यमाणा इति ८ अलब्धो विनिर्गमो

याभिस्ताः प्राप्यापि तद्भावनायुक्ता अत्यन्तानितरां दध्युरित्यर्थः ९

श्री· भा·द· स्कं· १२१ 121

अयंभावः जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य हृषीकेशत्वादनावृतं ततोनतद्बुद्ध्यपेक्षेति १३ ननुदेही कथमनावृ
तः स्यादतआह नृणामिति गुणात्मनः गुणनियंतुः भगवतएव एवंरूपाभिव्यक्तिः अतोनदेहित्वाद्दूष्यमस्य
व्यक्तेः पुज्यतइतिभावः १४ अतोयथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह काममिति एवंसंबंधंसौहृदमे

मूलः उक्तंपुरस्तादेतत्तेचैद्यः सिद्धिंयथागतः द्विषन्नपिहृषीकेशंकिमुताधोक्षजप्रियाः १३ नृ
णांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप अव्ययस्याप्रमेयस्यनिर्गुणस्यगुणात्मनः १४ कामंक्रोधं
भयंस्नेहमैक्यंसौहृदमेवच नित्यंहरौविदधतोयान्तितन्मयतांहिते नचैवंविस्मयःकार्योभवताभग
वत्यजे कृष्णेयोगीश्वरेश्वरेयतएतद्विमुच्यते १६ ताःदृष्ट्वांतिकमायाताभगवान्व्रजयोषितः अवद
द्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् १७ श्रीभगवानुवाच स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः व्र
जस्यानामयंकच्चिद्ब्रूतागमनकारणं १८ रजन्येषाघोररूपाघोरसत्वनिषेविता प्रतियातव्रजंनेहस्थेयं
स्त्रीभिःसुमध्यमाः १९

किं १५ नचभगवतोयमतिभारइत्याह नचैवमिति यतःश्रीकृष्णात् एतत्
स्थावरजंगमादिकमपिमुच्यते १६ प्रस्तुतमाह ताःदृष्ट्वेति वाचःपेशैर्वाग्विलासैः १७ सर्वास्ताःससम्भ्रममागताः १२१
नाविलोक्यसभयमिवाह व्रजस्येति १८ रजन्येषेति १९

120A

किंच तदानीमेव तंपरमात्मानंश्रीकृष्णंध्यानतः प्राप्ताः सत्यः गुणमयंदेहंजहुरित्याह श्लोकद्वयेनदुः
सहेति १० ननुकथंजहुः परमात्मेति ज्ञानाभावादित्याशंक्याह जारबुद्ध्यापीति नहिवस्तुशक्तिर्बुद्धि
मपेक्षते अन्यथामत्वापिपीतामृतवदिति भावः ननुतथापिप्रारब्धकर्मबन्धनेसतिकथंजहुस्तत्राह स
द्यः प्रक्षीणबंधनाइति ननुकथंभोगमन्तरेणप्रारब्धकर्मक्षीणंभोगेनैवसद्यः क्षीणमित्याह दुःसहेति
दुःसहोयः प्रेष्ठविरहस्तेनतीव्रस्तापस्तेनधुतानिगतान्यशुभानियासांताः तदप्राप्तिः परमदुःखभोगेन

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः १० त
मेवपरमात्मानंजारबुद्ध्यापिसंगताः जहुर्गुणमयंदेहंसद्यःप्रक्षीणबन्धनाः ११ राजोवाच
कृष्णंविदुःपरंकान्तंनतुब्रह्मतयामुने गुणप्रवाहोपरमस्तासांगुणधियांकथं १२

पापंक्षीणमित्यर्थः तथाचध्यानेनप्राप्तोऽच्युतस्तस्याश्लेषेणयानिर्वृतिःपरमसुखभोगस्तयाक्षीणंमंगलं
पुण्यबन्धनंयासांताः अतोध्यानेनपरमात्मप्राप्तेस्तत्कालसुखदुःखाभ्यांचनिःशेषकर्मक्षयात् गुणम
यंदेहंजहुरिति ११ ननुयथापतिपुत्रादीनांवस्तुतोब्रह्मत्वेपिनतद्भजनान्मोक्षस्तथाबुद्ध्यभावात् एवंकृ
ष्णेपिब्रह्मत्वबुद्ध्यभावेनतत्संगतिकथंमोक्षहेतुरितिशंकते कृष्णंविदुरितिकान्तंकमनीयंनतुब्रह्म १२

121A किंच मातरइति विचिन्वंतिमृगयंते बंधूनांसाध्वसंभयंमाकृध्वंमाकुरुतेत्यर्थः २० ईषत्प्रणयकोपेनान्यतोविलोकयंतीःप्रसादद्दृष्टमिति राकेशस्यपूर्णचंद्रस्यकरैरंजितंयमुनास्पर्शिनोनिलस्यलीलामंदगतिस्तयाएजंतःकम्प्यमानास्तरूणांपल्लवास्तैःशोभितं २१ सतीःहेसत्यः २२ संरंभस्तंभितदृष्टीःप्रसाद

मातरःपितरःपुत्राभ्रातरःपतयश्चवः विचिन्वंतिह्यपश्यंतोमाकृध्वंबंधुसाध्वसं २० दृष्टंवनंकुसुमितंराकेशकररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यातमाचिरंगोष्ठंशुश्रूषध्वंपतीन्सतीः क्रंदंतिवत्साबालाश्चतान्पाययतदुह्यत २२ अथवामदभिस्नेहाद्भवंत्योयंत्रिताशयाः आगताह्युपपन्नंवःप्रीयंतेमयिजंतवः २३ भर्तुःशुश्रूषणंस्त्रीणांपरोधर्मोह्यमायया तद्बंधूनांचकल्याण्यःप्रजानांचानुपोषणं २४ दुःशीलोदुर्भगोवृद्धोजडोरोग्यधनोपिवा पतिःस्त्रीभिर्नहातव्योलोकेप्सुभिरपातकी अस्वर्ग्यमयशस्यंचफल्गुकृच्छ्रंभयावहं जुगुप्सितंचसर्वत्रह्यौपपत्यंकुलस्त्रियः २६

अथवेति यंत्रिताशयाः वशीकृतचित्ताःउपपन्नंयुक्तं प्रीयंतेप्रीताभवंति २३ दृष्टादृष्टभयदर्शनेननिवर्तयति भर्तुरित्यादिनाश्लोकत्रयेण हेकल्याण्यः २४ २५ फल्ग्वतुच्छंकृच्छ्रंदुःसंपाद्यंऔपपत्यंजारसौख्यं

अतःकुलस्त्रियासर्वथात्याज्यं २६

श्री॰ भा॰१०॰ २९॰ १२२ 122

देहसंदरत्वप्येवास्माकंभावः त्वमेवप्रार्थनीयोनान्यइतिचेत् तत्राह श्रवणादिभिर्हरस्येमयिप्रेमप्रभ
वति सन्निकर्षेणसामीप्येननतथातोगृहान्प्रतियात २७ २८ किंच श्रवणादिमाद्युत्तरेणचिंताप्रामानां
स्थितिमाह कृत्वेति शुचः शोकाउद्धतेनश्वसनेनशुष्यंतोबिंबफलसदृशाअधरायेषुमुखेषुतानि अ

श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्त्तनात् नतथासन्निकर्षेणप्रतियाततततोगृहान् २७ श्रुकउ॰
इतिविप्रियमाकर्ण्यगोप्योगोविंदभाषितं विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययां २८ कृत्वा
मु मुखान्यवंचः श्वसनेनशुष्यद्बिंबाधराणिचरणेनभुवंलिखंत्यः अस्रैरुपात्तमषिभिःकुचकुंकु
मानितस्थुर्मृजंत्यउरुदुःखभाराः स्मतूष्णीं २९ प्रेष्टंप्रियेतरमिवप्रतिभाषमाणंकृष्णंतदर्थविनि
वर्तितसर्वकामाः नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः ३०

वअवांचिकृत्वातथांगुष्टेनमहींलिखंत्यः तथाऽगृहीतकज्जलैरस्रुभिः कुचकुंकुमानिक्षालयंत्यः तूष्णींस्थि
ताः यतउरुदुःखभरोयासांताः २९ किंच प्रेष्टमिति किंचित्संरंभेणकोपावेशेनगद्गदागिरोयासांताः अब्रु
वतस्म संरंभेकारणं प्रेष्टमित्यादि प्रियेतरमिवप्रतिभाष्यमाणंप्रत्याचक्षाणम् ३०

१२२

122A

नृशंसं क्रूरं हे दुरवग्रह स्वच्छंद तव पादमूलं भक्ताः सेवितवतीरस्मान्भजस्व मा त्यजेति ३१ अपि च यदुक्तं भर्तुः
शुश्रूषणं स्त्रीणामित्यादि तत्राहुः यत्पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासमेवमेतत् उपदेशानां पदे विषये
त्वय्येवास्तु उपदेशपदत्वे हेतुः ईश इति विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः ई
शत्वे हेतुः आत्मा किल भवानिति भोग्यस्य सर्वस्य भोक्ता आत्मैवेश इति अतः प्रेष्ठो बंधुश्च भवानिति सर्वं वयं शुश्रू
षणीयत्वेन त्वय्येवास्त्वित्यर्थः अथवा धर्मोपदेशानां पदे स्थाने उपदेशपदे धर्मोपदेशद्रष्टरि त्वयि सति अस्मा

गोप्य ऊचुः मैवं विभोऽर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं भक्ता भजस्व दुरवग्रह
मा त्यजास्मान्देवो यथादिपुरुषो भजते मुमुक्षून् ३१ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म
इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ३२

मुक्तधर्मं जिज्ञासमानानां स्वसतीषु त्वया धर्मविदा यदुक्तं एवमेतदस्तु न तु त्वं धर्मोपदेष्टा किं तु भवानात्मेति अथ
वा यदुक्तं एतदुपदेशपदे तज्ज्ञो वेदस्वरूपे त्वं नाम त्वयि तु ईशे स्वामिनि सति एवं काङ्क्षा नैवमित्यर्थः यतस्त्वं तनु
भृतां त्वमात्मा स्वरूप इति यद्वा यदुक्तं पत्यादिशुश्रूषणं धर्म इति एवमेतत् त्वय्येवास्तु अतः उपदेशपदे शुश्रू
षणीयत्वेनोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने अतः ईशे न हीश्वरमधिष्ठानं विना कोऽपि पतिपुत्रादिनामा

श्री॰ भा॰ द॰ पू॰ १२३ 123

एतत्सदाचारेणाहृष्यंतः प्रार्थयंति कुर्वंतीति कुशलाः शास्त्रनिपुणाः त्वयि रतिं कुर्वंति तथा च शास्त्रं किं
प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादि ३३ किंच प्रतियातेति यदुक्तं तदशक्यं त्वया चित्तादीनामपहृत
त्वात् इत्याहुः चित्तमिति यदस्माकं चित्तमेतावंतं कालं सुखेन गृहेषु निविशति आविशति तत् त्वयापहृतं करा

॥ कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं तन्नः प्रसीद वरदेश्व
रमास्म छिंद्या आशां धृतां त्वयि चिरादरविंदनेत्र ३३ चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत
करावपि गृह्यकृत्ये पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ३४ सिं
चांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं नो चेद्वयं विरहजाग्न्युपयुक्तदे या
हा ध्यानेन याम पदयोः पदवीं सखे ते ३५

वपि यौ गृहकृत्ये निर्विशतः तावपि त्वयापहृतौ सु
खेन हरत्वात्मनावयेति वा ३४ अंगेति हे सखे सिंच नः अस्माकं तवाधरामृतपूरकेण तवैव हास्येन हसितेन
अवलोकितेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निस्तं सिंच नो चेद्वयं तावत् पकोग्निः तथा तव विर
हाज्जनिष्यते योऽग्निस्तेन च उपयुक्तदेहाः दग्धशरीराः योगिन इव ते तव पदवीमंतिकं ध्यानेन याम प्राप्नुम ३५ या

२ मत्तस्यातेऽपिनपारयामोनशक्नुमः कथंभूतंतवपादजलेरमायाः लक्ष्म्याः रजतार्णंरत्नोत्सवंरत्नव

123A नत्सुस्वपतीनेवोपगच्छतत्तएवैनमस्तिस्विवेशुरितिचेत्तत्राऽऽह यहीतिहेरुक्मयहिनादारभ्यतवपादतलमस्याःलक्ष्म
स्पृष्टवत्योवयं तत्प्रभृतितहिनादारभ्यान्यस्यसंस्पृष्टवा नदपिकंचिदेवनसर्वदा अरण्येजनाःप्रियायस्यवा
तस्यतव अरण्यजननुप्रियत्वादरण्यकंचिदपि यर्हिकान्यायत्वादर्शीने अस्याःलक्ष्म्यास्पृष्टवत्योवयं तत्रचत्वा
याअभिरमितात्राऽनेदिताःस्मः तदारभ्यान्यसमक्षंस्थातुमपिनपारयामः तच्छ्रोक्तपतयोनरोचंतइतिभा
वः ३९ त्वत्पादसौभाग्यंपश्यतिविस्मितत्वाऽऽह श्रीरिति श्रीर्लक्ष्मीःवक्षसिअसपत्न्यस्थानंलब्ध्वापि तुलस्या

यत्संवुजातंतवपादतलंरमायादत्तरणंकंचिदस्यापजनप्रियस्य अस्याःमतत्प्रभृतिनान्यसमक्ष
मंजःस्थातुंत्वयाभिरमितावतपारयामः ३९ श्रीर्यत्पदांबुजरजश्चकमेतुलस्यालब्ध्वापिवक्ष
सिपदंकिलभृत्यजुष्टं यस्याःस्ववीक्षणकृतेन्यसुरप्रयासस्तद्वदयंचतवपादरजःप्रपन्नाः ४०
ततःप्रसीदवृजिनार्दनतेंघ्रिमूलंप्राप्तावितस्यवसतीस्त्वदुपासनाशाः त्वत्सुंदरस्मितनिरीक्ष
णतीव्रकामतप्तात्मनांपुरुषभूषणदेहिदास्यं ४८

सपत्न्यासह तवपदांबुजरजःकामयतेस्म भृत्यैःसेवैर्जुष्टमितिसौभाग्यातिरेकोक्तिः यस्याःलक्ष्म्याःस्ववीक्षण
कृतेश्रीरात्मानोविलोकयत्वेनदर्थमन्येषांब्रह्मादीनांतपोभिःप्रयासःतद्रजस्तद्वद्वयमुपिप्रपन्नाइति ४०. हे
वृजिनार्दनदुःखहंतः तत्तस्मात्नस्मानेनत्वदत्तनपवस्तापाशायासांताःवयं वसतीगृहान्विसृज्यागिनइवत्वत्समीपंप्राप्ता
नाःतवस्तन्दरस्मितविहसितेननिरीक्षणेनयस्तीव्रःकामस्तेनतप्तचित्तानांनः हेपुरुषरत्नदास्यंदेहि ४८

श्री: द.पू. टी. १२४

नत्वहंस्वामिंविहायममदास्यंकिमितिप्रार्थ्यतेअतआहुः वीक्ष्येति अलकावृतमुखंकेशांतैःरावृतंमुखं न
तथाकुंडलयोःश्रीर्ययोःतेगंडस्थलेयस्मिंनतत् अधरयोःसुधायस्मिंनतंच्चतच्चतवमुखंवीक्ष्यदत्ताभयंभुजदंडयु
गंच वक्षस्थितायाश्रीरस्याएकमेवरमणंरतिजनकंतेहृदयंवीक्ष्यदास्यएवभवामइति ३९ नत्वन्युगुप्सितमो
पपत्यमितिपकेतत्राहुः कास्त्रीति अंगहेकृष्ण कलानिपदानियस्मिंनतत् आयतंदीर्घंमूर्छितंस्वरालापभेदस्ते

वीक्ष्यालकावृतमुखंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकं दत्ताभयं
चभुजदंडयुगंविलोक्यवक्षःश्रियैकरमणंचभवामदास्यः ३९ कास्त्र्यंगतेकल
पदामृतवेणुगीतसंमोहितार्यचरितान्नचलेत्त्रिलोक्यां त्रैलोक्यसौभगमिदंच
निरीक्ष्यरूपंयद्गोद्विजद्रुममृगाःपुलकान्यविभ्रन् ४०

न पाशांतरेकलपदामृतमयंवेणुगीतंतेनसंमोहिताकावास्त्री आर्यचरित्रात्निजधर्मात्सतीधर्मात्चचलेत्
नसंमोहिताःपुरुषाअपिविचलिताः किंचत्रैलोक्यसौभगमिदंरूपंनिरीक्ष्यस्थावरायेतेपिपक्षिणोपिपतत्रिणोपिद्रुमाअपि
मृगादीन्यपिपुलकानिधृतवन्त अविभ्रन्‌ः वेणुगीतकर्णश्रवणमात्रेणापितावत् निजधर्मस्यत्यागःकृतः

किंचत्रैलोक्यसौभगमिदं अं:

१२४

124A

व्यक्तंनिश्चितं ४१ विक्लवितंपारवश्यप्रलपितं गोपीररीरमत्ररमयामास ४२ प्रियस्येक्षणेनोत्फुल्लानिमुखा
नियासांताभिः उदारहासश्चद्विजाश्चतेषुकुंदकुसुमवद्दीधितिर्यस्यसः एणांकश्चंद्रः ४३ ४४ ४५ बाहु

व्यक्तंभवान्व्रजजनार्तिहरोभिजातोदेवोयथादिपुरुषःसुरलोकगोप्ता तन्नोनिधेहिकरपंकजमा
र्तबंधोतप्तस्तनेषुचशिरःसुचकिंकरीणां ४१ श्रीशुकउ० इतिविक्लवितंतासांश्रुत्वायोगेश्वरेश्वरः
प्रहस्यसदयंगोपीरात्मारामोप्यरीरमत् ४२ ताभिःसमेताभिरुदारचेष्टितःप्रियेक्षणोत्फुल्लमु
खीभिरच्युतः उदारहासद्विजकुंददीधितिर्व्यरोचतैणांकइवोडुभिर्वृतः ४३ उपगीयमानउद्गा
यन्वनिताशतयूथपः मालांबिभ्रद्वैजयंतींव्यचरन्मंडयन्वनं ४४ नद्याःपुलिनमाविश्यगोपीभि
र्हिमवालुकं रेमेतत्तरलानंदीकुमुदामोदवायुना ४५ बाहुप्रसारपरिरंभकरालकोरुनीवीस्त
नालभननर्मनखाग्रपातैः क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिंरमयांचकार ४६
एवंभगवतःकृष्णाल्लब्धमानामहात्मनः आत्मानंमेनिरेस्त्रीणांमानिन्योभ्यधिकंभुवि ४७

प्रसारश्चपरिरंभश्चकरादीनामालभनंस्पर्शश्चनर्मपरिहासश्चनखाग्रपातश्चतैः क्ष्वेल्याक्रीडयाचअवलोके
हसितैश्चकामंतासामुद्दीपयन् तारमयामास ४६ महात्मनोविशंकेचित्तात्गंभीरचित्ताद्वा ४७

श्री· तैस्तौभगमदं सौभाग्येनमदं मस्वाधीनत्वं मानंगर्वंच केशवः कश्चईशश्चकेशौतौवशयतीतितथासः ४८
इतिश्रीभावार्थे दशमेकोनविंशः २९ त्रिंशविरहसंतप्तगोपीभिः कृष्णमार्गणं उन्मत्तवद्वनियतंभ्रमंतीभिर्वनेव
द· स्क· ने अवत्ताराणः अपशयन्त्यः १ गत्यावअनुरागेनस्मितेनेचताभ्यांविभ्रमेक्षितानिस्मविलासनिरीक्षितानितैश्च
टी· मनोरमाश्चालापाश्च विहाराःक्रीडाश्चविक्रमोगमनेवविभ्रमावाअन्येविलासाः तैश्चरमापतेर्गत्यादिभिरा
१२५
125

तामांतत्सौभगमदंवीक्ष्यमानंचकेशवः प्रशमायप्रसादायतत्रैवांतरधीयत ४८ इतिश्रीभागवते
दशमस्कंधेएकोनविंशोध्यायः २९ शुकउवाच अंतर्हितेभगवतिसहसैवव्रजांगनाः अतप्यं
स्तमचक्षाणाः करिण्यइवयूथपं १ गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः
आक्षिप्तचित्ताःप्रमदारमापतेस्तास्ताविचेष्टाजगृहुस्तदात्मिकाः २ गतिस्मितप्रेक्षणभाषणा
दिषुप्रियाःप्रियस्यप्रतिरूढमूर्तयः असावहंत्वित्यबलास्तदात्मिकान्यवेदिषुः कृष्णविहारविभ्रमाः

त्मिकानिआकृष्टानिचित्तानियासांताः अतस्तस्मिन्नेवात्मायासांताःतस्यविविधाश्चेष्टाजगृहुः तदनुकरणंना
क्रीडन् २ अपिच गतिस्मितेनेति प्रियस्यगत्यादिषु प्रतिरूढाआविष्टामूर्तयोयासांताः अतःकृष्णविहारविभ्र १२५
माःकृष्णस्येवविहारविभ्रमाःक्रीडाविलासायासांताः अहमेवकृष्णइतिपरस्परंनिवेदितवत्यः ३

125A

किंच गायंत्यइति वनाद्वनांतरंगच्छंत्योविविक्तः श्रमं गायन् उन्मत्ततुल्यत्वमाह वनस्पतीन्पप्रच्छुः
भूतेषुअंतरंमध्येसंतंपुरुषंबहिश्चसंतमिति ४ तत्वंपंचयतिनवभिः तत्रमहत्वाद्देतेपश्नेषुरित्याशयोत्र
सुमत्यादीन्पृच्छंतीति दृष्टइति प्रेमहासविलसितैरवलोकनैर्नोस्माकंमनोहृत्वाचोरःक्वगतः वयुष्माभिः
किंदृष्टइति ५ महांतःपृष्टैःसर्वोपकारिणश्चेतिकुरबकादीन्पृच्छंतीति कश्चिदिति हेकुरबकादयः

गायंत्यउच्चैरमुमेवसंहताविचिक्युरुन्मत्तकवद्वनाद्वनं पप्रच्छुराकाशवदंतरंबहिर्भूतेषुसंतंपु
रुषंवनस्पतीन् ४ दृष्टोवःकश्चिदश्वत्थप्लक्षन्यग्रोधनोमनः नंदसूनुर्गतोहृत्वाप्रेमहासाव
लोकनैः ५ कश्चित्कुरबकाशोकनागपुन्नागचंपकाः रामानुजोमानिनीनांगतोदर्पहरस्मि
तः ६ कश्चित्तुलसिकल्याणिगोविंदचरणप्रिये सहत्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोच्युतः ७
मालत्यदर्शिवःकश्चिन्मल्लिकेजातियूथिके प्रीतिंवोजनयन्यातःकरस्पर्शेनमाधवः ८

सदर्पहरंस्मितंयस्यसः इतोगतःकश्चिद्दृष्टइति ६ अलिकुलैःसहत्वांबिभ्रत्नवातिप्रियस्त्वयाकिंदृष्ट
इति ७ गुणातिरेकेपिनम्रत्वादिमाःपृश्नोयुरितिपृच्छंति मालतीति हेमालतिमल्लिकेजातियूथिके
वःयुष्माभिःकिमदर्शिदृष्टःकरस्पर्शेनवःप्रीतिंजनयन्किंयातइति अत्रमालतीजात्योरवांतरविशेषो

दश० ८

फलादिभिः सर्वप्राणिनां संतर्पकाय ते पश्यतेति चूतादीन् पृच्छंति हे चूतादयः हे येन्येव परार्थभविकाः प
रार्थमेव भवो जन्म येषां ते यमुनोपकूलाः तस्याः कूलसमीपे वर्तमानाः तीर्थवासिन इत्यर्थः ते भवंतः रहि
तात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णमार्गं शंसंतु कथयंतु ९ हे क्षिति क्षिते त्वया किं तपः कृतं त्वया
त्वं केशवांघ्रिस्पर्शोत्सवात् केशवस्यांघ्रिस्पर्शनोत्सवो यस्मात् तस्मा ऊतांगरुहैरुत्पुलकितारोमांछितात्वं विभा

चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्ववकुलाम्रकदंबनीपाः येन्येप
रार्थभविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९ किं ते कृ
तं क्षिति तपो वत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि अप्यंघ्रि
संभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ९

सि शोभसे तत्र विशेषं पृच्छंति अपि किमयमुत्सवोंऽघ्रिसंभवोऽधुनातनैकदेशांघ्रिस्पर्शसंभूतः यद्वा नैता
वत् किंतु उरुक्रमविक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् आहो अथवा नैतावदेव अपि तु त
तोपि पूर्वं वाराहवपुषः परिरंभणेनेति अतस्त्वया नूनं दृष्टस्तं दर्शयेति १० १२९

126A

हरिणाददृष्टिभ्रमरंत्याः प्रतिकूलस्पर्शनेन संभाव्याहुः अपीति हे सखि एणपत्नि अपि किमुपगतः समीपंग
तः गात्रैः सौंदर्यैः सुखवाह्लादिभिः प्रियया सहेति यदुक्तं तद्द्योतकं कांताया अंगसंगोद्भूतकुचकुंकुमेन रंजिता
याः कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य वाति आगच्छति ॥११॥ फलभरेणानतांस्तरून्दृष्ट्वापते कृष्णप्रणता
इति मत्वा प्रियया सहितस्य गतिविलासं संभावयंत्यः पृच्छंति बाहुमिति तुलसिकाया अलिकुलैस्तदामोदमदा

ज:

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः कांतांगसंगकुचकुंकुमरंजि
तायाः कुंदस्रजः कुलपतेरिह वाति गंधः ॥११॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकु
लैर्मदांधैः अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः ॥१२॥ पृच्छतेमा लता बाहून
प्याश्लिष्टा वनस्पतेः नूनं तत्करजैः स्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥१३॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः

न्धैरन्वीयमानोनुगम्यमान इह चरन्निति ॥१२॥ काश्चिदाहुः हे सख्य इमा लताः कृष्णेन संगता नूनमत इमाः पृच्छत ना
नु स्वपतिसंगतेन तत्संगतिर्दृष्टा वनस्पतेः पत्युर्बाहूनाश्लिष्टा अपि अहोभाग्यं नूनं तत्करजैः स्पृष्टाः यतः उत्पुल
कानि बिभ्रति न हि स्वपतिसंगतौ ईदृक्पुलकसंभव इति भावः उन्मत्तकवत्पप्रच्छुरित्येतत्प्रपंचितं ॥१३॥ इदानीं
रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति इतीति उन्मत्तवचो गोप्य उन्मत्तवद्वचस्ता गो

कस्याश्चिदित्यादिचतुर्भिः श्लोकैरनुकरणं प्रपंच्यते ततस्त्रिभिस्तन्मयत्वं पुनरेकेनानुकरणमितिविवेकः
श्री. पूतनायंत्याः पूतनावदाचरंत्याः कृष्णवदाचरंतीकाचित्स्तनमपिबत् तोकायित्वातोकवदात्मानंकृत्वा शक
भा. द. टायतींशकटवदाचरंतींपदाहन् १५ दैत्यायित्वादैत्यवत् तृणावर्तवदात्मानंकृत्वा एकाकृष्णार्भभावनांकृष्ण
ट.
१२० कस्याश्चित्पूतनायंत्याःकृष्णायंत्यपिबत्स्तनं तोकायित्वारुदत्यन्यापदाहन्शकटायतीं १५ दैत्यायि
127 A त्वाजहारान्यामेकांकृष्णार्भभावनां रिंगयामासकाप्यंघ्रीकर्षंतीघोषनिःस्वनैः १६ कृष्णरामायितेद्वे
तुगोपायंत्यश्चकाश्चन वत्सायितींहंतिचान्यातत्रैकातुबकायितीं १७ आहूयदूरगायद्वत्कृष्णस्त
मनुकुर्वंती वेणुंक्वणंतींक्रीडंतीमन्याःशंसंतिसाध्विति कस्यांचित्स्वभुजंन्यस्यचलंत्याहापरानुनु
कृष्णोहंपश्यतगतिंललितामितितन्मनाः १९ माभैष्टवातवर्षाभ्यांतत्त्राणंविहितंमया इत्युक्त्वैकेनह
स्तेनयतंत्युद्विदधेंबरं २०
स्यार्भंबालंभावयतीतियातामन्याजहार १६ १७ दूरगाःदूरेवर्तमानागाःयद्वत् यथाकृष्णस्तथाआह्वयंतंकृष्णमनु
कुर्वंती अनुवर्तंतीमितिवापाठः अन्याःसाधुसाध्वितिप्रशंसंति १८ तस्मिन्श्रीकृष्णेमनोयासांताः १९ यतंती
प्रयत्नंकुर्वंतीति अंबरंउत्तरीयंवस्त्रंउद्विदधेऊर्ध्वंधृतवती २०
१२०

127A

२१ पिदध्वंनिमीलयत २२ सदृक्षसनयनं आस्यंपिधाय सदृक्षवातीतिवा भीतिविडंवनंभयानुकरणम
जे २३ एवंपुनरपिहेदावनेलतास्तरूंश्च कृष्णंपृच्छंत्यः वनोद्देशोवनप्रदेशे व्यचक्षततस्यपदान् २४ २५ सुपृक्ता

आहृत्यैकापदाक्रम्यशिरस्याहापरान्नृप दुष्टाहेगच्छजातोहंखलानांनत्वदंडधृत् २१ तत्रैकोवाचहे
गोपादावाग्निंपश्यतोल्वणं चक्षूंष्याशुपिदध्वंवोविधास्येक्षेममंजसा २२ वद्धान्ययास्रजाकाचित्तन्वी
तत्रउलूखले भीतासुदृक्पिधायास्यंभेजेभीतिविडंवनं एवंकृष्णंपृच्छमानावृंदावनलतास्तरून् व्या
चक्षतवनोद्देशेपदानिपरमात्मनः २४ पदानिव्यक्तमेतानिनंदसूनोर्महात्मनः लक्ष्यंतेहिध्वजांभोज
वज्रांकुशयवादिभिः २५ तैस्तैःपदैस्तत्पदवीमन्विच्छंत्योग्रतोवलाः वध्वाःपदैःसुपृक्तानिविलोक्या
र्त्ताःसमब्रुवन् कस्याःपदानिचैतानियातायानंदसूनुना अंसेन्यस्तप्रकोष्ठायाःकरेणोःकरिणा
यथा २७ अनयाराधितोनूनंभगवान्हरिरीश्वरः यन्नोविहायगोविंदःप्रीतोयामनयद्रहः धन्याअहो
अमीआल्योगोविंदांघ्र्यब्जरेणवः यान्ब्रह्मेशौरमादेवीदधुर्मूर्ध्न्यघनुत्तये २९

विसंमिश्राणि २६ तेनकृष्णेनअंसेन्यस्तःप्रकोष्ठोयस्याःकरेणोःहस्तिन्याः २७ रहःएकांतस्थानं २८ हेआल्यःस
ख्यःअहोधन्याःअतिपुण्याःगोविंदांघ्र्यब्जरेणवःतत्रहेतुःयानिति अस्माभिरप्येतद्रेणवभिषेकेणतयैवकृष्णःप्रा

श्री॰ भा॰ द॰ सु॰ १२८ 128

अन्याआहुः तस्याइति गोपीनांसर्वस्वं अयंभावः यदितस्याःपदानिसंश्लिष्टानिनभवेयुः तानिनोदुःखं
कुर्वंतीति ३० तदसंश्लिष्टत्वात्केवलंकृष्णस्यपादेनैवविचिन्वंत्यस्तान्दृष्ट्वापुनरत्यंतंसमतप्यन् तदाहश्लोकत्र
येणनलक्ष्यंतइति खिद्यंतेसुजातेसुकुमारेअंघ्रितलेयस्यास्तां उन्निन्येस्कंधमारोपितवान् ३१ तत्रहेतु

तस्याअमूनिनःक्षोभंकुर्वन्त्युच्चैःपदानियत् यैकापहृत्यगोपीनांरहोभुंक्तेच्युताधरं ३० नलक्ष्यं
तेपदान्यत्रतस्यानूनंतृणांकुरैः खिद्यत्सुजातांघ्रितलामुन्निन्येप्रेयसींप्रियः ३१ इमान्यधिकम
ग्नानिपदानिवहतोवधूं गोप्यःपश्यतकृष्णस्यभाराक्रांतानिकामिनः ३२ अत्रावरोपिताकां
तापुष्पहेतोर्महात्मना अत्रप्रसूनावचयःप्रियार्थेप्रेयसाकृतः ३३ प्रपदाक्रमणेएतेपश्यता
सकलेपदे केशप्रसादनंत्वत्रकामिन्याःकामिनाकृतं तानिचूडयताकांतामुपविष्टमिहध्रुवं ३४

मारुह इमानीति अतिभारेणनिमग्नानि ३२ ३३ प्रपदाभ्यांपदाग्राभ्यामाक्रमणंतोणीसंमर्दनंययोः आ
तपवासकलेपदेपश्यतेतितस्याःकुसुमजान्वेतदुपविष्टायाश्चिन्हंदृष्ट्वाआहुः केशप्रसादनमिति कां
तामधिकृत्यतानिप्रसूनानिचूडयताचूडानुकारेणबध्नता इहध्रुवमुपविष्टम् ३४ १२८

128A रेमेइत्यादिशुकोक्तिः आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखंडितः स्त्रीविभ्रमैरनाकृष्टोपि तयाचेत्कि
मितिरेमेतत्राह कामिनामिति ३५ ३६ स्त्रीणांदुरात्मतामाह साचेतिद्वाभ्यांकामोयानमागमनसाधनंयासांताः
गोपीर्हित्वामांभजतइतिहेतोरात्मानंवरिष्ठंमेनेइति ३७ ३८ कामिनांदैन्यंदर्शयति एवमुक्तइति अखंडितत्वमाह

रेमेतयाचात्मरतआत्मारामोप्यखंडितः कामिनांदर्शयन्दैन्यंस्त्रीणांचैवदुरात्मतां ३५ इत्येवंदर्शयंत्यस्ता
श्चेरुर्गोप्योविचेतसः यांगोपीमनयत्कृष्णोविहायान्याःस्त्रियोवने ३६ साचमेनेतदात्मानंवरिष्ठंसर्वयो
षितां हित्वागोपीःकामयानामामसौभजतेप्रियः ३७ ततोगत्वावनोद्देशंदृप्ताकेशवमब्रवीत् नपारयेहं
चलितुंनयमांयत्रतेमनः ३८ एवमुक्तःप्रियामाहस्कंधमारुह्यतामिति ततश्चांतर्दधेकृष्णःसावधूरन्व
तप्यत ३९ हानाथरमणप्रेष्ठक्वासिक्वासिमहाभुज दास्यास्तेकृपणायामेसखेदर्शयसन्निधिं ४० अ
न्विच्छंत्योभगवतोमार्गंगोप्योविदूरतः ददृशुःप्रियविश्लेषमोहितांदुःखितांसखीं ४१ तयाकथितमा
कर्ण्यमानप्राप्तिंचमाधवात् अवमानंचदौरात्म्याद्विस्मयंपरमंययुः ४२

ततश्चेति तस्याःस्कंधारोहोद्यतायामंतर्हितइत्यर्थः ३९ अनुतापमाह हानाथेति ४० अन्विच्छंत्योमृगयमाणाःअ
विदूरतःसमीपे ४१ श्रीकृष्णायनमोनमः श्रीरामायनमोनमः ॥

श्री॰ भा॰ द॰ टी॰ १२९

ततस्ता यावत्सहिताः कृष्णान्वेषणाय वनमाविशन् ततो हरेरन्वेषणान्निवृत्ताः ४२ आत्मशरीरं एवं तमः
प्राप्ता अपि आगाराणि न सस्मरुः स्वशरीरं नैव स्मृतवत्यः तदात्मिकाः स एव आत्मा यासां तास्तन्मया इत्यर्थः
४४ किं तत्पूर्वं यत्र श्रीकृष्णेन संगतिरासीत् तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयंति ध्यायंतीति तथा
ताः कृष्णस्यागमनं कांक्षितं याभिस्ताः मिलिताः सत्यः कृष्णमेव जगुरिति ४५ इति भावार्थदीपिकायां दशमे त्रिंशः ३० ए
कत्रिंशे निराशयास्ताः पुनः पुलिनमागताः कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमे जयतीति हे दयित तेजन्म

ततो विशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः ४२ तन्मनस्कास्त
दालापास्तद्विचेष्टास्तदात्मिकाः तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ४४ पुनः पुलिनमाग
त्य कालिंद्याः कृष्णभावनाः समवेता जगुः कृष्णं तदागमनकांक्षिताः ४५ इति श्रीदशमे त्रिंशः ३० गो॰
प्य ऊचुः जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि दयित दृश्यतां दिक्षु तावकास्त्वयि धृतास
ना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते यस्मात्त्वमत्र जातस्तस्मादिंदिरा लक्ष्मीः अत्र हि श्रयते
3 व्रजं मंडनं कृत्य वर्तते एवं व्रजे सर्वस्मिन्मोदमाने अत्र तु तावकाः त्वदीया गोपीजनाः त्वयि त्वदर्थमेव कथंचिद्
धृतासवः धृता असवो यैस्ते त्वां विचिन्वते अतस्त्वया नः दृश्यतां प्रत्यक्षीभूयतामिति यद्वा अस्माभिर्भवान्दृश्यतां
यद्वा एवं त्वया आदृश्यतां एते विचिन्वंत इति अत्र तत्रागणं बहूनां वक्तृत्वात् परा आहुरिति सर्वश्लोकेष्वतारतारणा

तत्रविविन्वंतममकिमितिचेत्तत्राहुः शारदिति शारडदाशयेशरत्कालीनेसरसि साधुजातंसम्यग्जातंसत्सरसिजं
सुविकसितंपद्मं तस्योदरेगर्भेयाश्रीस्तांमुष्णातिहरतीतितथा तयादृशानेत्रेण हेसुरतनाथसंभोगपतेवरदअ
भीष्टप्रदअशुल्कदासिकाअमूल्यादासीर्नः निघ्नतोमारयतस्तेतववधयाक्रियमाणः इहलोकेअयंवधोनभवति किं
किंशस्त्रेणैववधोवधः किंदृशावधोवधोनभवति किंतुभवत्येव अतस्त्वदृशापहृतप्राणाअस्मत्प्राणानयत्वयादृ
श्यतामितिभावः त्वयादृश्यतामितियथासंभवंसर्वत्रवाक्यशेषः २ किंचबहुभ्योमृत्युभ्यःत्वयारक्षितावाकिमिती

शारडदाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा सुरतनाथतेशुल्कदासिकावरदनिघ्नतोनेहकिं
वधः २ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषमयात्मजाद्विश्वतोभयादृषभतेव
यंरक्षितामुहुः ३ नखलुगोपिकानन्दनोभवानखिलदेहिनामंतरात्मदृक् विखनसार्थितोविश्वगुप्तये

दानीरक्षणमस्मयंप्रेक्षणेनोचातयसीत्याहुः विषेति हेऋषभश्रेष्ठविषमयाज्ज सखउदीयिवान्सात्वतांकुले ४
लात्प्ययोनाशस्तस्मात् तथाव्यालराक्षसात् अघासुरात् वर्षमारुतात् वृष्टिसहितात्वायोः हेविद्युतानलात् अशनिपाता
त् वृषेरिष्टस्तस्मात् मयात्मजात् व्योमात् विश्वतः अन्यस्मादपिसर्वतोभयाच्च कालियदमनादिनारक्षिताःकिमिदा
नीमुपेक्षसेइतिभावः ३ अपिचविश्वपालनायावतीर्णस्यतवभक्तोपेक्षात्यन्तमनुचितेत्याशयेनाहुः नखल्विति हे
सखेभवान् खलुनिश्चितंयशोदासुतोनभवसि किंतुसर्वप्राणिनांबुद्धिसाक्षी नतुसकिंदृशोभवतितत्राहुः वृषने

साब्रह्मणाविश्वपालनायप्रार्थितःसन्सात्वतांकुले उदीयिवानुदितइति ४ तस्मात्वञ्चकानामस्माकमेत
त्प्रार्थनाचतद्दृश्यंसम्याद्येत्याहुः विरचिताभयमित्यादिचतुर्भिः हेवृष्णिधुर्य संसृतेर्भयात् तेचरणमीयु
षांशरणंप्राप्तानांप्राणिनांविरचितंदत्तमभयंयेनतत्तथा हेकांतकामदंवरदंतथाश्रियःकरंगृह्णातीतित
था तद्भवत्करसरोरुहंनःशिरसिधेहिआरोपय ५ हेव्रजजनार्तिहन्हेवीर निजजनानांयःस्मयोगर्वस्तस्य

विरचिताभयंवृष्णिधुर्यतेचरणमीयुषांसंसृतेर्भयात् करसरोरुहंकांतकामदंशिरसिधेहिनः
श्रीकरग्रहं ५ व्रजजनार्तिहन्वीरयोषितांनिजजनस्मयध्वंसनस्मित भजसखेभवत्किंकरीः
स्मनोजलरुहाननंचारुदर्शय ६ प्रणतदेहिनांपापकर्षणंतृणचरानुगंश्रीनिकेतनं फणिफ
णार्पितंतेपदांबुजंकृणुकुचेषुनःकृंधिहृच्छयम् ७

ध्वंसकंनाशकंस्मितंयस्य हेतथाभूतसखेभवत्किंकरीर्नोऽस्मान्भजस्वआश्रयस्वेतिनिश्चितंप्रथमंतावज्जल
रुहाननंचारुयोषितांनोदर्शय ६ अविशेषेणप्रणतानांदेहिनांपापकर्षणंपापहन्तृ तृणचरान्पशूनग्
नुगच्छतीतिकृपयेति तथासौभाग्येनश्रियोनिकेतनंवीर्यातिरेकेणफणिनःकालियस्यफणेष्वर्पितंते १३·
पदांबुजंनःकुचेषुकृणुकुरु किमर्थंहृच्छयंकामंकृन्धिछिन्धि ७

130A हेपुष्करेक्षण तवैवमधुरयागिरावल्गूनिवाक्यानियस्यां तयाबुधानांमनोज्ञयाहृद्ययागंभीरयेत्यर्थः मुह्य
तीरिमानोविधिकरीः किंकरीरधरशीधुनाऽधरामृतेनाऽऽप्याययस्वसंजीवयेति ८ किंचअस्माकंत्वद्विरहे
णप्राप्तमेवमरणंकिंतत्त्वत्कथामृतपायिभिः सुकृतिभिर्विलंबितमित्याहुः तवेति कथैवामृतं अत्रहेतुः तप्त
श्र. जीवनंप्रसिद्धादमृतादुत्कर्षमाहुः कविभिर्ब्रह्मविद्भिरपीडितंस्तुतं देवभोग्यंत्वमृतंतैस्तुच्छीकृतं किंचकल्म

मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण विधिकरीरिमावीर
मुह्यतीरधरशीधुनाप्याययस्वनः ८ तवकथामृतंतप्तजीवनंकविभिरी
डितंकल्मषापहं श्रवणमंगलंश्रीमदाततंभुविगृणंतितेभूरिदाजनाः ९

षापहंकाम्यकर्मनिरसनं तत्त्वमृतंनैवंभूतं किंच श्रवणमंगलंश्रवणमात्रेणमंगलप्रदं तत्त्वनुष्ठानापेक्षं किं
चश्रीमत्सुशांतं तत्त्वमादकं आततंयथाभवतितथाभुवियेगृणंतिनिरूपयंति तेजनाःभूरिदाःबहुज्ञदातारःजीवि
तदंददतीत्यर्थः यद्वा एवंभूतंत्वत्कथामृतंयेभुविगृणंति तेभूरिदाःसर्वजन्मसुबहुदत्तवंतःसुकृतिनइत्यर्थः एत
दुक्तंभवति सर्वत्रैवकथामृतंकेवलंगृणंतितेपितावदतिधन्याःकिंपुनर्येत्वांपश्यंति अतःप्रार्थयामहेत्वयादर्श

१३१

श्रीमद्भागवतटीका

श्री॰ नत्वत्तर्हि मत्कथाश्रवणेनैव निर्वृता भवत्यः किं मद्दर्शनेन त्वद्विनात्यभिततविता वयं तत्रापि शांतिं न विंदाम इ
भा॰ द॰ त्याहुः प्रहसितमिति हे प्रिय कुहक कपटज्ञ संविस्त्वं केतनं मास्मि १० किंच त्वयि वयमतिप्रेमार्द्रचित्ताः त्वं प्र
पू॰ नअस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्वयेन चलसीति हे नाथ कांत यद्यदा व्रजाच्चलसि पशूंश्चा
१३१ रयन् तदा तव नलिनसुंदरं कोमलं ते पदं शिलैः कणिशैः तृणांकुरैश्च सीदति क्लिश्यतीति नो मनः कलि॰

131

प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं रहसि संविदो या हृदिस्पृशः कुहक नो मनः
क्षोभयंति हि १० चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदं शिलतृणांकुरैः सीदतीति
नः कलिलतां मनः कांत गच्छति ११ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं घन
रजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि १२

लतामस्वास्थ्यं गच्छति प्राप्नोति एवंभूतास्त्वदुःखशंकितचित्ता वयं ११ त्वं तु दिनपरिक्षये सायंकाले नीलकुं
तलैरावृतं घनरजस्वलं गोरजःछुरितं मुखं वनरुहाननं मलिकुलमालापरागच्छुरितं पद्मतुल्यमाननं वि
भ्रत् तच्च त्वं मुहुर्मुहुः दर्शयन्नो मनसि केवलं स्मरं यच्छसि प्रयंसि न तु संगं ददासीति कपट इति भावः १२ १३१

131A

श्वेतोऽधुनाकपटं विहायैवं ऊर्विति प्रार्थयन्ते श्लोकद्वयेन प्रणतकामदमिति हे अधिहन् हे रमणपद्म
जेनार्चितं आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शंतमं च सेवासमयेऽपि सुखितम तव चरणपंकजं का
मतापशांतये नस्तनेष्वर्पयेति १२ अपि च हे वीर तेऽधरामृतं नोऽस्माकं वितर देहि कथंभूतमधरामृतं स्वनि
तेन नादितेन वेणुना सुष्ठु चुंबितमिति नाधरामृतवासितमिति भावः इतररागविस्मारणं नृणामितरेषु।

प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पया
धिहन् १३ सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं इतररागविस्मारणं नृणां वित
र वीर नस्तेऽधरामृतं १४ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतां कुटिलकुंत
लं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां १५ २

सार्वभौमादिषु सुखेषु रागान् मिच्छां विस्मारयति विलोप
यतीति तथा तत् १४ किंच त्वामपि त्वद्दर्शने दुःखं दर्शने च सुखं दृष्ट्वा सर्वसंगपरित्यागेन यत इव वा
यं त्वामुपागताः त्वं तु कथमस्मान्त्यजसि हे सेऽश्र इति सकरुणमूचुः अटतीति द्वयेन यत् यदा भवान् कान
नं वृंदावनं प्रति दिवा अटति गच्छति तदा त्वामपश्यतामस्माकं त्रुटिः क्षणार्धमपि युगवद्भवति एवमदर्शने
दुःखमुक्तं पुनः सकं चिह्नितांते तेतव श्रीमत्सुखं उद्वीक्षमाणानां ते वांरश्मा पक्ष्मकृत् ब्रह्मा जडो मंद एव निमे

५

श्री० भा० द० १० १३२ 132

तस्मात् हे अच्युत पतीन्सुतान् अन्वयान् तत्संबंधिनः भ्रातृबांधवांश्चातिविलंघ्य तव समीपमागता वयं क
थंभूतास्तव गतिविदः अस्मदागमने गीतगतीर्वा जानतः गतिविदो वयं वा तवोद्गीतेन उच्चैर्गीतेन मोहि
ताः हे कितव शठ एवंभूता योषितो निशि स्वयमागताः तास्त्वत्तः कस्त्यजेत न कोपीत्यर्थः ६ अतस्त्वया त्व
तो नामस्माकं प्राकृतेन त्वद्दर्शनविदानस्य हृद्रोगस्य त्वत्संगस्यैव चिकित्सां कुर्विति आह द्वयेन रहसीति श्रियो

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेंत्यच्युतागताः गतिविदस्तवोद्गीतमोहिताः कितव
योषितः कस्त्यजेन्निशि ६ रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणं बृहदुरः श्रियो
वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ७ व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं
त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं ८

धाम ते बृहद्विशालं उरश्च वीक्ष्य नो अतिस्पृहा भवति तथा च मुहुर्मुहुर्मनो मुह्यतीति ७ तव व्यक्तिरभिव्यक्ति
र्व्रजवनौकसां सर्वेषामविशेषेण वृजिनहंत्री दुःखनिरसनी विश्वमंगलं सर्वमंगलरूपा च अतस्त्वत्स्पृहा
त्मनां त्वत्स्पृहाक्रान्तमनसां नः मनाक् ईषत् ततः किमपि त्यज मुंच कार्पण्यमकुर्वन्देहीत्यर्थः किं तत् स्वज
नहृद्रोगाणां यत् दूतिगोप्यं निषूदनं नाशकं निवर्तकमौषधं यत्त्वमेव वेत्सीति गूढाभिप्रायः ८ १३२

132A

अतिप्रेमपर्याकुलिताह्रदंत्याशंक्याहुः यत्ते इति हेप्रिय यत्ते तव सुजातं सुकुमारं चरणाम्बुरुहं कर्कशेषु स्तनेषु भीताः शङ्किताः शनैः
शनैर्दधीमहि धारयामस्तेन त्वं अटवीमटसि गच्छसि नयसीति पाठे पशून्वा कांचिदन्यां वा आत्मानमेव नयसि
प्रापयसि तत्ततः तत्पदांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथं तन्नाम व्यथेतेति भवा

यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु तेनाटवीमटसि तद्व्यथते न
किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः १९ इतिश्रीभागवते दशमे एकत्रिंशः ३१ सुकउ॰
इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा रुरुदुः सुस्वरं राजन्कृष्णदर्शनलालसाः १

नैवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति १९ इतिश्रीभावार्थदीपिकायां दशमे टि॰ ३१ द्वात्रिंशे॰
विरहालापविक्लिन्नहृदयो हरिः तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् स्वप्रेमामृतकल्लोलविह्वली
कृतचेतसः स्मरयन्नदयन् गोपीहृत्तो नन्दनन्दनः इति गोप्य इति इत्येवं प्रभृति चित्रधा अनेकधा सुस्वरं
मुक्तैः कृष्णदर्शने लालसा अतिस्पृहा यासां ताः १

श्री० भा० द० पू० १३३
133

साक्षान्मन्मथमन्मथः जगन्मोहनस्य कामस्यापिमनस्युद्भूतःकामःसाक्षात्तस्यापिमोहकः इत्यर्थः त
न्वःकरचरणादयः ३ अंजलिनासंहतहस्तद्वयेन ४ ५ भ्रुकुटिमाबध्यकुटिलीकृत्य प्रेमसंरंभेणप्र

तासामाविरभूच्छौरिःस्मयमानमुखांबुजः पीतांबरधरःस्रग्वीसाक्षान्मन्मथमन्मथः २ तंवि
लोक्यागतंप्रेष्ठंप्रीत्युत्फुल्लदृशोबलाः उत्तस्थुर्युगपत्सर्वास्तन्वःप्राणमिवागतं ३ काचित्करां
बुजंशौरेर्जगृहेंजलिनामुदा काचिद्दधारतद्बाहुमंसेचंदनभूषितं ४ काचिदंजलिनागृह्णा
त्तन्वीतांबूलचर्वितं एकातदंघ्रिकमलंसंतप्तास्तनयोरधात् ५ एकाभ्रुकुटिमाबध्यप्रेमसंरंभ
विह्वला घ्नतीवैक्षत्कटाक्षेपैःसंदष्टदशनच्छदा ६ अपरानिमिषद्दृग्भ्यांजुषाणातन्मुखां
बुजं आपीतमपिनातृप्यत्संतस्तच्चरणंयथा ७ तंकाचिन्नेत्ररंध्रेणहृदिकृत्वानिमील्यच पु
लकांग्युपगुह्यास्तेयोगीवानंदसंप्लुतः ८

८

णयकोपावेशेनविह्वलाविवशादष्टाधरोष्ठा कटाःकटाक्षाःतैर्येआक्षेपाःपरिभवास्तैस्ताडयंतीवैक्षत ६
अनिमिषंतीभ्यांदृग्भ्यामापीतमपिसम्यग्दृष्टमपिपुनःपुनर्जुषाणानातृप्यत् ७ हृदिकृत्वाहृदयंनीत्वेत्यर्थः १३३

133A

प्राप्तमीश्वरं प्राप्य यथा मुमुक्षवो जनाः तापं संसारजं तापं यद्वा प्राज्ञं ब्रह्मतत्त्वं प्राप्य यथा संसारिणः यद्वा प्रा
ज्ञं सौषुप्तं प्राप्य यथा विस्मृततैजसावस्था जीवा ९ पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा यद्वा उपासकः
पुरुषोत्तानवीर्यबलादिभिः यद्वा पुरुषोनन्तशायी अनन्तवंधी प्रकृत्याद्युपाधिभिर्वृतो यथा विरोचते तद्वत् १०

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ९ ता
भिर्विधूतशोकाभिर्भगवानच्युतो वृतः व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा १० ता
स्समादाय कालिंद्या निर्विश्य पुलिनं विभुः विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ११ शर
च्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं कृष्णाया हस्ततरलाचितकोमलवालुकं १२

विकसितकुंदमंदारैः सुरभिर्योनिलस्तस्मात् षट्पदा यस्मिन् ११ शरच्चंद्रांशूनां संदोहैः ध्वस्तं दोषातमः रा
त्रिगतं तमो यस्मिंस्तत् अतः शिवं सुखकरं कृष्णाया हस्तरूपैस्तरलैस्तरंगै रंजिता आस्तृता रचिता कोमला वालुका
यस्मिन् एवंभूते पुलिने ताः समादाय निर्विश्य तत्र ताभिर्वृतोधिकं व्यरोचतेति हर्षेणान्वयः १२

श्री· भा·द· ए· १३४ 134

ताश्चमनोरथानामंतंपयुः पूर्णकामावभूवुः श्रुतयोयथेति प्रथमर्थः यथाकर्मकांडेश्रुतयः परमेश्वरमा
पश्यंत्यस्तत्कर्मानुवेधेरपूर्णाइवभवंति ज्ञानकांडेतुपरमेश्वरंदृष्ट्वातस्संज्ञादपूर्णाः कामानुबंधंजहतितद्वत्
आसनकामाश्चपिप्रेम्णातमभजन्नित्यार्ह स्वैरितिअचीक्लृपन् रचयामासुः आत्मबंधवेतर्यामिणे १३ गोपी
सभागतस्ताभिः संमानितः सन् चकासशुशुभे त्रैलोक्येयालक्ष्मीः शोभातस्याएकपदंस्थानं तद्द

तद्दर्शनाह्लादविधूतहृद्रुजोमनोरथांतंश्रुतयोयथाययुः स्वैरुत्तरीयैःकुचकुंकुमांकितैरची
क्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टोभगवान्सईश्वरोयोगीश्वरांतर्हृदिकल्पितासनः चका
सगोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदंवपुर्दधत् १४ सभाजयित्वातमनंगदीपनंसहासली
लेक्षणविभ्रमभ्रुवासंस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्यईषत्कुपिताबभाषिरे १५ गोप्यऊचुः भ
जतोनुभजंत्येकएकएतद्विपर्ययं नोभयांश्चभजंत्येकएतन्नोब्रूहिसाधुभोः १६

पुर्दधत्दर्शयन् १४ सहासलीलेक्षणेनविभ्रमोविलासोयस्यांतयाभ्रुवाउपलक्षिताः संस्पर्शनेनसंमर्दनेन
१५ ततोभगवतोहृतत्ततांतद्वचनेनैवापादयितुकामाः श्लाघ्याभिप्रायालोकदृष्टांतमिवपृच्छंति भजत
इतिभजतःप्राणिनःअनुअनंतरंकेचिज्जनाअनुसारेणभजंतिकेचिदेतद्विपर्ययंयथाभवति तथातः १३४
उभजनानुपेक्ष्यमभजतोपिभजंतिअन्येतुनोभयानिति १६

134A

विदिताभिप्रायउत्तरमाह मिथइति हेसख्यः उपकारमत्युपकारतयायेमिथोभजंति तेन्यंनभजंति किंतु
त्मानमेव कुतः हियस्मात्स्वार्थएवैकांतेतउद्यमोयेषांते तत्रचनसौहृदंअतोनस्वधर्मोस्त्यष्टौहृशाङ्गामि
द्धिष्यादिभजनवदित्यर्थः १७ येतत्प्रभजन्तोभजंतितेद्विविधाः करुणाःस्निग्धाश्च तत्रकरुणानामधर्मका

श्रीभगवानुवाच मिथोभजंतियेसख्यःस्वार्थैकांतोद्यमाहिते नतत्रसौहृदंधर्मःस्वा
र्थार्थंतद्धिनान्यथा १७ भजंत्यभजतोयेवैकरुणाःपितरोयथा धर्मोनिरपवादो
त्रसौहृदंचसुमध्यमाः १८ भजतोपिनवैकेचिद्भजंत्यःभजतःकुतः आत्मारा
मात्याप्तकामाअकृतज्ञागुरुद्रुहः १९

मौभवतइत्याह भजंत्यभजतइति १८ तृतीयप्रश्नस्योत्तरं भजतोपीति अयमर्थः तेचतुर्विधाःएकेआत्मारा
माःअप्रपंचदृशः केचिदाप्तकामाःविषयदर्शनेपिएणकामत्वेनभोगेच्छारहिताःअन्येअकृतज्ञाःसंपूर्णाः
अन्येतुगुरुद्रुहःअतिकठिनाःसपितायस्त्वपोषकइतिन्यायाउपकर्तारमपिसन्तैतस्मैद्रुह्यंतीति तद्याते १९

155

श्री॰ अत्रचरमकोटिगतमात्मानंमत्वाअतिसंकोचैः परस्परंगूढस्मितमुखीस्तादृष्ट्वाह नाहंत्विति हेसख्यः
अहंतेषांमध्येनकोपिकिंतुपरमकारुणिकः परमसुहृच्च कथममीषांभजतामनुवृत्तिवृत्तयेनिरंतरं
भा॰द॰ तद्ध्यानप्रवृत्त्यर्थंतान्नभजामि एतत्सदृष्टांतमाह यथेति तस्यधनस्यैवचिंतयानिभृतः पूर्णोव्याप्तइ
इ॰ तियावत् अन्यत्क्षुत्पिपासाद्यपिनवेद २॰ एवंमदर्थोज्झितलोकवेदस्वानांमदर्थंउज्झिताः लोकाः
१३५
135

नाहंतुसख्योभजतोपिजंतून्भजाम्यमीषामनुवृत्तिवृत्तये यथाधनोलब्धधनेविनष्टे
तच्चिंतयान्यन्निभृतोनवेद २॰ एवंमदर्थोज्झितलोकवेदस्वानांहिवोमय्यनुवृत्तये
बलाः मयापरोक्षंभजतातिरोहितंमासूयितुंमार्हथतत्प्रियंप्रियाः २१

युक्तायुक्तप्रतीतत्यागात् वेदाः स्वधर्माः धर्माप्रतीतत्यागात् स्वाः ज्ञातयस्नेहत्यागात् याभिस्ताभ्यांवोयुष्मा
कंपरोक्षमदर्शनेयथाभवति तथाभजतायुष्मत्प्रेमालापान्शृण्वतैवतिरोहितंअंतर्धानेनस्थितं तत्त
स्मात् हेअबलाः हेप्रियाः मामांअसूयितुंदोषारोपेणद्रष्टुं यूयंमार्हथनयोग्याःस्थ २१ १३५

135A

आत्मानमिदंपरमार्थतःश्रृणुतेत्याह नेति निरवद्यसंयुजां निरवद्यासंयुक् संयोगोयासांतासांवः विबुधायु
षापिचिरकालेनापिस्वीयंसाधुकृत्यंप्रत्युपकारंकर्तुंनपारयेनशक्नोमि कथंभूतानां याभवंत्योदुर्जराग्रजराः
याग्रहशृंखलाःताः संवृश्च्यनिःशेषंछित्वा मामामभजंन् तासांमत्त्वितंवद्बहुप्रेमयुक्ततयानेकनिष्ठत्वस्मा-
द्योयुष्माकमेवसाधुनामासाधुकृत्येनततः युष्मत्साधुकृत्यंप्रतिकृत्यंभवतु युष्मत्सौशील्येनैव ममानृण्येनतु

यातुप्रति

नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यंविबुधायुषापिवः यामाभजन्दुर्जरगेहशृंखलांसंवृश्च्यतद्वः
प्रतियातुसाधुना २२ इतिश्रीभागवतेदशमेद्वात्रिंशः ३२ श्रीशुक उ° इत्थंभगवतोगोप्यःश्रुत्वा
वाचःसुपेशलाः जहुर्विरहजंतापंतदंगोपचिताशिषः १ तत्रारभतगोविंदोरासक्रीडामनुव्रतैः
स्त्रीरत्नैरन्वितःप्रीतैरन्योन्याबद्धबाहुभिः २

मत्कृतप्रत्युपकारेणेत्यर्थः २२ इतिश्रीभावार्थेदशमेद्वात्रिंशः ३२ त्रयस्त्रिंशेततोगोपीमंडलेमध्यगोहरिः
प्रियाभिस्तारमयामासक्रीडिनीवनकेलिभिः ततदा श्रंगाहेराजन् यदातस्यभगवतोंगेनवपुषाकरचरणाद्यव
यवैर्वाउपचिताःसमृद्धा आशिषोयासांताः १ रासक्रीडांरासोनामबहुनर्तकीयुक्तोनृत्यविशेषः तांक्रीडां
अन्योन्यमाबद्धाःसंग्रथितावाहवोयैस्तैःसह २

श्री॰ भा॰ द॰ सू॰ १२९ 136

तत्साहित्यमभिप्रायेणादर्शयति रासोत्सवइत्यध्यर्धचतुष्टयाधिक्येनसार्धेन तासांमंडलरूपेणावस्थितानां
द्वयोर्द्वयोर्मध्ये प्रविष्टेनतेनैव कंठेगृहीतानामुभयतआलिंगितानां कथंभूतेन यंसर्वाःस्त्रियःस्वस्वनि
कटंमामेवाश्लिष्टवानितिमन्येरन् तेनतदर्थंद्वयोर्मध्येप्रविष्टेनेत्यर्थः नन्वेकस्यकथंतथाप्रवेशःसर्व

रासोत्सवःसंप्रवृत्तोगोपीमंडलमंडितः योगेश्वरेणकृष्णेनतासांमध्येद्वयोर्द्वयोः प्रविष्टेनगृ
हीतानांकंठेस्वनिकटंस्त्रियः ३ यंमन्येरन्नभस्तावद्विमानशतसंकुलं दिवौकसांसदाराणा
मोत्सुक्यापहृतात्मनां ४ ततोदुंदुभयोनेदुर्निपेतुःपुष्पवृष्टयः जगुर्गंधर्वपतयःसस्त्रीका
स्तद्यशोमलं ५ वलयानांनूपुराणांकिंकिणीनांचयोषितां सप्रियाणामभूच्छब्दस्तुमुलोरा
समंडले ६

सन्निहितत्वंवाकृतःस्वैकनिकटत्वाभिमानस्तासामित्यतउक्तं योगेश्वरेणेतिअचिंत्यशक्तिनेत्यर्थः ३ ताव
त्तत्क्षणमेवऔत्सुक्यव्याप्तमनसांसस्त्रीकानांदेवानांविमानशतैःसंकीर्णंनभोबभूव ४ ५ सप्रिया
णांकृष्णसहितानांतुमुलःसंकीर्णः ६ १२९

136A

महामरकतो नीलमणिरिव हैमानां मणीनां मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीरूपाभिः
प्रायेणविनैवमृध्यपदावृत्तिमेकवचनं ७ स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह पादन्यासै
रिति भुजविधुतिभिः करचालनैर्भज्यमानैर्मध्यैः चलद्भिः कुचेषु पटैरुत्तरीयवस्त्रैः गंडलोलैः गंडेषु क
पोलेषु लोलैश्चंचलैः कुंडलैः स्विद्यन्मुखः स्विद्यंति स्वेदयुक्तानि मुखानि यासां ताः कवरेषु रशना सूत्रयं

तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः मध्ये मणीनां हैमानां महामरकतो यथा ७ पा
दन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः स्वि
द्यन्मुख्यः कवररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः ८ उच्चैर्ज
गुर्नृत्यमाना रक्तकंठ्यो रतिप्रिया कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ९

ग्रंथयो यासां ताः यद्वा ते च ताः सवाः ग्रंथयः शिथिलग्रंथयः इत्यर्थः तत्र नानामूर्तिः श्रीकृष्णो मेघचक्रमि
व तास्तु बहुविधास्तडित इव स्वेदस्तु धारा इव गीतं गर्जितमिव चेति यथासंभवमूह्यं ८ नृत्यमाना नृत्यंत्यः
रक्तकंठाः नानारागैरनुरंजितकंठाः कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः इदं विश्वं ९

श्री० भा०र० पु० १३० 137

मुकुंदेनसह स्वरजातीः षड्जादिस्वरालापगतीः रमिश्रिताः कृस्तोन्नीताभिरसंकीर्णाः श्रीघमालेनसंमा
नितानजास्तत्रनयनमेव ध्रुवंध्रुवाख्यतालविशेषंकृतोन्निस्येउन्नीतभवती १० एवंनृत्यगीतादिनाश्रीकृष्णसं तस्यैवमानंबकृपानदर्
मानितानांतासामतिप्रीतिविलसितंहृत्रमाह काचिदिति श्लथंतिशिथिलीभावंप्राप्तानिवलयानिमल्लि

काचित्समंमुकुंदेनस्वरजातीरमिश्रिता उन्निन्येहरिजितातेनश्रीघतासाधुसाधिति तदेवध्रुवमुन्नि
न्येतस्यैमानंचवकृदात १० काचिद्रासपरिश्रांतापार्श्वस्थस्यगदाभृतः जग्राहवाहुनास्कंधं
श्लथद्वलयमल्लिका ११ तत्रैकांसगतंवाहुंकृष्णस्योत्पलसौरभं चंदनालिप्तमाघ्रायहृष्टरोमा
चुचुंवह १२ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषिमंडितं गंडंगंडेसंदधत्याअदात्ताम्बूलचर्वितं
१३ नृत्यंतीगायतीकाचित्कूजन्नूपुरमेखला पार्श्वस्थाच्युतहस्ताब्जंश्रांताधात्स्तनयोःशिवं १४

कास्त्रयस्याःसा ११ उत्पलस्यसौरभमिवसौरभंयस्यतंवाहुं १२ नाट्येनन्टत्येनविक्षिप्तयोश्चंचलयोःकुं
डलयोस्त्विषिःप्रभा तयामंडितंगंडकपोलंतथाभूतेस्वगंडेसंदधत्याःसंयोजयंत्याःताम्बूलचर्वितंचुंवे १३०
वतत १३ कूजंतीनूपुरेमेखलाचयस्याःसा १४

137A

एवमन्याश्चपिगोप्योयथायथंनानाविभ्रमैर्विजह्रुरित्याह गोप्यइति १५ तत्रवाद्यकेषुगायकेषुचसखीके
षुगंधर्वकिन्नरादिषुरसावेशेनमुक्तस्वनृत्यत्तद्वचान्यामेववाद्यादिसंपत्तिंदर्शयन् रासंसंभ्रममाह कर्णो
त्पलेति कर्णोत्पलेश्च अलकविटंकैरलकालंकृतैः कपोलेश्चघर्मैश्चवक्त्रेषुश्रीः शोभायासांताः चोद्यः किं
किणयः वलयनूपुरघोषैर्वाद्यैर्वादित्रैः स्वकेशेभ्यः स्रस्ताः स्रजोयासांताः एतेनतालगतिसंतुष्टाः केशाः

गोप्योलब्ध्वाच्युतंकांतंश्रियएकांतवल्लभं गृहीतकंठ्यस्तद्दोर्भ्यांगायंत्यस्तंविजह्रिरे १५ कर्णोत्प
लालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैः गोप्यः समंभगवतानन्नृतुः स्वकेश
स्रस्तस्रजोभ्रमरगायकरासगोष्ठ्यां १६ एवंपरिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः २
रेमेरमेशोव्रजसुंदरीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः

देवाःसखिरःकमलंपादेषुपुष्पवृष्टिमिवाजह्रुर्वन्नि

सत्येतितंभगवतासहनन्नृतुः कुभ्रमरापवगायकायस्यांरासक्रीडासभायां १६ यथागोप्योनानाविभ्रमैर्भ
गवतासहविजह्रुः एवंभगवानपिस्वविलासैस्ताभिः सहरेमइत्याह एवमिति तद्विलासानभिभूतस्यैवरतो
द्दृष्टांतः यथार्भकइति स्वप्रतिबिंबैर्विभ्रमैः क्रीडायस्यसइव अनेनैतद्दर्शितंस्वीयमेवसर्वकलाकोशलं।
सौगंध्यलावण्यमाधुर्यादिषुतासुसंचार्यताभिः सहरेमेयथार्भकः स्वप्रतिबिंबैरितिवा १७

टी

श्री॰ भा॰ द॰ ए॰ १३८ 138

तास्तु भगवद्विलासे राजलाबभूवुरित्याह तदंगेति तस्यांगसंगे नष्टकृष्टमतीतिस्तयाः कुलान्यवशानी
द्रियाणि सोतास्ता विघ्रयबंधनान्केशादीन् अंजसा प्रतिस्कृतं यथा एवं वंधने नालं न समर्था वभूवुः विस्रस्त
मालाआभरणानि च यासां ताः १८ नकेवलं ता एवाकुलेंद्रियाः किं तु देव्योपीत्याह कृष्णविक्रीडितमिति
किंच शशांकश्चेति अनेनैतत्सूचितं शशांकेन विस्मितेन गतो विस्मृतायो ततः प्राक्तनास्सर्वे पि ग्रहाः

तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां च नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्र टी
स्तमालाभरणाकुरूद्वह १८ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः कामार्दिताः शशां
मूल कश्च सगणो विस्मितो भवत् १९ कृत्वा तावंतमात्मानं यावतीर्व्रजयोषितः रेमे स भगवांस्ताभि
रात्मारामोपि लीलया २० तासामतिविहारेण श्रांतानां वदनानि सः प्रामृजत्करुणः प्रेम्णा

तत्र तत्रैव तस्थुः ततस्मातिदीर्घा सा रात्रि अभवत् यथा सर्वं विजह्रुरिति १९ ॥ शंतमेनांगपाणिना २१
किंच कृत्वेति अयं भावः कात्यायनि महामाये महायोगिन्यधीश्वरि नंदगोपसुतं देवि पतिं मे कुरु ते नम
इत्येवं प्रत्येकं ताभिः प्रार्थनात् भगवतापि याताः बला व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति तथैव प्रतिश्रु
त्य तावंतमात्मानं कृत्वा रेमे इति यावतीः यावंतः २० कृपातिशयमाह तासामिति २१ १३८

138A

ततोतिहृष्टानांगोपीनांचरितमाह गोप्यइति स्फुरतांस्वर्णकुंडलानांकुंतलानांचत्विषागंडेषुयाश्रीस्तयासु
धितेनामृतायितेनहासेनसहितेननिरीक्षणेनच ऋषभस्यपत्युःकृष्णस्यमानंदधत्यःपूजांकुर्वत्यःतत्कर्माणि
जगुः तत्कररुहैर्नखैःस्पर्शेनप्रमोदोयासांताः २२ अथजलकेलिमाह ताभिरिति तासामंगसंगेनघृ

गोप्यःस्फुरत्पुरटकुंडलकुंतलत्विङ्गंडश्रियासुधितहासनिरीक्षणेन मानंदधत्यऋषभस्यजगुः
कृतानिपुण्यानितत्कररुहस्पर्शनप्रमोदाः २२ ताभिर्युतःश्रममपोहितुमंगसंगघृष्टस्रजःसकुच ग
कुंकुमरंजितायाः गंधर्वपालिभिरनुद्रुतआविशद्वाः श्रांतोगजीभिरिभराडिवभिन्नसेतुः २३
सोम्भस्यलंयुवतिभिःपरिषिच्यमानःप्रेम्णेक्षितःप्रहसतीभिरितस्ततोंगवैमानिकैःकुसुमवर्षि
भिरीड्यमानोरेमेस्वयंस्वरतिरत्रगजेंद्रलीलः २४ श्रीरामायनमोनमः

ष्टासंमर्दितायाःस्रक्तस्याः अतएवतासांकुचकुंकुमेनरंजितायाःसंबन्धिभिर्गंधर्वपालिभिः गंधर्वपाःगंधर्व
पतयइवगायंतोयेःलयस्तैरनुद्रुतः अनुगतःसन्कृष्णःवाःउदकंआविशत् भिन्नसेतुःविदारितवप्रःस्वयं
वातिक्रांतलोवेदमर्यादः २३ स्वरतिःआत्मारामोपि अत्रगोपीमंडले अंभसिवा स्थलजलक्रीडेदर्शिते २४
वै

वनक्रीडांदर्शयति ततश्चेति यमुनायाउपवनेजलस्थलप्रसूनानांगंधोयस्मिन् तेनानिलेनजुष्टानिदिशांत
श्री॰ टानिश्रितायस्मिन् यद्वा दिशश्चतटंचस्थलंचयस्मिंस्तस्मिन् वनेभृंगाणांप्रमदानांचगणैराहूतः २५ रासक्री
भा॰द॰ डांनिगमयतिएवमिति सत्यकामःसत्यसंकल्पःअनुरागिस्त्रीकदंबस्थः एवंसर्वाःनिशाःसेवितवान् शारत्का
ए॰
१३९
139

ततश्चकृष्णोपवनेजलस्थलप्रसूनगंधानिलजुष्टदिक्तटे चचारभृंगप्रमदागणावृतोयथामदच्यु
द्द्विरदःकरेणुभिः २५ एवंशशांकांशुविराजितानिशाः ससत्यकामोनुरतावलागणः सिषेव
आत्मन्यवरुद्धसौरतःसर्वाःशरत्काव्यकथारसाश्रयाः २६ राजोवाच संस्थापनायधर्मस्यप्र
शमायेतरस्यच अवतीर्णोहिभगवानंशेनजगदीश्वरः २७

व्यकथारसाश्रयाः शारदिभवाःकाव्येषुकथ्यमानायेरसास्तेषामाश्रयभूतानिशाः यद्वा निशाइतिद्विती
यात्स्वतसंयोगे शृंगाररसाश्रयाःशारदिप्रसिद्धाःकाव्येषयाःकथास्ताःसिषेवेइति एवमप्यात्मन्येवावरु १३९
द्धःसौरतःचरमदातुर्नतुस्खलितोयस्येतिकामजयोक्तिः २६ २७
धा

139A

म

प्रतीपंप्रतिकूलंअधर्ममित्यर्थः आचरत्कृतवान् नचेदमधर्ममात्रंकलंजभक्षणादिवत् किंतुमहाह
तमित्याह परदाराभिमर्शनमिति २८ आप्तकामस्यनायमधर्मइतिचेत् यद्येवंकामाभावात्त्रिन्दितंकेना
भिप्रायेणकृतवानितिपृच्छति आप्तकामइति २९ परमेश्वरेकैमुत्यन्यायेनपरिहर्तुंसामान्यतोमहतांवृत्तमाह
धर्मव्यतिक्रमइति साहसंचरष्टंप्रजापतीन्द्रसोमविश्वामित्रादीनां तच्चतेषांतेजस्विनांदोषायनभवतीति

सकथंधर्मसेतूनांवक्ताकर्ताभिरक्षिता प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं २८ आप्तकामोय
दुपतिःकृतवान्वैजुगुप्सितं किमभिप्रायएतन्नःसंशयंछिंधिसुव्रत २९ श्रीशुकउ० धर्मव्यतिक्र
मोदृष्टईश्वराणांचसाहसं तेजीयसांनदोषायवह्नेःसर्वभुजोयथा ३० नैतत्समाचरेज्जातुमन
सापिह्यनीश्वरः विनश्यत्याचरन्मौढ्याद्यथारुद्रोब्धिजंविषं ३१ ईश्वराणांवचःसत्यंतथैवाचरि
तंक्वचित् तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत् ३२ ॥

३० तर्हियद्यदाचरतिश्रेष्ठइतिन्यायेना
न्योपिएवंकुर्यादित्याशंक्याह नैतदिति अनीश्वरोदेहादिपरतंत्रः यथारुद्रव्यतिरिक्तोविषंजुषन्भक्ष
यन्विनश्यत्येव ३१ कथंतर्हिसदाचारस्यप्रामाण्यमः तत्राह ईश्वराणामिति तेषांवचःसत्यमतस्तदुक्त
माचरेदेव आचरितंतुक्वचित्सत्यं अतःस्ववचोयुक्तं तेषांस्ववचसायदुक्तंअविरुद्धमाचरितंतत्तदेवा

वनक्रीडांदर्शयति ततश्चेति यमुनायाउपवनेजलस्थलप्रसूनानांगंधोयस्मिन् तेनानिलेनजुष्टानिदिशांत
श्री· टानितंतायस्मिन् यद्वा दिशस्तटंचस्थलंचयस्मिंस्तस्मिन् वनेभृंगानांप्रमदानांचगणैरावृतः २५ रासक्री
भा·द· डांनिगमयतिएवमिति सकृष्णःसत्यसंकल्पःअनुरागिस्त्रीकदंबस्थः एवंसर्वाःनिशासेवितवान् शरत्का
ए·
१३९
139

ततश्चकृष्णोपवनेजलस्थलप्रसूनगंधानिलजुष्टदिक्तटे चचारभृंगप्रमदागणावृतोयथामदच्यु
द्विरदःकरेणुभिः २५ एवंशशांकांशुविराजितानिशाः ससत्यकामोनुरताबलागणः सिषेव
आत्मन्यवरुद्धसौरतःसर्वाःशरत्काव्यकथारसाश्रयाः २६ राजोवाच संस्थापनायधर्मस्यप्र
शमायेतरस्यच अवतीर्णोहिभगवानंशेनजगदीश्वरः २७

व्यकथारसाश्रयाः शरदिभवाःकाव्येषुकथ्यमानायेरसास्तेषामाश्रयभूतानिशाः यद्वा निशाइतिद्विती
यात्यंतसंयोगे शृंगाररसाश्रयाःशरदिप्रसिद्धाःकाव्येषयाःकथास्ताःसिषेवेइति एवमप्यात्मन्येवावरु १२९
द्धःसौरतःचरमदातुर्नतुस्खलितोयस्येतिकाजयोक्तिः २६ २७
धा

139A

प्रतीपंप्रतिकूलंअधर्ममित्यर्थः आचरत्कृतवान् नचेदमधर्ममात्रंकलंजभक्षणादिवत् किंतुमहाहा
समित्याह परदाराभिमर्शनमिति २८ आप्तकामस्यनायमधर्मइतिचेत् यद्येवंकामाभावस्तर्हिनिन्दितंकेना
भिप्रायेणकृतवानितिपृच्छति आप्तकामइति २९ परमेश्वरेकैमुत्यन्यायेनपरिहर्तुंसामान्यतोमहतांवृत्त माह
धर्मव्यतिक्रमइति साहसंचदृष्टंप्रजापतीन्द्रसोमविश्वामित्रादीनां तच्चतेषांतेजस्विनांदोषायनभवतीति

सकथंधर्मसेतूनांवक्ताकर्ताभिरक्षिता प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं २८ आप्तकामोय
दुपतिःकृतवान्वैजुगुप्सितं किमभिप्रायएतन्नःसंशयंछिन्धिसुव्रत २९ श्रीशुकउ॰ धर्मव्यतिक्र
मोदृष्टईश्वराणांचसाहसं तेजीयसांनदोषायवह्नेःसर्वभुजोयथा ३० नैतत्समाचरेज्जातुमन
सापिह्यनीश्वरः विनश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजंविषं ३१ ईश्वराणांवचःसत्यंतथैवाचरि
तंक्वचित् तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत् ३२

३० तर्हियद्यदाचरतिश्रेष्ठइतिन्यायेना
न्योपिएवंकुर्यादित्याशंक्याह नैतदिति अनीश्वरोदेहादिपरतंत्रः यथारुद्रव्यतिरिक्तोविषंजुषन्भक्ष
यन्विनश्यत्येव ३१ कथंतर्हिसदाचारस्यप्रामाण्यम्ः अतआह ईश्वराणामिति तेषांवचःसत्यंअतस्तदुक्त
माचरेदेव आचरितंतुक्वचित्तस्य अतःस्ववचोयुक्तं तेषांस्ववचसायद्युक्तंअविरुद्धमाचरितंतत्तदेवा

श्री·
भा·द·
पू·
१४·
140

ननुतर्हितेपिकिमेवंसाहसमाचरंतितत्राह कुशलेति प्रारब्धकर्मक्षपणमात्रमेवतेषांकृत्यंनान्य
दित्यर्थः ३३ प्रस्तुतमाह किमुतेति कुशलाकुशलान्वयोनविद्यतइतिकिंपुनर्वक्तव्यमित्यर्थः ३४
एतदेवस्फुटीकरोति यस्यपादपंकजपरागस्यनिषेवणेनतृप्ताः यद्वा यस्यपादपंकजपरागनिषेवा

कुशलाचरितेनैषामिहस्वार्थोनविद्यते विपर्ययेणवानर्थोनिरहंकारिणांप्रभो ३३ कि
मुताखिलसत्वानांतिर्यङ्मर्त्यदिवौकसां ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ३४ य
त्पादपंकजपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबंधाः स्वैरंचरंतिमुनयोपिनह्यमाना न॥
स्तस्येच्छयात्तवपुषःकुतएवबंधः ३५ गोपीनांतत्पतीनांचसर्वेषामेवदेहिनां योंतश्चरति
॥ सोध्यक्षःक्रीडनेनेहदेहभाक् ३६

येषांतेतथातेचतेतृप्ताश्चेतिभक्ताइत्यर्थः तथाज्ञानिन
श्चनह्यमानाः बंधनेनप्राप्नुवंतः परदारत्वंगोपीनामंगीकृत्यपरिहरति ३५ इदानींभगवतःसर्वां
तर्यामिणःपरदारसेवानामनकाचिदित्याह गोपीनामिति योंतश्चरति अध्यक्षोबुद्ध्यादिसाक्षी
सएवक्रीडनेनेहदेहभाक् नतस्मदादितुल्यः येनदोषःस्यादिति ३६ १४·

140A

नन्वेवं चेद्रामकामस्य निंदितेक्तु ततः प्रवृत्तिरित्यत आह अनुग्रहायेति शृंगाररसाकृष्टचेतसोऽतिबहिर्मु
खानपि स्वपरान्कर्तुमिति भावः ३७ नन्वन्येपि भिन्नाचारा स्वचेष्टितमेवेति वदंति तत्राह नासूयन्निति एवं
भूते स्वर्पाभावे तथाकुर्वतः पापात्रेया इति भावः ३८ ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ३९ भगवतः
कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह विक्रीडितमिति अचिरेण धीरः सन् हृद्रो

अनुग्रहाय भक्तानां मानुषं देहमास्थितः भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ३७ ना
सूयन्खलु कृष्णाय मोहितास्तस्य मायया मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३८
ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः अनिच्छंत्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ३९ वि
क्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद्यः भक्तिं परां भगवति प्रति
लभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ४० इति श्रीभागवते दशमे त्रयस्त्रिंशोऽध्यायः ३३

गं काममाश्वपहिनोति परित्यजतीति सेयं श्रीपरमानंदसेविश्रीधरनिर्मिता श्रीभागवतभावार्थदी
पिका दशमाश्रया ४० इति श्रीभावार्थे दशमे त्रयस्त्रिंशः ३३ चतुस्त्रिंशे हि नागस्तनंदं हरिरमूमुचत् वि
द्याधरं च गिरः शापाच्छंखचूडं तथावधीत् रासापदेशतः कामं किंकरीकृत्य कामतः अनन्यशरणान्वंशं नि

श्री० भा० द० पू० ।३४।

तदेवंकामाग्रहहृत्त्वेनकामजयंप्रतिपाद्य तथैवविद्याधरजयंप्रतिपादयितुंतत्प्रसंगंदर्शयति ए
कदेति १२ गावःगाः मधुमधुरेमधुत्रेमधुनासहितमन्नं देवःशिवः ३ जलमात्रंप्राश्यउपोषिताः तां

श्रीशुकउ० एकदादेवयात्रायांगोपालाजातकौतुकाः अनोभिरनडुद्युक्तैःप्रययुस्तेंविकावनं १
तत्रस्नात्वासरस्वत्यांदेवंपशुपतिंविभुं आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेंविकां २ गावोहिर
ण्यंवासांसिमधुमधन्नमादृताः ब्राह्मणेभ्योददुःसर्वेदेवोनःप्रीयतामिति ३ ऊषुःसरस्वती
तीरेजलंप्राश्ययधृतव्रताः रजनींतांमहाभागानंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन्वि
पिनेतिबुभुक्षितः यदृच्छयागतोनंदंशयानमुरगोग्रसीत् ५ सचुक्रोशाहिनाग्रस्तःकृष्णक
ृष्णमहानयं सर्पोमांग्रसतेतातप्रपन्नंपरिमोचय ६ तस्यचाक्रंदितंश्रुत्वागोपालाःसह
सोत्थिताः ग्रस्तंचदृष्ट्वाविभ्रांताःसर्पंविव्यधुरुल्मुकैः ७ अलातैर्दह्यमानोपिनामुंचत्तमु
रंगमः तमस्पृशत्पदाभ्येत्यभगवान्सात्वतांपतिः ८

निशांतत्रऊषुरन्ववसन् ४ महानहिरजगरः उरगः उरसागच्छतीतिसलत्तितत्वसकमंग्रसीत् ज
ग्रास ५ ६ विव्यधुस्ताडयामासुरुल्मुकैर्ज्वलितकाष्ठैः ७ अलातैस्तैरेवउल्मुकैः ८ ।३४।

141A विद्याधरेष्वर्चितंपूजितं ९ गोपेष्वात्मनऐश्वर्यंप्रकाशयितुमविद्वानिवतमपृच्छत् दीप्यमानेनवपुषा
समवस्थितं १० यःपरयाशोभयाप्रकाशतेसभवान्कइति ११ १२ प्राहसंउपहसितवानस्मिप्रलब्धैरु

सवैभगवतःश्रीमत्पादस्पर्शहताशुभः भेजेसर्पवपुर्हित्वारूपंविद्याधरार्चितं ९ तमपृच्छद्धृषी
केशःप्रणतंसमवस्थितं दीप्यमानेनवपुषापुरुषंहेममालिनं १० कोभवान्परयालक्ष्म्यारोचते
द्भुतदर्शनः कथंजुगुप्सितामेतांगतिंवाप्रापितोवशः ११ सर्पउवाच अहंविद्याधरःकश्चित्सु
दर्शनइतिश्रुतः श्रियास्वरूपसंपत्त्याविमानेनाचरन्दिशः १२ ऋषीन्विरूपानंगिरसःप्राहसंरूप
दर्पितः तैरिमांप्रापितोयोनिंप्रलब्धैःस्वेनपाप्मना शापोमेनुग्रहायैवकृतस्तैःकरुणात्मभिः य
दहंलोकगुरुणापादस्पृष्टोहताशुभः १४ तंत्वाहंभवभीतानांप्रपन्नानांभयापहं आपृच्छेशाप
निर्मुक्तःपादस्पर्शादमीवहन् १५ प्रपन्नोस्मिमहायोगिन्महापुरुषसत्पते अनुजानीहिमांदेवस
र्वलोकेश्वरेश्वर १६

पहसितैर्मदीयेनैवपापेननिमित्तेन १३ यद्यतःशापात् लोकगुरुणात्रैलोक्यनाथेन १४ आपृच्छेसं
लोकंगंतुमनुज्ञांयाचे अमीवहन्दुःखनाशक १५ १६

श्री॰ भा॰ द॰ ए॰ १४२ 142

१० १९ अहिर्दिदृंहंनिहतस्सैवंप्राउत्सन्नंसुदर्शनं तद्वदुन्मादिनं कृष्णः शंखचूडमताडयत् तत्प्रसंगमाह
कदाचिदिति २० विरजौबराविति विरजसौ निर्मले अंबरे ययोस्तौ २१ किंच निशाप्रवेशसमत्क्रवैतौ
बहलदंष्ट्रादिमुक्तोहं सद्यस्तेद्भुतदर्शनात् यन्नाम गृह्णन्नखिलान्श्रोतॄनात्मानमेव च सद्यः
पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते १८ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य च सुदर्शनो
दिवं यातः कृच्छ्रान्नंदश्च मोचितः १८ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतस
स्ततः समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः १९ कदाचिदथ गोविंदो रा
मश्चाद्भुतविक्रमः विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां उपगीयमानौ ललितं स्त्रीजनैर्ब
द्धसौहृदैः स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ २१ निशामुखं मानयंतावुदितोडुपता
रकं मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना २२ जगतुः सर्वभूतानां मनःश्रवणमंगलं तौ कल्प
यंतौ युगपत्स्वरमंडलमूर्छितं
उदित उडुपस्तारकाश्च यस्मिन् तत् मल्लिकागंधेन मत्ता अलयो यस्मिं
स्तत् २२ अनिबद्धत्वादन्यैः युगपत्कल्पयितुमशक्यमपि तौ स्वरमंडलमूर्छितं युगपत्कल्पयंतौ मनःश्रव

142A मूर्छितास्तद्गीतलीनचित्ता स्रंसद्दुकूलं यस्मात्तमात्मानं देहं स्रस्ताः केशेभ्यः स्रजो यस्मात्तं च ता
नाविदन् २४ २५ निरीततोर्निरीहमाणयोः तौ नाथौ यस्य तं कालयामास अग्रतो चेरयामास २६ दस्युनाव्या

गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः २४ ए
वं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् २५ तयोर्नि
रीततो राजंस्तन्नाथं प्रमदाजनं क्रोशंतं कालयामास दिश्युदीच्यामशंकितः २६ क्रोशंतं कृ
ष्णरामेति विलोक्य स्वपरिग्रहं यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां २७ माभैष्टेत्यभयारा
वौ सालहस्तौ तरस्विनौ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं २८ स वीक्ष्य तावनुप्राप्तौ काल
मृत्यू इवोद्विजन् विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया २९ तमन्वधावद्गोविंदो यत्र यत्र
स धावति जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ३० अविदूर इवाभ्येत्य शिरस्तस्य दुरा
त्मनः जहार मुष्टिनैवांग सह चूडामणिं विभुः ३१

त्रेण २७ माभैष्ट भयं मा प्राप्नुवतेत्यभयवाचौ २८ ३० शिरसा सह चूडामणिं जहारेत्यर्थः ३१

नी १

श्री॰ ३२ इतिश्रीभागवतेचतस्त्रिंशः ३४ पंचत्रिंशेवनेयातेकृष्णेगोकुलयोषितः पूर्णश्लोकाभिगीतेनजग्मुस्ता
पमितीर्यते एवंरात्रिषुकृष्णेनस्वैरमितानांदिवातद्विरहितानामनुगीतेनप्रनिस्तारप्रकारमाह गोप्यइतिद्वः
भा॰ द॰ खेनकृष्णेण वामबाहुकृतवामकपोलइत्यादीनि द्वादशयुगलानीति १ हेगोप्यः वामबाहौतन्मूलेवाहु
टी॰ तोर्पितोवामकपोलोयेनसः वलितेनर्तितेभ्रुवौयेनसवल्गितभ्रुः मुकुंदः अधरेअर्पितवेणुंकोमलाभिरं
१४३ शंखचक्रांकनिहत्यैवंमणिमादायभास्वरं अग्रजायाददत्प्रीत्यापश्यंतीनांचयोषितां ३२ इतिश्रीभागवते
143
दशमेचतुस्त्रिंशः ३४ श्रीशुक उ॰ गोप्यःकृष्णेवनेयातेतमनुद्रुतचेतसः कृष्णलीलाःप्रगायंत्योनिन्युर्दुः
खेनवासरान् १ गोप्यऊचुः वामबाहुकृतवामकपोलोवल्गितभ्रुरधरार्पितवेणुंकोमलांगुलिभिरा
प्र श्रितमार्गंगोपीरयतियत्रमुकुंदः २ व्योमयानवनिताःसहसिद्धैर्विस्मितास्तदुपधार्यसलज्जाःकाममा
गंणसमर्पितचित्ताःकश्मलंययुरपस्मृतनीव्यः ३
गुलीभिराश्रितोमार्गःस्वरस्थछिद्राणियस्य
तं यत्रयदाईरयतिवादयति २ तदाव्योमयानानांसिद्धानांवनितासिद्धैःस्वपतिभिःसहवर्तमानाअपि तद्वे
णुरवमुपधार्याकर्ण्यप्रथमंविस्मितास्ततःकाममार्गणेभ्यःसमर्पितानिचित्तानियाभिस्ताःतस्यरवशाभवंति
स्मपश्चात्सलज्जाःसत्यःकश्मलंमोहंययुः अत्रलिंगं अपस्मृतानीव्योयाभिरिति अतएवंभूतस्यकृष्ण

सविरहंकंचयंमहात्मइतिसर्वत्रकाकोषः ३

१४३

143A

हंतेहेअबलाः इदंविचित्रंशृणुत हारहासः हारवद्विशदोहासोयस्य सः यद्वा वेणुवादेन अधोवदनेनह
सतोहारेषुस्फुरतहासोयस्य हारवद्धावतसिशोभमानो हासोयस्य सः यद्वा हाराणांहासइव विशदास्फू
र्तिर्यस्मिन् उरसिइति उरसिस्थिराविद्युदिवलक्ष्मीर्यस्य सः यर्हियदाकूजितवेणुर्नादितवेणुर्भवति ध तदा
अंजेयेवृषागावश्च वेणुवाद्येनहृतानिचेतांसियेषांते आरात् दूरात् दंतैर्दष्टाः कवलाग्रासायैः तेआस्थि

हंतचित्रमबलाः शृणुतेदंहारहासउरसिस्थिरविद्युत् नंदसूनुरयमार्तजनानां नर्मदोयर्हिकूजि
तवेणुः ५ वृंदशोव्रजवृषामृगगावोवेणुवाद्यहृतचेतस आरात् दंतदष्टकवलाधृतकर्णानिद्रि
तालिखितचित्रमिवासन् ५ बर्हिणः स्तवकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः कर्हिचित्सब
लआलिसगोपैर्गाःसमाह्वयतियत्रमुकुंदः ६ श्रीरामायनमोनमः

ताउत्तंविताः कर्णायैस्ते निद्रिताइव लिखितचित्रमिवचासन् अविद्वांतिरश्चामिदमतिचित्रमित्यर्थः ५
किंच अचेतनाश्च सरित्सुतदतीवचित्रमित्याहुः हेआलिसखि बर्हिणोमयूरस्यस्तवकामयूरपिच्छाः धातवो
गैरिकादयः पलाशानिपल्लवाश्च तैर्बद्धस्मासौमल्लानांपरिबर्हः परिकरस्तंविडंबयतिअनुकरोतिइति त
थ्यासुकंदोगोपैः सहवेणुनेनसपरितनेअत्रापिज्ञातव्य यत्रयदागाःसमाह्वयति ६

तस्य पा

श्री· भा·द· पू· १४४ 144

तर्हि तदा तत्त्वंशध्वनिश्रवणादनिलेनानीतं यस्य पदांबुजरजः स्पृहयंत्य इव भग्नगतयः सरितो वै निश्चि
तं वयमिव ता अल्पपुण्याः यतो न प्राप्नुवंति केवलं प्रेमणा वेपिताः कम्पिता भुजास्तरंगा यासां ताः
स्तिमिता निश्चला आपो यासां ताः गोप्योपि एवंविधक्रमसंपन्ना लोचनयोः स्तिमितजला भवंतीति ७
स्थावरेष्वपि विकारं दर्शयत इत्याहुः अनुचरैर्गोपैर्देवादिभिर्वा अगण्यानां वा कश्च आदिपुरुष इवेति अच०

तर्हि भग्नगतयः सरितो वै तत्पदांबुजरजोनिलनीतं स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपि
तभुजाः स्तिमितापः ७ अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः वनचरो
गिरितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ८ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य
इव पुष्पफलाढ्याः प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ९

लभूतिः निश्चललक्ष्मीः वेणुना तत्तन्नाम्नागानेन ८ तदा प्रणता भारेण विटपाः शाखा यासां ता वनग
ता लताः स्वस्मिन् विष्णुं प्रकाशमानं सूचयंत्य इव मधुधाराः प्रववृषुः स्मेति विस्मये तरवश्च तथा त
त्पतीनामपि तथैवानंद इति भावः एतानि विष्णुभक्तिलक्षणानि ९ ॥ १४४

किंच सरसिकमलवनेषुविहरंतंपक्षिणामपिमनआकर्षणंतनोतिकिंपुनरन्येषामित्याहुः दर्शनीयति
लकइति दर्शनीयतिलकोयस्यदर्शनीयानांसुंदराणांमध्येश्रेष्ठइतिवा वनमालास्थयादिव्यगंधातुल
सीतस्याःमधुनामत्तैरलिकुलैःअलघुउच्चैःअभीष्टमनुकूलंगीतंआद्रियन्आदरेणशृण्वन् यर्हिअधरेसं
धितवेणुर्भवति ९ तर्हियेसरसिसारसाःहंसाः अन्येचविहंगाश्चारुणागीतेनहृतचेतसएत्यतत्रआगा।

दर्शनीयतिलकोवनमालादिव्यगंधतुलसीमधुमत्तैः अलिकुलैरलघुगीतमभीष्टमाद्रिय
न्यर्हिसंधितवेणुः १० सरसिसारसहंसविहंगाश्चारुगीतहृतचेतसएत्य हरिमुपासततेय
तचित्ताहंतमीलितदृशोधृतमौनाः ११ सहबलःस्रगवतंसविलासःसानुषुक्षितिभृतोव्रज
देव्यः हर्षयन्यर्हिवेणुरवेणजातहर्षउपरंभतिविश्वम् १२

त्यहरिमुपासतअभजन् तत्समी
पेउपविविशुर्वा हंतेतिविषादे ११ मेघोपिहरिंसेवतइत्याहुः सहबलइति भोव्रजदेव्योगोप्यःसहब
लःसरामःकुसुमैः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यांकर्णभूषणाभ्यांविलासोयस्य यद्वामुक्ताफलहा
रापीडेनविलासोयस्येति क्षितिभृतःसानुषुगिरेस्तटेषुवर्तमानःस्वयंजातहर्षोविश्वंहर्षयन्यदावे
णुरवेणपरंभतिनिनादयतिनादेरयतीत्यर्थः १२

ना

महतः

श्री॰ तदामेघः श्रीकृष्णस्यातिक्रमेणशंकितंचेतोयस्यसः नपुनरुपरितोयाति नवोच्चैर्गर्जति किंतर्हितत्रैवस्थि
भा॰ द॰ तः सन्वेणुरवमनुमंदंमंदंगर्जति किंतुसुहृदंविश्वार्तिहरणादिसाम्यात् सुहृत्श्रीकृष्णस्तंसुमनोभि
टी॰ रभ्यवर्षत् स्वर्पुष्पैर्दैवैः क्रियमाणंकुसुमवर्षंमेघेनैवकल्पयित्वोक्तं तुषारोवाकुसुमतयाकल्पितः स
१४५ पववादेवतानुरूपोभ्यवर्षदिति प्रतापादातपात्त्रायतइतिप्रतपत्रंछत्रंततछाययाकुर्वन्निति १३ अपि
145

महदतिक्रमणशंकितचेतामंदमंदमनुगर्जतिमेघः सुहृदमभ्यवर्षत्सुमनोभिःछायया
चविदधत्प्रतपत्रं १३ विविधगोपचरणेषुविदग्धोवेणुवाद्यउरुधानिजशिक्षाः तवसुतःसति
यदाधरबिंबेदत्तवेणुरनयत्स्वरजातीः १४ सवनशस्तदुपधार्यसुरेशाःशक्रशर्वपरमेष्ठिपुरो
गाः कवयआनतकंधरचित्ताःकश्मलंययुरनिश्चिततत्वाः १५

चमहदेतदाश्चर्यमित्याहुः

विविधेति हेसतियशोदे तवसुतोनानागोपक्रीडासुविदग्धोनिपुणोणुवाद्यविषयेनिजैवशिक्षाया वे४
सुताःस्वोत्प्रेक्षितानत्वन्यतःश्रुताइत्यर्थः स्वरजातीःनिषादर्षभादिस्वरालापभेदान् अनयतउन्नीतवान्
१४ ततताःस्वरजातीःसवनशःमंद्रमध्यमतारभेदेन यतोगीतध्वनिरागतस्ततआनताकन्धराश्चित्तंचयेषां १४५
ते उपधार्यसम्यगाकर्ण्य कवयःकोविदाअपिते ननिश्चितंतत्त्वंतद्भेदोयैस्तेकश्मलंमोहंययुरिति १५

अस्माकं तमोऽहं किं ब्रूमः इत्याह: निजपदाब्जदलैरिति ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां
145A तैः निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजस्त
दद्गतिर्यस्य स मन्कृसोवादितवेणुः सन् यद्व्रजति ९ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववे

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः व्रजभुवः प्रशमयन्खुरतोदं वर्ष्मधु
र्यगतिरीरितवेणुः १६ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः कुजगतिं
गमिता न विदामः कश्मलेन कवरं वसनं वा १७ मणिधरः क्वचिदागणयन्गा मालया दयि
तगन्धतुलस्याः प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र १८

गाः यास्ताः वयं कुजा वृक्षास्तेषां गतिं गमिताः सत्यो मोहेन न विदामः कवरं वसनं वेति ९ किंच म
णिधरो मणीन्ग्रथितान् गोगणार्थं धारयतीति मणिधरः क्वचिद्देशे मणिभिः समन्तात् गाः गणय
न् तथा दयितगन्धा या तुलसी तस्या मालया सह वर्तमानः प्रणयिनः प्रिय
स्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र कदाचिदगायत १८

नैः१

श्री० तदाक्वणितवेणुरवेणैवंचितानपहृतानिचित्तानियासांताः कृष्णगृहिण्यस्यगृहिण्योभार्याः गुणगणार्णांगुणा
नमुद्रं कृष्णमनुगत्यप्राप्यताः कृष्णमेवान्वसतअन्वासत नमूवर्ततइत्यर्थः कुतः यतोविमुक्तागृहाशायाभिस्ताः
भा०द० गोपिकाइवताअपितथैवमेवान्वासतेति १९ तदेवंवृंदावनप्रदेशेषुक्रीडित्वामध्याह्नेगोधनानिपराहृत्ययमुनायां
ए० क्रीडतःकृष्णस्यसौभाग्यमनुवर्णयति कुंददामकृतकौतुकवेषइत्यादि गोपीनामुत्सवायकुंददामभिःकृतःकौ-

१४९ क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसतकृष्णगृहिण्यः गुणगणार्णमनुगत्यहरिण्योगोपिकाइ
146 तर ववि मुक्तगृहाशाः १९ कुंददामकृतकौतुकवेषोगोपगोधनवृतोयमुनायां नन्दसूनुरनघेतवव
त्सोनर्मदः प्रणयिणांविजहार २० मंदवायुरुपवात्यनुकूलंमानयन्मलयजस्पर्शेन वन्दिनस्त
\\ उपदेवगणायेवाद्यगीतबलिभिःपरिवव्रुः २१

द्यगीतपुष्पवर्षादिभिः परिवव्रुः परितउपासत २१

तुकेनोत्सवेनवेषालंकारोयेनसः हेअनघेय
शोदेतववत्सः पुत्रोनंदसूनुःकृष्णः यद्वा सहैववद्धाःकथयंतिस्मकाश्चित्तववत्सइतिकाश्चिन्नन्दसूनुरिति
चाहुः नर्मदोहर्षदः सन्यदाविजहारक्रीडतिस्म २० तदामलयजस्पर्शेनमलयजस्यचन्दनस्येवसुरभिः
शीतस्पर्शः स्पर्शस्तेनतंकृष्णंमानयन् अनुकूलंयथातथोपवातिवीजयति यद्वा मलयजोदक्षिणोवायुः १४९
यद्वा मलयजस्यकृष्णेनस्वांगेनुलिप्तस्यस्पर्शेनमानयन्निति किंच वंदिनःस्तावकाःसंतोगंधर्वादिगणाःवा

M6A

अथायांतमालोक्य हृष्यंत्यः परस्परमूचुः वत्सल इति व्रजस्य गवां च यद्वा व्रजे निबद्धानां गवामनुकम्पा
नामस्माकमित्यर्थः वत्सलो हितकृत् कुतः यद्यस्माद् अगध्रः अगं धरतीति गोवर्धनोद्धारकः वृद्धशोर्व
त्मणामस्योपलक्षणमेतत् वृद्धैर्ब्रह्मादिभिः पथि सर्वैर्वंद्यमानचरण इत्यर्थः सायं शीघ्रमागंतेनेत्यती
त्यर्थः उपोह्य एकीकृत्य गीतश्चासौ वेणुर्यस्य सः २२ श्रमयुक्तयापि कांत्या नेत्राभ्यां हर्षमुन्नयन् उच्चैः

वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुर
नुगेरितकीर्तिः २२ उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजश्छुरितस्रक् दित्सयैति सुहृदा
शिष एष देवकीजठरभूरुडुराजः २३ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली व
दरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या २४

प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो
यस्य सः सुहृदामस्माकमाशिषो मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरे भवतीति तथाभूतो उडु
ज राजश्चंद्रो निर्वृतिहेतुत्वेन सपद्यतीति २३ अतिसंभ्रमेण काश्चित्समीपमायांतं कथयंति ईषन्मदेन
विघूर्णिते विकलिते लोचने यस्य सः बदरपांडुवदनः ईषत्पक्वबदरवत्पांडुरं वदनं यस्य सः अत्र हेतुः कनक
कुंडलयोर्लक्ष्म्या कांत्या मृदु कोमलौ गंडौ यस्मिंस्तद्वदनं मंडयन् कोमलं गंडस्थलं शोभयन्नित्यर्थः २४

स

श्री· भा·द· पू· १५७ 147

यदुपतिर्देवकीजठरभूरितिप्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजइत्यादिगर्गवाक्यप्रसिद्धोक्तं यद्वा
सखउदेयिवानस्तातनोञ्जलेइतिचज्ञात्वाकाश्चिद्वदंतीति गजेंद्रगतिःचंद्रइवप्रसन्नवक्त्रोव्रजगवामस्मा
कमनंतंदिनतापंचशमयन्नुपयातिसमीपमायातीति २५ एवंविरहदुःखेनापि नयुद्धाकुलमलीलाएव

यदुपतिर्द्विरदराजविहारोयामिनीपतिरिवैषदिनांते मुदितवक्त्रउपयातिदुरंतंमोचय
न्व्रजगवांदिनतापं २५ मुकुंद· एवंव्रजस्त्रियोराजन्कृष्णलीलानुगायतीः रेमिरेहःसु
सुतच्चित्तास्तन्मनस्कामहोदयाः २६ इतिश्रीभागवतेदशमस्कंधेवृंदावनक्रीडायांगोपि
कागीतंनामपंचत्रिंशोध्यायः ३५

गायंत्यः तस्मिंश्चित्तंचेतनाजीवितंयासांताः तस्मिन्नेवमनःसंकल्परूपंयासांताः अतोमहानुदयउ
त्सवोयासांताः अहःस्वपिरेमिरे २६ इतिश्रीभावार्थेदशमेपंचत्रिंशोध्यायः ३५ षट्त्रिंशेनिहते
रिष्टेनारदोक्त्यावलाच्युतौ वसुदेवसुतौज्ञात्वाकंसोक्रूरमथादिशत् गोपीरासातरायांतंशंखचूडं १५७
निहत्यसः अरुन्गोपीमहानंदरासहृदुष्टमरिष्टकं १

१ ऽ किंचि किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः

147A

एवं देवगंधर्वादिगीतनृत्तवाद्यकुसुमवर्षादिभिः कृ संप्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विहृद्धार्थ
मुत्तराधिकारार्थमथ शब्दः तर्हि तदा वृषभाकृतिरसुरगोष्ठमागतः तं वर्णयति सार्धत्रयेण महान्तौ ककु
त्कायौ यस्य सः खुरैर्विदारितां महीं कंपयन् १ रंभमाणः वृषभजातिशब्दं कुर्वन् विदारयन् उद्यत्किंचि

शुक उ॰ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः महीं महाककुत्कायः कंपयन्खुरविक्षतां १
रंभमाणः खरतरं पदा च विलिखन्महीं उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् २ यस्य
निर्ह्रादितेनांग निष्ठुरेण गवां नृणां पतंत्यकालतो गर्भाः स्रवंति स्म भयेन च ३ निर्विशंति
घना यस्य ककुद्यचलशंकया तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ४ पशवो दुद्रु
वुर्भीता राजन्संत्यज्य गोकुलं कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः ५ भगवानपि तद्वीक्ष्य
गोकुलं भयविद्रुतं माभैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ६

स्योर्ध्वं कृत्वा वप्राणि तटान् उत्क्षिपन् किंचित् शकृत् मुंचन् ईषदीषत्करीषं मुंचन् तथा मूत्रं उत्सृजन् स्त
ब्धलोचनः अनिमेषलोचनः २ यस्य ध्वनिना गवां नारीणां च गर्भाः पतंति स्रवंति च तत्र आ चतुर्थो
द्भवेत्स्रावः पातः पंचमषष्ठयोः अत ऊर्ध्वं प्रसूतिः स्यादिति गर्भस्य कीर्तितेति विभागः ३ ककुदि गल

श्री॰
भा॰ द॰
पू॰
१४८
148

७ इत्येवं वदन्नास्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन कोपयन् भुजाभोगं भुजाभुजः सर्प
वभोगः सर्पदेहस्तत्समीपीकारं भुजे सख्युः स्कंधे निधायेति भयाभावो दर्शित इत्यर्थः स्वयमच्युतः अस्मात्
दुष्टान्नरक्षतीतिहरिः ८ उद्यतादूर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघा यस्मिन्सः ९ अग्रे न्यस्ते विषाणाग्रे येन

गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम बलापहार्हं दुष्टानां त्वद्विधानां दुरात्मनां ७ इत्यास्फोट्या
च्युतोरिष्टं तलशब्देन कोपयन् सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः सोप्येवं कोपितोरिष्टः
खुरेणावनिमुल्लिखन् उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ९ अग्रेन्यस्तविषाणाग्रः स्तब्धास्
ग्लोचनोच्युते कटाक्षिप्याद्रवन्नूर्णमिंद्रमुक्तोशनिर्यथा १० गृहीत्वा शृंगयोस्तं वा अष्टादशपदानि सः
प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ११ सोपविद्धो भगवता पुनरुत्थाय सत्वरः आपतत्स्विन्नस
र्वांगो निःश्वसन्क्रोधमूर्छितः १२ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले निपीडया

सः स्तब्धे अस्रकल्ले लोचने यस्य सः कटाक्षिप्य कटाक्षेण तिर्य \\ मास पश्चार्द्धमेवं कृत्वा विषाणेन जघान
कृ निरीक्ष्य १० प्रत्यपोवाह प्रतिलोमं व्यनुदत् ११ अपविद्धः अपक्षिप्तः आपतत् कृष्णं प्रत्याद्रवत् स्विन्ना
नि स्विन्नयुक्तानि सर्वांगानि यस्य सः क्रोधमूर्छितः क्रोधेन व्याप्तः १२ कृत्वा विषाणमुत्पाट्य तेनैव जघान सव

१४८

मूत्रशकृतमसृंशकृत्स्रुप्ककवद्भावः तदुभयं समुत्सृजन्निरयशः पादांश्च क्षिपन्नितस्ततश्चालयन्नन
वस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम अथच निर्ऋतेः मृत्योः स्वयं निवासं जगाम यद्वा कृ
च्छ्रं यथा भवति तथा मृत इति वा १४ नयनोत्सवः नयनानां मूर्तिमानुत्सवः १५ कामं व्रजे वसंतं तं कृष्ण
मेत्य गतस्मृति नारदः स्मारयामास कंसहतमिवेत तदाह अरिष्ट इति देवदर्शनो देवर्षिः यद्वा एव

असृग्वमन्मूत्रशकृत्समुत्सृजन् क्षिपंश्च पादाननवस्थितेक्षणः जगाम कृच्छ्रं निर्ऋतेरथ
क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः १४ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः विवेश
गोष्ठं सबलो गोपीनां नयनोत्सवः १५ अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा कंसायाथा
ह भगवान्नारदो देवदर्शनः १६ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च रामं च रोहि
णीपुत्रं वसुदेवेन बिभ्यता न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः १७

कृते एवं भविष्यतीति साक्षाद्देवदर्शनं ज्ञानं यस्य सः १६ आसमेनैव नारदेनोक्तमाह यशोदाया इति देव
क्याअष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमा
ह रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह यद्वा नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्यायाः रोहिण्याः

पुत्रमाह ननु वसुदेवसुतौ चेत् कथं व्रजं गतौ तत्राह वसुदेवेनेति १८

श्री॰
भा॰द॰
द॰
१४९
149

१८ निवारितइति हतेवसुदेवेतौपलायेतां अतोवध्यतामितिमंत्रंवदतानारदेननिवारितइति १९ २०

निशम्यतद्भोजपतिःकोपात्प्रचलितेंद्रियः निशातमसिमादत्तवसुदेवजिघांसया १७
निवारितोनारदेनतत्सुतौमृत्युमात्मनः ज्ञात्वालोहमयैःपाशैःबबंधसहभार्यया १८
प्रतियातेतुदेवर्षौकंसआभाष्यकेशिनं प्रेषयामासहन्येतांभवतारामकेशवौ २० त
तोमुष्टिकचाणूरशलतोशलकादिकान् अमात्यान्हस्तिपांश्चैवसमाहूयाहभोजराट् २१
भोभोनिशम्यतामेतद्वीरचाणूरमुष्टिक नन्दव्रजेकिलासातेसुतावानकदुंदुभेः २२ राम
कृष्णौततोमह्यंमृत्युःकिलनिदर्शितः भवद्भ्यामिहसंप्राप्तौहन्येतांमल्ललीलया २३ मं
चाः क्रियंतांविविधामल्लरंगपरिश्रिताः पौरजानपदाःसर्वेपश्यंतुस्वैरसंयुगं २४ महामा
त्रत्वभद्ररंगद्वार्युपनीयतां द्विपःकुवलयापीडोजहितेनममाहितौ २५
या

२२ मह्यंममनिदर्शितः
विपाज्ञानारदेनवा व्रजंगंतमुद्यतौतावाह भवद्भ्यामिति २३ मंचाःउच्चंगस्तंभादिरचितस्थानानि २४ अहि

१४९

149A

मीढुषेवरदाय २६ अर्थतत्त्वमर्थसिद्धांतमेवजानातीत्यर्थतत्त्वज्ञः २७ दानपतेअक्रूरमैत्रंमित्रकृत्यंव
यात्क्रियतांत्वत्तोन्यआदृतः मादरोहिततमश्चनविद्यतइति २८ स्वार्थंवृत्रवधादिंद्रादिराज्यं २९ अतेः

आरभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधिः विशसंतपशून्मेध्यान्भूतराजायमीढुषे २६ इत्याज्ञा
प्यार्थतत्त्वज्ञआहूययदुपुंगवं गृहीत्वापाणिनापाणिंततोक्रूरमुवाचह २७ कंसउवाच भो
भोदानपतेमह्यंक्रियतांमैत्रमादृतः नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु २८ अतस्त्वा
माश्रितःसौम्यकार्यगौरवसाधनं यथेंद्रोविष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः २९ गच्छनंद
व्रजंतत्रसुतावानकदुंदुभेः आसातेताविहानेनरथेनानयमाचिरं ३० निसृष्टःकिलमेमृत्यु
र्देवैर्वैकुंठसंश्रयैः तावानयसमंगोपैःनंदाद्यैःसाभ्युपायनैः ३१ घातयिष्यइहानीतौका
लकल्पेनहस्तिना यदिमुक्तौततोमल्लैर्घातयेवैद्युतोपमैः ३२ तयोर्निहतयोस्तप्तान्वसुदे
वप्रोगमान् तद्बंधून्निहनिष्यामिवृष्णिभोजदशार्हकान् ३३

नाःतिमनोहरेणरथेन ३० तौमेमृत्युनितरांसृष्टः वैकुंठसंश्रयैर्विष्णुसंश्रयैर्देवैः ३१ किंततस्तत्राह
घातयिष्यइति कालकल्पेनमृत्युतुल्येन वैद्युतोपमैरशनितुल्यैः ३२ ३३

इह नष्टकण्टका नष्टशत्रुः ननु कतिपयसुहृद्वधेन नष्टकंटका कथं स्यात्तत्राह जरासंध इति ३५ ३६ द्वि
श्री· चेति तत्रस्त्रसखि ३७ मनीषितं विचारितं सध्र्यक् स्वावद्यमरणे तन्मार्जनं तथाप्येतावानभिनिवेशो
भा· द· न कार्य इति भविष्यत्सूचयन्नाह सिद्ध्यसिद्ध्योरिति ३८ पुरुषकारस्य व्यभिचारमाह मनोरथानिति ३९ ४०
टी·

उग्रसेनं च पितरं स्थविरं राज्यकामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ३५ ततश्चैषा मही मि
१५· त्र भवित्री नष्टकंटका जरासंधो मम गुरुर्द्विविदो दयितः सखा ३५ शंबरो नरको बाणो मय्येव कृ
150 तसौहृदाः तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ३६ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ
धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३७ अक्रूर उ· राजन्मनीषितं सध्र्यक् तव स्वावद्यमार्जनं सि
द्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ३८ मनोरथान्करोत्युच्चैर्जनो दैवहतानपि युज्यते हर्षशो
साधनं काभ्यां तथाप्याज्ञां करोमि ते ३९ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः प्रविवेश गृहं कंसः
स्तथाक्रूरः स्वमालयं ४० इति दशमे षट्त्रिंशः ३६

इति श्रीभावार्थे षट्त्रिंशः ३६ सप्तत्रिंशे हते केशिन्यच्युतो भाविकर्मभिः नारदेन स्तुतः क्रीडन्व्योमासु १५·
रमथावधीत् वृषवेषासुरं यद्वत्केशिनं हयवेषिणं कंसप्राणसमं हत्वा कंसं व्यसुमिवाकरोत् १

150A केशीनिति प्रथमश्लोकेनैवंभूतः केशीत्यनूद्यतं भगवानुपाह्वयदिति तृतीयश्लोकेनान्वयः महाहयः स
मर्दी निर्जरघनस्त्र्यध्ययन्विदारयन्नित्यर्थः सटाभिः केसरैरवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च
तैः संकीर्णं नभः ऊर्वं क्ष्वेडितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन सः १ २ तत्क्ष्वेडितैस्तैरतिनिष्ठुरैः क्ष्वेडितै
र्वालैः पुच्छलोमभिर्विघूर्णितांः परिभ्रामिताभ्रं बुदायेन नतं श्रीजीसंग्रामार्थमात्मानं कंसः प्रवरणैः पुरतो नि

श्रीशुक उ० केशीतु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः सटावधूताभ्रविमानसंकुलं ५
ऊर्वं नभो क्ष्वेडितभीषिताखिलः १ करालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः दु
राशयः कंसहितं चिकीर्षुर्व्रजे स नन्दस्य जगाम कम्पयन् २ तं त्रासयन्तं भगवान्स्वगोकुलं तद्भे
षितैर्वालविघूर्णिताम्बुदं आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयत्स व्यनदन्मृगेन्द्रवत् ३ सतं
निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यागमदत्यमर्षणः जघान पद्भ्यामरविन्दलोचनं दुरासदश्चं

गतः सन् उपाह्वयत् तस्य समीपमाजुहाव ३ स च केशी तं निशाम्य मृगेन्द्रवन्नादमकरोत् इति स्वर्वेणैवान्वयः
ततः स केशी तं कृष्णं स्वदृष्ट्वाभिमुखेन खं पिबन्निव मुखं व्यादाय विवृत्याभिमुखमभ्याजगाम किंच अन्यम
र्षणो तिक्रुपितो यं तमसहमानो वा प्रसभं पद्भ्यां जघान दुरासदो न्यैरभिभवितुमशक्यः दुःखप्रायः उद्धतः

उत्कविकारसिः ५

सकउपाशिक्रमोऽसीहाशिक्रमः ५

श्री. भा. द. स्क. १५१ 151

तद्धनं वंचयित्वा तं चद्दननाय प्रसारितयोः पादयोर्हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा धनुःशतां
तरे विते पश्चाद्व्यवस्थितः तथैव स्थितो बभूव ५ आदाय शंखं प्रसार्य वेगेन हरिं प्रत्याद्रवत् सोपि हरिर्ह
सव्य उत्तरं सव्यं भुजं मुखे प्रवेशयामास निर्भयत्वे दृष्टांतः यथोरगं विले इति ९ ततः किं तदाह दंता

तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः सावज्ञमुत्सृज्य धनुःशतांतरे यथोर
गेंद्रस्तार्क्ष्यसुतो व्यवस्थितः ५ स लब्धसंज्ञः पुनरुत्थितो रुषा आदाय केशी त्वरसापतद्धरिं सोप्यस्य
वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ९ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तम
यःस्पृशो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः १ समेधमानेन स कृ
ष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं विसृजन् क्षितौ
व्यसुः ८ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितो यत्नहतारि

ति वर्वार्णाय भगवद्भुजं स्पृशंतीति तथा तेषां दानेन ये विदृताः अयो लोहं स्पृशंतीति अयःस्पृशः यद्वा
तप्तमयो ऽनितप्तं लोहादि स्पृशंतो यथेति आमयो जलोदरं १ लेंडं पुरीषं विसृजन् विसृजन् ८ कर्कटिकाफ
लेऽहिपक्वं सायं तद्विदीर्णं भवति तद्वद्विदीर्णान्देहाद्विगतप्राणाद् विस्मितो गर्वरहितः अयत्नेन हतो रिपु १५१

151A

कंसायकृष्णस्समादिश्यपतद्रहस्यादिपैश्चुनैः कंसघातादिकृष्णस्यकार्यमावेदयन्मुनिः तदाह देवर्षिरित्या
दिना नचायंसूचकः किंचसर्वंसहृदित्याह भगवतप्रवरइति १ अस्यदेहस्यवैरिणांकंसेसूचितवानि
तिमाशंकोरित्याह कृष्णकृष्णेत्यादिना अयंभावः त्वमीश्वरोभूभारदैत्यसंहारायावतीर्णोसि अतस्त्वदनु
पावरणेनविश्वंपरिपालयेतितत्रत्वयितावन्नयशंकेवनास्तीत्याह अप्रमेयात्मन्अपरिच्छिन्नस्वरूप यो
गेशाअचिंत्यप्रभाव जगदीश्वरविश्वनियंतः वासुदेवसर्वभूतेषुवर्तमान अखिलावाससर्वस्याश्रय सत्व

नारदोवाच। १ देवर्षिरुपसंगम्यभागवतप्रवरोनृप कृष्णमक्लिष्टकर्माणंरहस्येदमभाषत १ कृष्णकृष्णाप्रमेया
त्मन्योगेशजगदीश्वर वासुदेवाखिलावाससात्वतांप्रवरप्रभो ११ त्वमात्मासर्वभूतानामेकोज्यो २
तिरिवैधसा गूढोगुहाशयः साक्षीमहापुरुषईश्व ३

तिसात्वतांप्रवरश्रेष्ठ प्रभोसर्वशक्ते ११ कथमेवंव्र
योहमितिचेदतआह त्वमात्मेति नहित्वंजीववत्परिच्छिन्नः किंतुसर्वभूतानामंतरेव एकोनुस्यूतआत्मा
अंतरनुस्यूतत्वेदृष्टांतः एधसांकाष्ठानामंतर्ज्योतिरिवेतित्वं भूतेषुस्थितोपितैर्नदृश्यसइत्याह गूढ
इति अतएवगुहाशयः बुद्धेरभ्यंतरः किंचसाक्षीनहिसाक्षीदृश्यतइत्यर्थः अपिचमहापुरुषः अतः प
रिच्छिन्नमतिभिर्नज्ञायसइत्यर्थः तर्हिसर्वांतरत्वेकिंप्रमाणमतआह ईश्वरइतिनहीश्वरंविनापरतंत्राणांजी

श्री॰ भा॰ द॰ स्क॰ १५२ 152

ननु प्रहमीश्वरः अन्यत्सर्वमीशितव्यमित्येतदेव कुतः अत आह आत्मनेति साधनांतरनिरपेक्ष एव आत्मा
आश्रयः स्वतंत्रः मायया शक्त्या भवान् गुणान् ससर्ज सृष्टवान् तैः स्वसृष्टैर्गुणैरिदं विश्वं सृजसि अत्सि संहरसि
अवसि पालयसि ननु सृष्ट्यादिविक्रियाः षट्कारकसाध्या एव दृष्टा इत्यत आह सत्यसंकल्प इति नहि संकल्पै
कसाध्यैव दृष्टिः साधनापेक्षेति भावः अत एव त्वमीश्वर इत्युपसंहारः १२ प्रस्तुतमाह सत्वमिति भूधरभूतानां

आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणान् तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः १३ स त्वं भू-
धरभूतानां दैत्यप्रमथरक्षसां अवतीर्णो विनाशाय सेतूनां रक्षणाय च १४ दिष्ट्या ते निहतो दैत्यो साधू २
लीलयायं हयाकृतिः यस्य ह्रेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवं १५ चाणूरं मुष्टिकं चैव मल्लानन्यां
श्च हस्तिनं कंसं च निहतं द्रक्ष्यपरश्वोहनि ते प्रभो १६ तस्यानु शंखयवनमुराणां नरकस्य च
पारिजातापहरणमिंद्रस्य च पराजयं १७

भुवं धरंतीति भूधरा राजानस्तद्रूपाणां १४ १५ परश्वोहनीति अद्यैवाक्रूर आगमिष्यति श्वो मधुरां गंतासि प
रश्वश्चाणूरादीन् त्वया निहतान् द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारः १६ तस्यानु तदनंतरं शंखोदी
नां शंखः पंचजनः वधं द्रक्ष्यामीति शेषः भाविनिर्देशमात्रमेतत् न त्वानंतर्यं विवक्षितं १७ १५२

152A १९ भार्ययाजांबवत्यासहस्वधामतः महाकालपुरात् १९ २० द्वारकामावसन् द्वारकायांवसन्कर्ताकरिष्य
सीति २१ अमुष्यविश्वस्यभूभारस्यवा २२ एवंविज्ञाप्यकृताभिवंदनेभगवतेनमस्यतिद्वयेन विशुद्धविज्ञा
नघनमितिकेवलज्ञानैकमूर्तिं अतएवस्वसंस्थयास्वरूपसम्यक्स्थित्यैवपरमानंदरूपयासम्यगाप्ताः प्राप्ताःसर्वे

उद्वाहंवीरकन्यानांवीर्यशुल्कादिलक्षणं नृगस्यमोक्षणंशापाद्द्वारकायांजगत्पते १९ स्यमंतक
स्यचमणेरादानेसहभार्यया मृतपुत्रप्रादानेचब्राह्मणस्यस्वधामतः १९ पौंड्रकस्यवधःपश्चात्
काशिपुर्याश्चदीपनं दंतवक्रस्यनिधनंचैद्यस्यचमहाक्रतौ २० यानिचान्यानिवीर्याणिद्वारकामावस
न्भवान् कर्ताद्रक्ष्याम्यहंतानिगेयानिकविभिर्भुवि २१ अथतेकालरूपस्यक्षपयिष्णोरमुष्यवै अ
क्षौहिणीनांनिधनंद्रक्ष्याम्यर्जुनसारथेः २२ विशुद्धविज्ञानघनंस्वसंस्थयासमाप्तसर्वार्थममोघवां
छितम् स्वतेजसानित्यनिवृत्तमाययागुणप्रवाहंभगवंतमीमहि २३

र्थोयेनतम् आप्तकामतोक्तास्यसंकल्पतामाह अमोघवांछितमिति ननुवांछाचेत्तर्हिलिङ्गनिर्वाणासंभ
तिरतआह स्वतेजसेति चिच्छक्त्यानित्यनिवृत्तोमायाकार्यरूपोगुणप्रवाहोयस्मात्तं अतोभगवंतेनिरतिश
यैश्वर्यमीमहि शरणंव्रजेमेति २३

ननुत्रिकालज्ञस्त्वं कथंमत्स्वरूपंचंनजानासिजानासिचेत्कथमगुणप्रवाहंप्रब्रवीषितत्राह त्वामिति ईश्वर
 मनन्यस्ववशयितारं स्वाश्रयंअनन्यस्यावशेषाअतआत्ममाययाआत्माधीनयामायया विनिर्मिताअशेषवि
 शेषामहदाद्याः यावद्रूपावाकल्पनायेनतं प्रपद्येअहंनतोस्मीति २४ २९ प्रातरेवकेशिवधानंतरंनार

त्वामीश्वरंस्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमद्यात्तमनुष्यविग्रहंन
तोस्मिधुर्यंयदुवृष्णिसात्वतां २४ शुक उ० एवंयदुपतिंकृष्णंभागवतप्रवरोमुनिः प्रणिपत्याभ्य
नुज्ञातोययौतद्दर्शनोत्सवः २५ भगवानपिगोविंदोहत्वाकेशिनमाहवे पशूनपालयत्पालैःप्री
तैर्व्रजसुखावहः २६ एकदातेपशून्पालांश्चारयंतोद्रिसानुषु चक्रुर्निलायनक्रीडाश्चोरपालाप
देशतः २७ तत्रासन्कतिचिच्चोराःपालाश्चकतिचिन्नृप मेषायिताश्चतत्रैकेविजह्रुरकुतोभयाः
२८ मयपुत्रोमहामायोव्योमोगोपालवेशधृक् मेषायितानपोवाहप्रायश्चोरायितोबहून् २९

दोलमंगीकृत्यपुनस्तथैवपशूंश्चारयताव्योमोहतः यदा व्योमवधःसर्वमेवप्रवृत्तोपिविषयाविवप्रसं
गाद्वक्ष्यतेइतिद्रष्टव्यंकेचित्तुनःशंखचूडवधात्पूर्वमेवपठन्तितदाह एकदेति २७ २८ मेषवदाचरिता
न्स्वयंचौरवदाचरितःसन् अपोवाहअपकृष्यनिनाय २९

पिदधेच्छादितवान् ३० शरण्यश्चाश्रयप्रदः हरिः सिंह इव ३१ ३२ पशुमारं पशुमारो यथा भवति तथा अनिः
स्वासमित्यर्थः ३३ भुवि गोपैः स्तूयमान उपरि वैमानिकैर्देवैरिति ३४ इति भावार्थे दशमे सप्तविंशः ३७
अष्टत्रिंशे यथा ध्यायन्नक्रूरो गोकुलं गतः तथैव रामकृष्णाभ्यां गृहे नीत्वा सुसत्कृतः प्रातः केशिवधेवृ
गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः शिलया पिदधे द्वारं चतुःपंचावशेषिताः ३० तस्य
तत्कर्म विज्ञाय कृष्णः शरणदः सतां गोपान्नयन्तं जग्राह वृकं हरिरिवौजसा ३१ स निजं रूपमा
स्थाय गिरीन्द्रसदृशं बली इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ३२ तं निगृह्याच्युतो दोर्भ्यां
पातयित्वा महीतले पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं निर्भिद्य गोपान्निः
सार्य कृच्छ्रतः स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुले ३४ इति श्रीभागवते दशमे सप्तत्रिंशः
३७ शुकउ॰ अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्थाय प्रययौ नन्दगोकुले
१ गच्छन्पथि महाभागो भगवत्यम्बुजेक्षणे भक्तिं परामुपगत एवमेतदचिंतयत् २
तेद्वारदर्शनं निर्गते मुनौ ततो व्योमे हते कृष्णः सायं गोकुलमागमत् तदेवं नारदेन कंसवधादिकार्येषु वि
ज्ञापिते श्रीकृष्णो मथुरां गन्तुमुद्यतो वर्तते तदाक्रूरोपि गोकुलमगादित्याह अक्रूरोपीति अप्रीतिसभाव

श्री· अपिसंभावनायां अर्हतेयोग्याय ३ स्वस्यकृष्णस्यदर्शनेःसंभवमाशंक्यपुनःसंभावयति ममैतदिति
भा·द· हृदयेनविषयात्मनःविषयाविष्टचित्तस्य शूद्राजन्मयस्यतस्यब्रह्मकीर्तनंवेदोच्चारणंयथेति ४ अथवा
टी· मैवंकिंत्वधमस्यनीचस्यापिममतत्स्यादेव कुतइत्यतआह ह्रियमाणःकालनद्येति अयंभावः यथान
१५४ द्याह्रियमाणानांतृणादीनांकिंचित्कदाचित्तरति तथाकर्मवशेनकालेनह्रियमाणानांजीवानामपिक
154

किंमयाचरितंभद्रंकिंतप्तंपरमंतपः किंवाथाप्यर्हतेदत्तंयद्द्रक्ष्याम्यद्यकेशवं ३ ममैतद्दुर्लभं
मन्येउत्तमश्लोकदर्शनं विषयात्मनोयथाब्रह्मकीर्तनंशूद्रजन्मनः ४ मैवंममाधमस्यापिस्या
देवाच्युतदर्शनं ह्रियमाणःकालनद्याक्वचित्तरतिकश्चन ५ ममाद्यामंगलंनष्टंफलवांश्चैवमेभ
वः यन्नमस्येभगवतोयोगिध्येयांघ्रिपंकजं ६ कंसोवताद्याकृतमेत्यनुग्रहंद्रक्ष्येंघ्रिपद्मंप्रहितो
श्चित्तरेदितिसंभ \\मुनाहरेः कृतावतारस्यदुरत्ययंतमः पूर्वेतरन्यन्नखमंडलत्विषा ७

वतीति ५ अतोनयाप्रहृष्टस्यैवममाःमंगलंध्रुवंनष्टमेवेतिज्ञायते भवोजन्मचसफलंजातमित्यर्थः यतोन
मस्करिष्यामि ६ अमंगलनाशेस्वकातरमाह कंसइति बतेत्याश्चर्ये अतिखलःकंसोपिममात्यंतमनुग्र
हं कृतवान् यतोऽमुनाप्रहितोहरेरंघ्रिपद्मंद्रक्ष्यामीति पूर्वेअंबरीषादयस्तमःसंसारमतरन्तीर्णाः १५४
२

154A श्रीत्रिपदं विभावयति यदिति ब्रह्मादिभिरर्चितमितिपरमेश्वर्यमाह श्रियाचेति सौभाग्यातिशयं मुनि
भिर्मरुकिसहितैरितिपरमपुरुषार्थत्वं गोचारणायेतिकृपालुत्वं यज्ञोपिकानामितिप्रेममात्रसुलभत्वं ८
मनोरथान्तरंकरोति द्रक्ष्यामीति शोभमानौकपोलौनासिकाचयस्मिंस्तत् स्मितसहितोवलोकोयस्मि
न् अरुणकंजवल्लोचनेयस्मिन् तच्चतच्चमुखं च गुडालकावृतंवक्त्रकेशावृतंतेनतदानीमेवशुभसूचकंदृष्टं
यदर्चितंब्रह्मशिवादिभिः सुरैः श्रियाचदेव्यामुनिभिः ससात्वतैः गोचारणायानुचरैश्चरद्वनेय
द्गोपिकानांकुचकुंकुमांकितं ८ द्रक्ष्यामिनूनंसुकपोलनासिकंस्मितावलोकारुणकंजलोचनं
मुखंमुकुंदस्यगुडालकावृतंप्रदक्षिणंमेप्रचरंतिवैमृगाः ९ अप्यद्यविष्णोर्मनुजत्वमीयुषोभारा
वतारायभुवोनिजेच्छया लावण्यधाम्नोभवितोपलंभनंमह्यंननस्यात्फलमंजसादृशः १० यईक्षि
तिताहंरहितोप्यसत्सतोःस्वतेजसापास्ततमोभिदाभ्रमः स्वमाययात्मन्रचितैस्तदीक्षयाप्राण
तिरूपमाह प्रदक्षिणमिति ९ पुनरप्यमन्विंतयति अप्यद्येति १ \\ तद्धीभिः सदनेषुभीयते ११
पुषः शोभमवतः लावण्यस्यधामआश्रयः तस्यविष्णोः यद्वा विष्णोर्लावण्यधाम्नः यद्धामवपुः तस्योपलंभ
नंभविताभविष्यति अपियद्येवंस्यात्तर्हिमह्यंममदृशोर्लोचनयोःसाफल्यं न नस्यादिति अपितुस्यादे
वेत्यर्थः १० यईक्षितेतिचतुर्भिःजुलकं तत्रेवंशंकानन्वस्मदादिवदेवकर्तृत्वभोक्तृत्वादिधर्मस्तत्रतत्र

प्रतीयमानस्य कथं विभुत्वमितीमामाशंकां श्लोकद्वयेनापाकुर्वन्नन्वतद्भर्थेननतमहं द्रक्ष्यामीति मनोरथं क
श्री· रोति तथाहि यईरितेति ईक्षणमात्रकर्ता असत्सतोः कार्यकारणयोरीरिताईक्षणमात्रेणकर्ताप्यहं
भा·द· रहितोहंकाररहीनः तथाप्यपास्ततमोभिदाभ्रमः तमः स्वाज्ञानंततोभिदाभ्रमः भेदः ततोभ्रमः अभिनि
स्क· वेशादि अपास्ताअपकृतास्तमआदयोयस्मिन्सः कुतस्तत्राह स्वतेजसाचिच्छक्त्यानित्यस्वरूपसाक्षा
१५५ त्कारेण तथापि स्वमाययास्वाधीनयामाययानटीतयानस्यैवतया प्राणादीनाम्भिः सहितैरात्मन ।

155

यस्याखिलामीवहभिः सुमंगलैर्वाचोविमिश्रागुणकर्मजन्मभिः प्राणंतिशुंभंतिपुनंति
आत्मनिस्वस्मिन्नेवरचितैर्जीवैः सदनेषुदेहवनत ॥ वैजगद्यास्तद्विरक्ताः शवशोभनाः मताः १२
त्सुगोपीगृहेषुचलीलयाकर्माणिकुर्वन्सक्तवदभीयतेआभिमुख्येनप्रतीयते ॥ ननुसर्वथाहंका
रादिरहितस्यात्मारामस्यलीलापिकुतस्तस्याशंक्यपरानुग्रहार्थंतामाशंक्ययेनाह अखिलानिअखिलस्य
वाअमीवानिपापानिघ्नंतीत्यखिलामीवहानितैः तथासुमंगलैः शोभनानिमंगलानियेभ्यस्तैः गुणाःका
रुण्यादयः कर्माणिजन्मानिचतैर्विमिश्रायुक्तावाचः जगत्प्राणंतिजीवयंति शुंभंतिशोभयंति पुनंतिप
वित्रयंति व्यतिरेकमाह याइति तैर्विरक्तारहितावाचः स्वलंकृताअपिवस्त्राद्यलंकृतशववच्छोभनाम

२ हरि हरि हरि

१५५

155A

किलेतिमनेमस्वयंरचितात्मेतत्वरणीश्रमधर्मात्पालयताममरवर्याणांसुखकर्तासन् अवतीर्णः यथा
शः १३ त्रैलोक्यैककमेवकांते दृशिः दृष्टितहतांमहतामुत्सवोयस्मात् यद्वा महोत्सवएवअतएवश्रि
यार्ईस्मितमास्पदमेवंरूपंश्रीमूर्तिंदधानंतमीश्वरंद्रक्ष्यामीति अत्रलिंगंउषसःप्रभातसमयाःसुदर्शनाःशु
भदर्शनाःसुखप्रभातारजनीतिशुभसंसूचकावभूवुरित्यर्थः १४ किंच अथदर्शनानंतरंसपदितत्व
सचावतीर्णःकिलमान्वतान्वयेस्वमेतपालामरवर्यशर्मकृत् यशोवितन्वन्वजआस्तईश्वरो
गायंतिदेवायदशेषमंगलं १३ तंत्वद्यनूनंमहतांगतिंगुरुंत्रैलोक्यकांतंदृशिमन्महोत्सवं रू नोहरं
पंदधानंश्रियईस्मितास्पदंद्रक्ष्येममासन्नुषसःसुदर्शनाः १४ अथावतीर्णःसपदीशयोरथात्प्र
धानपुंसोश्चरणंस्वलब्धये धियाश्रितंयोगिभिरप्यहंध्रुवंनमस्यआभ्यांचसखीन्वनौकसः १५
अप्यंघ्रिमूलेपतितस्यमेविभुःशिरस्यधास्यन्निजहस्तपंकजं दत्ताभयंकालभुजंगरंहसाप्रोद्वे
णमेवरथादवतीर्णःसन् अथानपुरुषयोरामकृष्णयोश्चरणं ॥ जितानांशरणैषिणांनृणां १६
योगिभिरप्यात्मलाभायकेवलंधियैवश्रितं साक्षादहंनमस्यामिआभ्यांसहअनयोःसखीन्गोपांश्चनमः
स्यामीति १५ किंच अपीति अथास्यतत्पास्यतितद्विभावयति दत्ताभयमितिसार्धेन १६

अपि तं

श्री० वलिनातावत्पदत्रयपरिमितभूदानसमयेतस्यहस्तेउदकंनिहितं कौशिकं इंद्रस्तेनापिगोवर्धनोद्धरणादनं
भा० द० तरंतस्याभिषेकसमयेऐरावतःकरउदकंदत्तमितिज्ञातव्यं संभूत्तरणांसंसारभयनिवर्तकं सकामा
पू० नामभ्युदयप्रदंचेत्युक्तं अत्युक्तानांपरमसाधवदंचेत्याह यद्वा वाशब्दोवितर्के विहारेरासक्रीडायांसौगंधिक
१५९ स्यगंधरेवगंधोयस्यतत्सौगंधिकगंधि १० एवंपरमानुग्रहंसंभाव्यपुनरप्यसंभवमाशंक्यपरिहरति नम

156

समर्हणंयत्रनिधायकौशिकस्तथावलिश्वापजगत्त्रयेंद्रतां यद्वाविहारेव्रजयोषितांश्रमंस्पर्शे
नसौगंधिकगंध्यपानुदत् १० नमय्युपैष्यत्यरिबुद्धिमच्युतःकंसस्यहतःप्रहितोपिविश्वदृक् यो
तर्बहिश्चेतसएतदीहितंक्षेत्रज्ञईक्षत्यमलेनचक्षुषा १० अप्यंघ्रिमूलेवहितंकृतांजलिंमामीक्षिता
सस्मितमार्द्रयादृशा सपद्यपध्वस्तसमस्तकिल्बिषोवोप्स्यामुदंवीतविशंकऊर्जिताम्

यीति यद्यप्यहंकंसेनप्रहितोऽतस्यहतः तथापिमयिअरिरयमितिबुद्धिंनउपैष्यतिनकरिष्यतीत्यर्थः य
तोविश्वदृक्सर्वज्ञोतोममचेतसोंतर्बहिश्चयदीहितंचेष्टितमेततयःक्षेत्रज्ञःअंतर्यामीनित्यज्ञानेनेक्षते
अयंभावः चेतसोबहिरेवकंसमनुवर्तनेअंतस्तुकृष्णमेवतदेतद्सौहृदिस्थोजानातीति यद्वा एतस्यज
गतईहितमिति १० अपियदिअंघ्रिमूलेचरणोपांतेऽवहितंसंयतंसंप्रणतंकृपामृतेनार्द्रयादृशामामीक्षि

१५९

156A

अथमांपविरस्यतेआलिंगिष्यतियदातदैवमेआत्मादेहः तीर्थीक्रियतेअतिपवित्रीकरिष्यते उच्छ्वसितितिशि
थिलीभवष्यतीतिअतोदेहात् २० उत्तमोसदतातेतितदाजन्मभृतःसफलजन्मानःवयंअन्यथातज्जन्मैवनभ
वतीत्याह महीयसेति महीयसाश्रीकृष्णेन योनाहतस्तस्याधिक अमुष्यजंतोः २१ ननुसुहृदादिषुपरिषं
गसंभवात्आदयोजीवधर्माः कथमीश्वरेसंगच्छंतेइत्यतआह ननसेति दयितःप्रियःतद्विपरीतोप्रियःसुहृत्
सुहृत्तमंज्ञातिमनन्यदैवतंदोर्भ्यांबृहद्भ्यांपरिरप्स्यतेअथमां आत्माद्दितीर्थीक्रियतेतदैवमेबन्धस्य
कर्मात्मकउच्छ्वसित्यतः २० लब्धांगसंगंप्रणतंकृतांजलिंमांवीक्ष्यतेकृष्णउरुक्रमःसुवाः तदाव
यंजन्मभृतोमहीयसानैवादृतोयोधिगमुष्यजन्मतत् २१ नतस्यकश्चिद्दयितःसुहृत्तमोनचाप्रि
योद्वेष्यउपेक्ष्यएववा तथापिभक्तान्भजतेयथातथासुरद्रुमोयद्वदुपाश्रितोर्थदः २२ किंचाग्रजो
मावनतंयदूत्तमःस्मयन्परिष्वज्यगृहीतमंजलौ गृहंप्रवेष्याप्तसमस्तसत्कृतंसंप्रेक्ष्यतेकंसकृतंस्व
मोद्दितःतद्विपरीतोद्वेष्यः एतत्सर्वव्यतिरिक्तउपेक्ष्यइतिसमंतथाविभक्तान्भजते तत्रचयथायेभक्तास्तां
स्तथैवभजते येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं इतिभगवद्वचनात् अविषमत्वेपिभक्तेभ्यएवफलं
ददातीत्यत्रदृष्टांतः यद्वत्सुरद्रुमइति २२ अग्रजःश्रीरामः योमयाअंजलिःकरिष्यतेतस्मिन्नेवगृहीतेमांआ

मत्तमार्गमपिनवेदतयापिरथेनप्राप्तइति २४ अखिलैर्लोकपालैःकिरीटेषुजुष्टाअमलाःपादरेणवो

श्री· यस्यतस्यक्षितिकौतुकानिक्षितेरलंकाररूपाणि २४ तद्दर्शनेनयआह्लादस्तेनविवृद्धःसंभ्रमोयस्य

भा१· सः प्रेम्णाऊर्ध्वानिरोमाणियस्यसः अश्रूणांकलाभिर्लेशैराकुलेईक्षणेयस्यसः अवस्कंद्यावप्लुत्यतेषुअ

द· चेष्टतव्यलुठत् अहोप्रभोर्नारायणस्यामून्यंघ्रिरजांसिइतिउल्लेखतोभावयन् २६ ननुकिमर्थमेवव्याल

१५७ इतिसंचिंतयन्कृष्णंश्वफल्कतनयोध्वनि रथेनगोकुलंप्राप्तःसूर्यश्चास्तगिरिंनृप २४ पदानित

157

२ स्याखिललोकपालकिरीटजुष्टामलपादरेणोः ददर्शगोष्ठेक्षितिकौतुकानिविलक्षितान्यब्जयवा

ङ्कुशाद्यैः २५ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः रथादवस्कंद्यसते

ष्वचेष्टतप्रभोरमून्यंघ्रिरजांस्यहोइति २६ देहंभृतामियानर्थोहित्वादंभंभयंशुचं संदेशाद्योहरेर्लिं

गदर्शनश्रवणादिभिः ददर्शकृष्णंरामंचव्रजेगोदोहनंगतौ पीतनीलांबरधरौशरदंबुरुहेक्षणौ २७

वत् नास्तिप्रेमसंरंभेफलोद्देशइत्यतआह देहंभृतामिति देहभाजामेतावानेवपुरुषार्थः कंसस्यसंदेशा

दारभ्यहरेर्लिंगदर्शनश्रवणादिभिर्योयमक्रूरस्यवर्णितइतिसर्वेषामपियोयस्यार्थस्तस्ययावानक्रूरस्यजातइ १५७

तिवा २७ ततःकृष्णरामंचददर्श गावोदुह्यंतेयस्मिन्नितिगोदोहनंतत्स्थानंगतौप्राप्तौ २८

२८ पश्चांगच्छनदान्हेतोहर्षनिर्भरमानसः कृपयस्त्यामिथात्मानं मन्यमानोमतामनाः २९

157A

२८ अत्रक्रोशोत्रुकं पातहिलसितं स्मितयुक्तमीक्षणं ययोः तौ ३॰ उदारारुचिराक्रीडायुयो स्तौ स्रग्विणौ
रत्नस्रग्भिरप्यलंकृतौ ३१ प्रधानभूतौ पुरुषौ प्रकृतिपुरुषात्मकौ वा उतः आद्यौ तदपि उक्तः जगद्धेतू
अत एव जगत्पती विपरीतौ वा च तत्क्षणं परानंदे तद्धेतुमज्ञावः जगत्यर्थे पृथिव्याभारापनयनाय स्वां

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ २९ ध्वजवज्रां
कुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजे शोभयंतौ महात्मानौ सानुक्रोशस्मितेक्षणौ ३॰ उदाररुचिरक्री
डौ स्रग्विणौ वनमालिनौ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ प्रधानपुरुषावाद्यौ जगद्धेतू
जगत्पती अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया
यथा मारकतः शैलो रौप्यश्च कनकाचितौ ३३ रथात्तूर्णमवप्लुत्य सोक्रूरः स्नेहविह्वलः पपात चरणो
पांते दंडवद्रामकृष्णयोः ३४ भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः पुलकाचितांगौत्कंठ्यात्स्वाख्या तांग।

शेन मूर्तिभेदेन बलकेशवौ संतौ अवतीर्णौ ३२ स्वप्रभया विगतवितिमिरा दिशः कुर्वाणौ कनकाचितौ स्रव स्रि
णौ व्याप्तौ वितिमालंकारयोः शैलसादृश्यार्थमुक्तं ३३ ३४ भगवद्दर्शनाह्लादेन यद्वाष्पं तेन पर्याकुले ईक्ष
णे यस्य सः पुलकैराचितं व्याप्तमंगं यस्य सः स्वाख्याने अक्रूरोहं नमस्करोमीति कथनेनाप्यक्षोत् ३५

श्री॰ भा॰ द॰ पू॰ १५८ 158

अतिप्रेत्य अक्रूरोयमेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यद्योतवधध्वजवरथांगेन चक्रेणांकितो यः पा
णिः तेनाभ्युपाकृष्य तमालिंगितवान् ३६ पाणिरब्जेन लिंरूपेण संहृतावेव गृहीत्वा ३७ मधुपर्क एवार्ह
णं तस्मिन् वा यदुचितमर्हणमाहरत् आनीय समर्पितवानित्यर्थः ३८ ४० सत्कृतं सम्मानितं निरनुग्रहे

भगवांस्तमभिप्रेत्य रथांगांकितपाणिना परिरेभेभ्युपाकृष्य प्रीतः प्रणतवत्सलः ३६ संकर्षणश्च
प्रणतमुपगुह्य महामनाः गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं ३७ पृष्ट्वाथ स्वागतं तस्मै निवे
द्य च वरासनं प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हमाहरत् ३८ निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः
अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ३९ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् मुखवासैर्गन्ध
माल्यैः परां प्रीतिं व्यधात्पुनः ४० पप्रच्छ सत्कृतं नन्दः कथं स्थ निरनुग्रहे कंसे जीवति दाशार्ह सौ
नपाला इवावयः ४१ योऽवधीत्स्वस्वसुस्तोकान्क्रोशन्त्या असुतृप् खलः किं नु स्वित्तत्प्रजानां वः कुश

क॰ स्तरे कथं केन प्रकारेणास्य जीवथेत्यर्थः सौनः पशुघाती स एव पालको येषां ते अवी \\ लं विमृशामहे ४२
नामेषां णान्तः कंसस्य प्रजानां हे अक्रूर येषां जीवनमात्रमपि दुर्लभं तेषां वः किं कुशलं विचारयामेति १५८
ँ॰वत तत्तुल्या इत्यर्थः ४१ निरनुग्रहतामाह योऽवधीदिति तोकान् तोकानि असुतृप् असूनेव तर्पयति यः असुतृप् खलः ँ॰ ४२

158A

मथुरयावाचाश्यस्यंसत्कृतस्तथैववाचापरिष्टेनप्रश्नेन अध्वपरिश्रमंसंसारश्रमं ४२ इतिश्रीभावार्थेदश
मेःष्टत्रिंशः ३८ नवत्रिंशेश्रीगत्वात्यत्यतेगोपिकोक्तयः अक्रूरेणाथकालिंद्यांविश्वलोकस्यदर्शनं भ
क्तानांमनोरथाः सत्याभवंतीतिद्योतयन्नाह सुखोपविष्टइति रामकृष्णाभ्यामस्रुअधिकंमानितः १ ३ हे

श्यंसत्ततयावाचानन्देनसुसमभानितः अक्रूरःपरिष्टेनजद्दावध्वपरिश्रमं ४२ इतिदशमेःष्ट
त्रिंशोध्यायः ३८ श्रुकउ सुखोपविष्टःपर्यंकेरामकृष्णोरुमानितः लेभेमनोरथान्सर्वान्पथि
यान्सचकारवै १ किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने तथापितत्परराजन्नहिवांछंतिकिं
चन २ सायंतनाशनंकृत्वाभगवान्देवकीसुतः सुहृत्सुवृत्तंकंसस्यपप्रच्छान्यच्चिकीर्षितं ३
श्रीभगवानुवाच तातसौम्यागतःकच्चित्स्वागतंभद्रमस्तुवः अपिस्वज्ञातिबंधूनामनमीवम
नामयं ४ किंनुनःकुशलंपृच्छेएधमानेकुलामये कंसेमातुलनाम्न्यंगस्वानांवस्तत्प्रजासुच

तातहेसौम्यकिंभवानागतःस्वागतंसुखेनागतंस्वज्ञातिबंधूनां स्वज्ञातिबंधूनां स्वेसुहृदः ज्ञातयःस
पिंडा बंधवोःसपिंडाःसंबंधिन स्तेषामपिकिंअनमीवंअपापमडःस्वंसुखमितियावत् अनामयमारो
ग्यं ४ पवंप्रश्नेपिसमानातिसंगतमाह हेअंगअक्रूर पृच्छेपृच्छामिनोःस्माकंकुलस्यामयेरोगेमातुल

श्री० भा० द० टी० १५९

159

अहो अस्मदिति अस्मन्निमित्तं हृत्निगडैः एवं आर्ययोः निरपराधयोः यद्धेतोः योऽहमेव हेतुस्तस्मात् ९ हे
सौम्यस्वानां वो दर्शनं अद्य मम संजातं तद्दिष्ट्या भद्रं ७ माधवो मधोर्वंशजः ८ यदन्तु मरखच्छ्रमसन्देशो
यस्मात् यदर्थं वा आणकादिभिः ज्ञातनार्थं अस्मत्केससस्वजन्मकंसजन्मत्रानकदुंदुभेः सकाशात् ९ वि
अहो अस्मदर्भके हे पित्रोर्वृजिन मार्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बन्धनं तयोः ९ दिष्ट्याय दर्शनं स्वा
नां मम स्थितः सौम्य कोहितं संजाते वर्णितं नातं वागमनकारणं ' दृष्टो भगवतां सर्वं वर्णयामासम मा
यदः वैराजवत्थं यदुपुत्रवसुदेवंवयो यमं यत्संदेशोयदर्थ्य वा हतः सं प्रेषितः स्वयं यदुक्तं नारदेनास्य
स्वजन्मानकदुंदुभेः ९ श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा प्रहस्य नंदं पितरं राज्ञादिष्टं विजज्ञतुः १०
गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च ११ यास्यामः श्वो म
धुपुरीं दास्यामो नृपते रसान् द्रक्ष्यामः सुमहत्पर्व यान्ति जानपदाः किल एवमाघोषयत्क्षत्रा नंदगोपः स्वगो

जनन्तु विशेषेणाज्ञापयामास सः ९ सोपि नंदोपि गोपान्समादिशत् तदेव दर्शयति गृह्यतामित्यादिना गो
रसः क्षीरादि उपायनानि ११ रसान् घृतादीन् शकटलेनेदं सूचयति अविकित्सस्य विकित्सार्थं रसादीन्
दास्याम इति सुमहत्पर्व धनुर्महोत्सवः तन्नावजनत्याधिकृतेन आघोषयत्सर्वतो घोषितवान् १२

ताः कृष्णैकजीवनाः गोप्यस्तत्तदाक्रूरमागतमुपश्रुत्येति १३ अथालिंगान्याह पंचभिः काश्चिदि-
ति तेन श्रवणेन कृतो हृत्तापः तेन यः श्वासः तेन म्लाना मुखश्रीर्यासां ताः बभूवुरिति दुकूलानि च वल-
यानि च केशग्रंथयश्च स्रंसंतो दुकूलादयो यासां तथाभूताः काश्चन बभूवुरिति १४ तस्य श्रीकृष्णस्यानुध्या-

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतं १३ काश्चित्त-
त्कृतहृत्तापश्वासम्लानमुखश्रियः स्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्चन १४ अन्याश्च तदनु-
ध्याननिवृत्ताशेषवृत्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव १५ स्मरंत्यश्चापराः शौ-
रेरनुरागस्मितेरिताः हृदिस्पृशश्चित्रपदा गिरः सम्मुमुहुः स्त्रियः १६ गतिं सुललितां चेष्टां स्नि-
ग्धहासावलोकनं शोकापहानि नर्माणि प्रोद्दामचरितानि च १७ चिंतयंत्यो मुकुंदस्य भीता
विरहकातराः समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः १८

नेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ताः इमं लोकं देहमपि न जानंति स्म मुक्ता एवेति १५ अपराः
स्त्रियः शौरेः गिरः स्मरंत्यः सम्मुमुहुः कथंभूता गिरः अनुरागेण यत्स्मितं तेन ईरिताः हृदिस्पृशंती-
ति तथा हृदिस्पृशः मनोज्ञाः चित्राणि पदानि यासु ताः १६ १७ विरहेण कातरा विह्वलाः अच्युते आशय

हृत्संगतिं क्षिपाय विघटयती विधातारं प्रत्येकमाक्रोशंत्य आहुः अहो इति मैत्र्या हिताचरणेन प्रणयेन
श्री· स्नेहेन च अकृतार्थान् अप्राप्तभोगानपितान् विधुनंक्षि वियोजयसि तस्मान्न तव दया वालिशोपि त्वमित्या
भा·द· हुः अपार्थकमिति १९ विगर्हितं च तवेदं कर्मेत्याहुः यस्त्वमिति शोकमपनुदतीति शोकापनोदः स्वचा
स· सौ स्मितलेशश्च शुभ्रहासस्तेन सुंदरं एवंविधं मुकुंदस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदर्शयतां करो

१६·
160

गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः तांश्चाकृतार्थान्विधु
नंक्ष्यपार्थकं विक्रीडितं तेर्भकचेष्टितं यथा १९ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सु
कपोलमुन्नसं शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं २० क्रूरस्त्वमक्रूरस
माख्यया स्म नश्चक्षुर्हि दत्तं हरसे वताज्ञवत् येनैकदेशेखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधु

विद्विषस्तव कृतं कर्म असाधु निंद्यमित्यर्थः २० किं च हस्तापहारित्वेनातिक्रूरस्त्वमित्याहुः क्रूरस्त्वमिति नन्व
क्रूरोहमिति चेदत आहुः अक्रूरसमाख्ययेति न ह्येवं कर्तुमन्यः प्रभवत्यतो नामांतरेण त्वमेवागतोसि
न तु हंत संहरामि न युष्मच्चक्षुरिति चेत् येन त्वया दत्तेन नु चक्षुषा मधुद्विष एकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रं सृष्टि
नैपुण्यमद्राक्ष्म दृष्टवंतो वयं तच्चक्षुः अयं भावः ममैश्वर्यं रहस्यमाभिर्ज्ञातमिति अमर्षेणैव कृष्णसंवियोजयन्न

५४ ॥ श्री ॥

अष्टमसर्गे ... १६·

एतिनाक ३ मम

160A

विधातारं विहाय परस्परम् ऊचुः नन्दसूनुरिति वनखेदेलक्षणभंगमस्थिरं सौहृदं यस्य सः गृहहारी
ल्विहाय अहहास्तातानसैवदास्यमुपगताः अतः स्वकृतातराः तत्कृतैनैवस्मितादिनापरवशाअपि
तोस्मान् समीक्षते नवंनवंप्रियंयस्य सः अतएनंनिवायाम इतिभावः २२ सैष्यम् ऊचुः सर्वप्रभाते
ति प्रयोषितामथुरानिवासिनीनांह्रीणामाशिषः सत्यावभूवुः याव्रजस्यतेः श्रीकृष्णस्यवपास्यंती

नन्दसूनुः क्षणभंगसौहृदः समीक्षतेनः स्वकृतातरावत विहायगेहान्स्वजनान्सुतान्प
तींस्तद्दास्यमहोपगतानवप्रियः २२ सर्वप्रभातारजनीयमाशिषः सत्याबभूवुःपुरयोषि
तांध्रुवं याः संप्रविष्टस्य मुखंव्रजस्यतेः पास्यंत्यपांगोत्कलितस्मितासवं २३ तासांमुकुंदो
मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि कथंपुनर्नः प्रतियास्यतेबलाग्राम्याः सलज्ज

ति आदरेणद्रक्ष्यंति कथंभूतं अपांगेननेत्रांतेनोत्कलितमुज्जृंभितं स्मितमेवासवोरसोयस्मिंस्तत् यद्वाअ
पांगोत्कलितस्मितेनासवद्रूपंयन्मुखंतत्तत्पानंमुख्यमेवसंभावयेति २३ ननुहित्रापादिनानितथाभव
तनामतथाप्यस्मन्मोहाकृष्टः पित्रादिभिश्चपरावर्तितश्चागमिष्यतीत्याशंक्याहुः हेअबलास्तासांमधुव
मंजुभिर्भाषितैर्वशीकृतचित्तः तथातासांसलज्जस्मितैर्विभ्रमैर्भ्रमन् परवान्पित्रादितंत्रोपि यद्वा व्रजेपरेःम

बांधवाः संतिं यस्य स तथा मनस्वी धीरोपि यास्याम्यग्रविदग्धाः नः कथं प्रतियास्यते प्रत्येष्यति न कथंचिदित्य
श्री० र्थः २४ किंच अस्मदुत्सवभाजो नाप्येवाग्र भविष्यतीत्याहुः अद्येति तत्र पुरे दाशार्हादीनां दृशां ईदृशो महोत्
भा०द० त्सवो भविष्यते ये देवकीसुतं द्रक्ष्यंति तथा ये चाध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशोर्भविष्यतीति यद्वा दृ
१० शइति द्वितीया तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यते शआप्यर्थस्य भवतेरात्मनेपदत्वं अ अक्रूरेण
१६१ यत्नमाहुः मैतद्विधस्येति पुरा विधाने कर्मयस्य सः अतएव निष्कृपस्याक्रूर इति नाम शोभनं माभूत् अद्येहे

161

अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजान्धकवृष्णिसात्वतां महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यं
ति ये चाध्वनि देवकीसुतं २५ मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः योसाव
नाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः २६ अनार्द्रधीरेष समास्थितो रथं तमन्व
मी च त्वरयंति दुर्मदाः गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते २७

तेः अतीवदारुण इत्यादि प्रियात्प्राणादपि प्रियं श्रीकृष्णं अध्वनः पारमस्मद्दृग्गोचरत्वादतिदूरं नेष्यति २६
अहो धिगस्मज्जीवितमित्याहुः अनार्द्रधीरिति अनार्द्रा कठिना धीर्यस्य सः तावदेष कृष्णो रथमारूढः अस्मा॰वि २
नयमालस्यस्थविरैरप्युपेक्षितं तेन निवारितं तत इत्यर्थः किंच दैवं चेति अयंभावः यद्यस्माकं दैवमनुकूलं भ
वेत्तर्हि विघ्नैः कश्चिद्रथे तेषां मध्ये प्रतिहन्येत अकस्माद्वज्रपातो वा भवेत् अन्यद्वा किंचिदनिष्टं स्यात् नतदस्तीति १६१

16A परस्परंसम्मंत्र्यसास्रंसमधिकत्याहुः निवारयामासुः इति अकरिष्यन् किं करिष्यंति निमिषार्धं दुस्त्यजा॰
त् मुकुंदस्य संगाद्विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां एवंभूतानामस्माकं न स्मरेर
पि भयं २८ इतोपि कारणाद्वयं सास्रंसमेवावलंबनीयमित्याहुः हे गोप्यः यस्य ललितं स्मितं च वल्गुमंत्र
स्य लीलावलोकस्य परिरंभणं च अनुरागेण एतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नः अस्माभिः क्षण

निवारयाम समुपेत्य माधवं किं नोकरिष्यन्कुलवृद्धबान्धवाः मुकुन्दसंगान्निमिषार्धदुस्त्यजा
द्दैवेन विध्वंसितदीनचेतसां २८ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरा
सगोष्ठ्यां नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं २९ योङ्घ्रिः त्वयैव ब्र
जमनंतसखः परीतो गोपैर्विशन् खुररजश्छुरितालकस्रक् वेणुं क्वणन्स्मितकटाक्षनिरीक्षणे॰
\\ न चित्तं क्षणोत्यमुमृते नु कथं भवेम

दाराज्वयः क्षणमिव नीताः तममुं कृष्णं विना दुरंतं तमः विरह
दुःखं कथं नु अतितरेम न कथंचिदित्यर्थः २९ किंच आस्तां तावत् तमोतितरणं जीवनमेव कथं स्यादि
त्याहुः यः इति अङ्घ्रिः त्वयैव दिनावसाने खुररजोभिश्छुरिताः धूसरा अलकाः स्रजश्च यस्य सः व्रजं विशन् स्मितेन
युक्तकटाक्षनिरीक्षणेन नः चित्तं क्षणोति निहरति अमुं कृष्णं विना तावत्कथं भवेम जीवेमेति ३०

कृष्णेविषक्तानिआरोपितानिमानसानियासांताः लज्जांविसृज्यसुस्वरमुच्चैःरुरुदुः क्रूरमक्रूरतःस्वनाकंसंकं
श्री· सुनिसूदनः गोपीमनोरथ्यारामः सरामःस्वपुरंययौ ३१ स्त्रीणामिति ताश्चनादृत्यकृतमैत्रादिकः मैत्रंमित्रदैव
भा·द· तंसंध्योपासनेकृतेनंदादिकर्मयेनसः ३२ अन्वसज्जत अन्वगच्छन् ३३ अनुरंजिताः पराङ्मुखनिरीक्षणादि
ष्ट· मूलः एवंब्रुवाणाविरहातुराभृशंव्रजस्त्रियःकृष्णविषक्तमानसाः विसृज्यलज्जांरुरुदुस्मसुस्वरंगोविं
१६२ ददामोदरमाधवेति ३१ स्त्रीणामेवंरुदंतीनामुदितेसवितर्यथ अक्रूरश्चोदयामासकृतमै
162 त्रादिकोरथं ३२ गोपास्तमन्वसज्जेतनंदाद्याःशाकटैस्ततः आदायोपायनंभूरिकुंभान्गोरस
संभृतान् ३३ गोप्यश्चदयितंकृष्णमनुव्रज्यानुरंजिताः प्रत्यादेशंभगवतःकांक्षंत्यश्चावतस्थिरे
३४ तास्तथातप्यतीर्वीक्ष्यस्वप्रस्थानेयदूत्तमः सांत्वयामाससप्रेमैरायास्यइतिदौत्यकैः ३५ या
वदालक्ष्यतेकेतुर्यावद्रेणूरथस्यच अनुप्रस्थापितात्मानोलेख्यानीवोपलक्षिरे ३६ तानिराशा
निववृतुर्गोविंदविनिवर्तने विशोकाअहनीनिन्युर्गायंत्यःप्रियचेष्टितं ३७ भगवानपिसंप्राप्तोरा
माक्रूरयुतोनृप रथेनवायुवेगेनकालिंदीमघनाशिनीं ३८
भिः किंचिदानंदिताः प्रत्यादेशंप्रत्याख्यानं ३४ तप्यतीः संतप्यमानाः आयास्येशीघ्रमागमिष्यामीतिदूत
वाक्यैः ३५ कृष्णमनुप्रस्थापिताआत्मानश्चित्तानियाभिस्ताः लेख्यमयपुत्रिकाइवनिश्चलाः ३६ ३७ ३८ १६२

162A हृत्वा णां खंडं समभूदसुपव्रज्य समीपं गत्वा ३९ शत्रुभ्यः शंकितः सन् रथोपरि निवेश्य ४० ४१ ब्रह्मगायत्रीज
